।। वज्रशब्द इति ।। लिङ्गं चेत्यत: परमितिशब्दोऽध्याहार्य: । वज्रशब्दोद्यतत्वलिङ्गयोस्तादृक्तवं नाम, इन्द्रायुधादन्यत्र परमात्मन्यवकाशराहित्यमिति ज्ञातव्यम् । अत्र श्रुतिलिङ्गयोर्वैजात्याद् द्वयमित्युक्तम् । ततश्च चेन्द्रायुधादन्यत्रावकाशरहितश्रुतिलिङ्गाभ्यां वज्रशब्दवाच्यमिन्द्रायुधमेवेति भाव: । (अयं च न्यायो निरवकाशसर्वजगच्चेयकत्वलिङ्गोक्तया वज्रशब्दस्योद्यतत्वलिङ्गस्य च सावकाशत्वोक्तया सूचितो भवति ।) ।। १० ।। ॐ ज्योतिर्दर्शनात् ॐ ।। 'योऽयं विज्ञानमय: प्राणेषु हृद्यन्तर्ज्योति:' इति वाक्योक्तं ज्योति: किं जीव उत विणुरिति ज्ञानŽ पत्वसाम्येन सन्देहे, जीव एवेति पूर्व: पक्ष:, विणुरेवेति सि€न्त: । तत्र 'बहुतादृक्तवम्' इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृणोति- आदित्यादिज्योतिष्ट्वमित्यादिना ।। जीव एवेदं ज्योति:, तस्यादित्यादिज्योतिष्ट्वोक्ते: । ननु, 'किं ज्योतिरयं पुरुष:' इत्यादित्यज्योति:, 'सम्राडिति होवाच' इत्यादिनोक्तमादित्यज्योतिष्ट्वम्' 'प्राणेषु हृद्यन्तर्ज्योति:' इत्युक्तज्योता: कथमिति चेŽा । यस्य पुरुषस्यादित्यादिज्योतिष्ट्वमुक्तम्' तस्यैव 'आत्मैवास्य ज्योतिर्भवति' इति श्रुत्या(सुप्त्यादावा)त्मज्योतिष्ट्वोक्तौ कतम आत्मेति तदात्म(त्व)प्रश्ने ज्योता उक्तत्वादिति भाव: । आदित्यादिज्योतिष्ट्वं तु 'न तत्र सूर्यो भाति' इत्यादे: परमात्मन्यनवकाशम् । 'स समान: सŽुभौ लोकावनुसञ्चरति' इत्यनेन लोकसञ्चरणं च ज्योता उच्यते, तच्च जीव(स्यैव)स्य कर्मवशाद्युक्तम्, ईश्वरे कर्माभावादनवकाशम् । (ननु) यस्यादित्यादिज्योतिष्ट्वमुक्तं, स जीव एवास्तु, तस्य च आत्मैवास्य ज्योति:' इत्यत्र परमात्मज्योतिष्ट्वमुच्यते । तदात्मप्रश्ने च 'योऽयं विज्ञानमय:' इत्यादिना ज्योता आम्नानात्परमात्मैवेदं ज्योतिरित्यत उक्तम् - आदित्येनैवायं ज्योतिाास्त इत्यवधारणमिति ।। 'आत्मैवास्य ज्योति:' इत्यत्र न जीवस्य परमात्मज्योतिष्ट्वमुच्यते, जीवस्य परमात्मज्योतिष्ट्वस्यैवायोगात् । तथात्वे परमात्मनोऽस्तमयादिशून्यस्य जाग्रत्यपि ज्योतिष्ट्वप्राप्त्या 'तदादित्येनैवायं ज्योतिाास्ते चन्द्रमसैवायं ज्योतिाास्ते' इत्यवधारणानुपपत्ति: । आत्मैवास्य ज्योतिरित्युक्ताथर्स्य 'अत्रायं पुरुष: स्वयं ज्योति:' इति प्रत्यभिज्ञाविरोधश्च सङ्ग्राह्य इति भाव: । यद्वादिपदेन 'इमं लोकमतिक्रामति मृत्यो Ž पाणि सा वायं पुरुषो जायमान: शरीरमभिसम्पद्यमान: पाप्मभि: संसृजते, उत्क्रामन्म्रियमाण: पाप्मनो विजहाति उभयान्पाप्मन आनन्दाश्च पश्यति स यत्तत्र प्रस्वपिति स्वप्नान्तमुच्चावचमीयमान उभयानि पश्यन्' इत्यादिजीवलिङ्गानां परमात्मन्यवकाशरहितानां ग्रहणम् । तेन बहुतादृक्तव(मुक्त)मुपपŽाम् । इत्यादीनामित्यनेन बहुतादृक्तवमिति विग्रह: प्रदर्शितो भवति । ततश्च जीवादन्यत्रावकाशरहितबहुलिङ्गेभ्यो जीव एवेदं ज्योतिरिति भाव: । (अयं च न्यायो 'विणुरेव' इति साधारणतया,

निरवकाशत्वेन, श्रुतित्वेन जात्या च प्रबलविणुशब्दोपेताच्छ्रुतिप्रदर्शकदर्शनपदोपादानादतो दुर्बलस्य हेतो: पूर्वपक्षे सूचनात्तस्य च प्राबल्याभिमानं विना साधकोक्तयोगात्सूचित:) ।। ११ ।। ॐ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॐ ।। 'आकाशो वै नाम नामŽ पयोर्निर्वहिता' इतिवाक्योक्त आकाश: किं भूताकाश:, उत विणु:, इति प्रयोगात्सन्देहे, भूताकाश एवेति पूर्व: पक्ष:, विणुरेवेति सि€न्त: । तत्रोक्तस्य विरोध इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृणोति -

वै नामेति प्रसि€द्योतकनिपातद्वयं Ž ढित्यागेनोक्तयौगिकार्थस्वीकारे विरोध: ।। १२ ।। जीवेश्वराभेदे ईश्वरोक्तवप्यर्थाज्जीव एवोच्यत इत्यर्थात्तथागति: ।। १३ ।।

।। वै नामेति ।। वै नामेति निपातद्वयमाकाशशब्दार्थस्य प्रसि€द्योतकं, आकाशशब्दस्य भूताकाशे Ž ढित्यागेन 'आकाशस्तल्लिङ्गाद्' इत्यत्रोक्तविणुŽ पयौगिकार्थस्वीकारे विरोधि स्यादित्यर्थ: । 'प्रसि€द्योतक:' इति हेत्वर्थगर्भं विशेणम् । नहि विणोस्तŽार्वहितृत्वं वा प्रसि€मिति भाव: । अनेन, 'उक्तस्य विरोध इत्यनुव्याख्याने निपातद्वयेनेति शो

इत्युक्तं भवति । (यद्वा उक्तस्य श्रुतौ प्रयुक्तस्याप्रसि€स्य विणुपक्षे विरोध इति यथाश्रुतमिति) ततश्च चाकाशपदार्थत्वेनाप्रसि€स्य प्रागुक्तविणो: स्वीकारे प्रसि€द्योतकनिपातद्वयविरोधाद् भूताकाशे तदानुकूल्याद् भूताकाशमेवाकाशपदवाच्यमिति भाव: । (अयं च न्यायोऽर्थान्तरत्वादिव्यपदेशाद्' इत्यनेन प्रसि€काशविलक्षणप्रतिपादकेन विलक्षणाकाशाङ्गीकारे प्रसि€द्योतकनिपातद्वविरोध इति सूचितो भवति) ।। १२ ।। ॐ सुप्त्युत्क्रान्त्योर्भेदेन ॐ ।। 'स यत्तत्र किञ्चित्पश्यत्यनन्वगतस्तेन भवति' इति श्रुत्युक्तं स्वप्नादिद्रयृत्वं (किं) जीवस्योत विणोरिति लोकप्रसि€यसङ्गत्वलिङ्गाभ्यां सन्देहे, जीवस्यैवेति पूर्व: पक्ष:, विणोरेवेति सि€न्त: । तत्रार्थात्तथागतिरित्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन (तावद्) विवृणोति- जीवेश्वराभेद इति ।। निमित्तसप्तमीयम् । ईश्वरोक्तावपि असङ्गत्वलिङ्गबलेन 'स यत्तत्र किञ्चित्पश्यति' इत्युक्तस्वप्नादिद्रयृत्वेन (सि€न्तिना) ईश्वरोक्तावित्यर्थ: । अपिशब्दोऽस्वरससूचनार्थ: । ततश्चायमर्थ: - असङ्गत्वलिङ्गबलाच्छ्रुत्युक्तं स्वप्नादिद्रयृत्वमीश्वरस्येति न वाच्यम् । यतो जीवेश्वरयोरभेदेन चैतन्यǎ पार्थविवक्षयासङ्गत्वेन 'असङ्गो ह्ययम्' इति श्रुतौ जीव एवोच्यते । ततश्च लोकप्रसि€या 'स यत्तत्र किञ्चित्पश्यति' इत्यत्रापि स्वप्नादिद्रयृत्वेन जीव एवोच्यत इति । ननु तथापि जीव एवेत्यवधारणानुपपत्ति: । यथा स्वप्नादिदर्शनस्य जीवे मुख्यत्वेनासङ्गत्वमभेदाभिप्रायेण नीयते, तथासङ्गस्येश्वरे मुख्यत्वेन स्वप्नादिदर्शनस्याभेदाभिप्रायेण नेतुं शक्यत्वादिति चेǎा, चैतन्यैक्याभिप्रायेण तद्गतासङ्गत्वस्य जीवेऽमुख्यवृत्तिवदीश्वरे स्वप्नादिद्रयृत्वस्य विशियनिष्ठस्यामुख्यतोऽपि वक्तुमयोगादिति । इतिशब्द: प्रकारार्थ: । एवम्प्रकारार्थात्तथागतिरित्यर्थ: । यद्वा जीवेश्वराभेद एव कुत: सि€ इत्यत आह- इत्यर्थादिति ।। इत्यर्थादसङ्गत्वस्वप्नादिद्रयृत्वǎ पविशेणद्वयसामानाधिकरण्यान्यथानुपपत्त्या, तथा जीवेश्वरयोरभिǎात्वेन, गतिरवगतिरित्यर्थ: । एवंचासङ्गत्वस्वप्नादिद्रयृत्वलिङ्गान्यथानुपपत्त्याभेदस्य सि€र्जीव एवायं स्वप्नादिद्रयेत्यर्थ: । (अयं च न्यायो 'भेदेन' इत्यनेन स्वप्नादिदर्शिनोऽसङ्गत्वान्यथानुपपत्त्या तद्विीरु€ाऽभेदप्राप्तिरिति सूचितो भवति) ।। १३ ।। ॐ पत्यादिशब्देभ्य: ॐ ।। 'एा नित्यो महिमा ब्राह्मणस्य' इति श्रुत्युक्तब्राह्मण: किं विरिञ्च उत विणुरिति अजश्रुतिनित्यमहिमत्वलिङ्गाभ्यां सन्देहे, विरिञ्च एवेति पूर्व: पक्ष:, विणुरेवेति सि€न्त: । तत्रैतदव्यवहितपूर्वाधिकरणसम्बन्ध्यर्थात्तथागतिरित्युक्तन्याय एव 'समस्तमेतत्' इत्यत्रैतच्छब्देन परामृश्यत इत्यभिप्रेत्य तं न्यायं पूर्वपक्षसम्बन्धित्वेन विवृणोति-

ब्राह्मणशब्दस्य पापालेपलिङ्गस्य च चतुर्मुखेन सह परमात्मनोऽभेदं विनावकाशराहित्यादर्थादभेदप्राप्तिरिति समस्तमेतत् ।। १४ ।। ।।

।। ब्राह्मणशब्दस्येति ।। ब्राह्मणशब्दस्य 'स न साधुना कर्मणा भूयाǎो एवासाधुना कर्मणा कनीयान्' इति पापाद्यलेपलिङ्गस्य चैकनिष्ठतया प्रतीतस्य विणुविरिञ्चान्यतरग्रहणेऽयोगाच्चतुर्मुखस्य परमात्मनाभेदं विना शब्दलिङ्गयोरवकाशराहित्यादर्थात्तदन्यथानुपपत्त्याभेदप्राप्तिरित्येवम्प्रकारेण समस्तमेतदित्यर्थ: । पूवर्ाधिकरणवदिहापि श्रौतोभयसामानाधिकरण्यस्याक्षेपकतवं, विरिञ्चǎ पजीवेश्वराभेदस्याक्षेप्यत्वं, विरिञ्च एवेति निर्बन्धे कारणसद्भावश्चेत्येतत्सर्वं सममित्यभिप्रेत्य समस्तमित्युक्तम् । यद्वा 'इति' शब्द आद्यार्थे प्रकारार्थे च । इत्यनेन प्रकारेण, इत्यादि समस्तमेतत् , 'उक्तस्य विरोध:' इत्यादिकं 'बाहुल्यं लिङ्गशब्दानाम्' इत्यन्तं न्यायदशकं ग्राह्यम् । तथाहि । ऐक्याभावे उक्तस्य 'ब्राह्मणस्य' इत्यस्य नित्यमहिमत्वादिलिङ्गस्य च विरोध: । ब्राह्मणाजादिशब्दा नित्यमहिमत्वपापाद्यलेपलिङ्गानि चेति बहुतादृक्तवम् । ब्राह्मणाजादिशब्द: पापाद्यलेपलिङ्गं चेति तादृग्द्वयम् ।

पापाद्यलेपलिङ्गस्य, चतुर्मुखस्य परमात्मनाभेदं विनावकाशराहित्यभ्रम: । वर्णशून्यत्वेन ब्राह्मणशब्दस्य ǎ ढ्या, विणोर्विणुजातत्वासम्भवेनाजशब्दस्य विणुजातत्वयोगेन, विणावनवकाश इति विपरीतश्रुतिविभ्रम: । ऐक्यं विना विणुविरिञ्चप्रतिपादकवाक्यस्यैकार्थपरत्वǎ पान्वयाभाव: । पापाद्यसङ्गत्वनित्यमहिमत्वादिलिङ्गस्य विणुव्यतिरिक्तचेतनेा,

ब्राह्मणाजादिशब्दानां विरिञ्चव्यतिरिक्तेवदयि: । ऐक्यं विना विणुविरिञ्चप्रापकलिङ्गशब्दानां विरुद्धता । विणुविरिञ्चयोर्विशिय भेदस्यानुक्ति: । विणुविरिञ्चयोरैक्ये, पापाद्यसङ्गत्वनित्यमहिमत्वादिविणुलिङ्गानां ब्राह्मणाजादिविरिञ्चशब्दानां च बाहुल्यमिति । (एते च न्याया: शब्दबाहुल्यप्रदर्शकेन सूत्रेण लिङ्गबाहुल्यादर्थात्तथागतिरित्यन्तानां सर्वेाां न्यायानामुपलक्षणत्वेन सूचनात्सिद्धान्ते विरिञ्चस्य कर्मफलाभावायुक्ते:, 'न कर्मणा वर्धते' इति कर्मफलरहितेन विणुनार्थाद्भेदस्य प्राप्तिरिति स्थिते, ब्राह्मणशब्दपापाद्यलेपलिङ्गान्यथानुपपत्त्या तद्विरुद्धाभेदप्राप्तिरिति, अर्थात्सूचितो भवति ।) ।। १४ ।। इति पूर्वपक्षन्याया: ।। अथ सिद्धान्तन्याया: ।। 'ता एव बलवत्यस्तु गत्यन्तरविवर्जिता: । सिद्धान्तयुक्तयो ज्ञेया दृश्यन्ते ताश्च सर्वश: ।।' इत्यनुव्याख्याने 'बाहुल्यं लिङ्गशब्दानाम्' इत्याद्युक्ता एव सिद्धान्तन्यायत्वेनोक्ता: । तत्र 'बाहुल्यं लिङ्गशब्दानाम्' इत्युक्तमेव न्यायं द्युभ्वाद्यधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति-

तेाामेव लिङ्गशब्दानां प्राणानां ग्रन्थिरसीत्यादिनां विणौ मुख्यवृत्तिरिति बलवत्त्वम् । तस्य हि रुग्द्रावणादिकर्तृत्वं मुख्यम् ।। १ ।।

।। तेाामेवेति ।। एवकारेणात्मशब्दमुक्तोपसृप्यत्वादीनां बलवत्त्वे (बाहुल्ये) कैमुत्यमभिप्रैति । तच्छब्दपरामृयमेव दर्शयति - प्राणानामिति ।। मुख्यवृत्तिमुपपादयति - तस्येति ।। शब्दमुख्यवृत्तौ प्रवृत्तिनिमित्तातिशय: कारणमिति भाव: । ततश्च बलवद्युक्तिलिङ्गबाहुल्याद् विणुरेव द्युभ्वाद्यायतनमित्यर्थ: । (अयं च न्याय: 'एतच्छब्दाद्' इत्यनेनैव सूचितो भवति । रुद्रादिशब्दस्यान्तकत्वादिलिङ्गस्य च विणौ मुख्यतोक्तया विणुसाधकत्वसूचनात्) ।। १ ।। 'अनुक्तिश्च' इत्युक्तन्यायं भूमाधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति -

प्राणस्य विणो: सकाशद्भयस्त्वानुक्ति: चशब्देन एा तु वा अतिवदति । य: सत्येनातिवदतीति प्राणाद्विणोर्भूयस्त्वोक्तिश्च ।। २ ।।

।। प्राणस्येति ।। अत्र, भूमा विणु: पूर्णसुखाभिधानात् सर्वेाामुपर्युपदेशाच्च । ननु, 'सर्वोत्तमत्वोपदेशेऽपि न विणुत्त्वनिश्चय: । विणुवत्स्वेतरसर्वोत्तमत्वस्य वायावपि सम्भवाद्' इत्यत उक्तं - प्राणस्येति ।। यदि प्राणस्य स्वेतरविण्वादिसर्वोत्तमत्वमङ्गीक्रियते, तर्हि कुत्रचित् प्राणस्य विणो: सकाशाद् भूयस्त्वोक्ति: स्यात् । नच साऽस्ति । नच कुत्राप्यनुक्तमङ्गीकर्तुमुचितम् । 'अनुक्तं च पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन' इत्युक्तेरिति भाव: । पूर्णानन्दत्वमपि वायौ सावकाशं कथं विणुत्वनिश्चायकमित्यत आह- चशब्देन प्राणाद्विणोर्भूयस्त्वोक्तिश्चेति ।। 'अनुक्तिश्च' इत्यनुव्याख्यानगतचशब्देनेत्यर्थ: । चशब्द: पूवर्ोक्तानुक्तिसमुच्चयार्थ: । 'पूर्णानन्द: पूर्णभुक् पूर्णकतर्ा' 'यतो वाचो निवर्तन्ते' इति श्रुतौ, 'लक्षणं परमानन्दो विणुरेव न संशय: । अव्यक्तादितृणान्तास्तु विप्रुडानन्दभागिन: ।।' इति स्मृतौ च प्राणाद्विणुरेव परमान्दलक्षणभूयस्त्वोक्तेरित्यर्थ: । ननु 'प्राणो वा आशाया भूयान्' इत्युपक्रमे प्राणशब्दश्रवणात् कथं भूमा विणुरित्यतोऽप्याह- प्राणस्येति ।। प्राणस्य विणो: इति सामानाधिकरण्यम् । भूयस्त्वेत्यत: पूर्वमन्यस्येति शेा: । तथाच, न विणोर्भूमत्वाङ्गीकारे उपक्रमगतप्राणशब्दविरोध: । तस्यापि विणुपरत्वात् । प्राणस्य सकाशादन्यस्य भूयस्त्वानुक्ते: । अन्यथा प्राणापेक्षयोत्तमस्य विणो: सद्भावेन तारतम्यप्रकरणे तदनुक्तौ निमित्ताभावेन तदुक्ति: स्यादिति भाव: । अस्तु वोपक्रमगतप्राणशब्दो वायुपर: । तथापि न तस्य भूमत्वप्राप्तिरित्यत्रानुव्याख्यानगतचशब्दसूचितयुक्तिमाह- चशब्देनेति ।। उपक्रमोक्तप्राणशब्दस्य वायुपरत्वेऽपि न तस्य भूमत्वम् । 'एा तु वा अतिवदति' इत्यादिना ज्ञापकेन प्रश्नाद्यध्याहारात्, प्राणाद्विणोभर्ूयस्त्वोक्ते: । तथाच, तदनन्तरमुक्तभूम्नो विणुत्वसम्भवादिति भाव: । प्रश्नाद्यध्याहारप्रकारं च 'व्यतिहारो विि◌ाांन्ति हि' इत्यत्र सयियत्याचार्य: । ननु, प्राणशब्दस्य विणुपरत्वाङ्गीकारे पूर्ववाक्येन, 'तमुत्क्रामन्तम्' इति भायेण, च विरोध:, वायुपरत्वानङ्गीकारे तु 'इयदामननाद्' इत्यादिसूत्रादिना, छान्दोग्य भायेण, च विरोध इति कथमेतदिति चेŽा । प्राणपदेन 'आत्मन आकाश: सम्भूत:' इतिवत् , अन्तर्यामिविवक्षया विणोरुक्ते: । एतेनोक्तयनुक्तयोर्विरोधोऽपि परिहृत: । यदा प्राणशब्दस्य अन्तर्यामिविवक्षया विणुपरत्वं, तदा

प्रश्नाद्यध्यहारानभ्युपगमेन प्राणादन्यस्य भूयस्त्वादनुक्तिः, यदा तु मुख्यप्राणपरत्वं, तदा व्यतिहाराधिकरणोक्तन्यायेन, प्रश्नाद्यध्याहारेण प्राणाद्विणोर्भूयस्त्वोक्तिरिति पक्षभेदेन

दोाभावादिति भावः । (अयं च न्यायः 'अध्युपदेशाद्' इत्यनेनैव, विणोरेव भूयस्त्वोक्तेः, प्राणस्य तदभावात्सूचितो भवति । चशब्दसूचितोक्तिŽ पोऽपि न्यायः, तेनैव सूत्रांशेनोक्तः । 'व्यतिहारो विशिंान्ति हीतरवद्' इत्युक्तप्रकारेण प्राणादधिकस्योपदेशादित्यर्थभलाभात्) ।। २ ।। विरु€तेत्युक्तमेव न्यायमक्षराधिकरणसि€न्तसम्बन्धित्वेनापि विवृणोति -

सर्वाधारप्रकृत्याधारत्वं विणोरन्यस्य विरु€म् ।

।। सर्वाधारेति ।। 'तद्वा एतदक्षरं गार्गी' इत्युक्तमक्षरं ब्रह्मैव । 'यदूर्ध्वं गागिर् दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भवियच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं च' इत्याकाशाख्यप्रकृतेः सर्वाधारत्वमुक्तवा, 'एतस्मिन्खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च' इति श्रुत्या, अक्षरस्योच्यमानं सर्वाधारप्रकृत्याधारत्वं विणोरन्यस्य (श्रीतत्वस्य) विरु€मित्यर्थः । (कुत एतदित्यतः) विणोः सर्वाश्रयत्वे प्रमाणमाह-

पतिं विश्वस्यात्मेश्वरं विश्वात्मानं परायणम् इत्यादि श्रुतेः । अनशनोक्तिस्त्वनुजीवनार्थत्वेनैव सावकाशा ।। ३ ।। अचेतनस्येक्षणादृयिः । बहुभावश्रुतिस्त्वन्यभावं विना तत्तिŽायामकतया स्वŽ पबहुत्वार्थत्वेनैव युज्यते ।। ४ ।।

।। पतिं विश्वस्येति ।। 'विश्वस्य पतिम्' सकललोकपालकत्वेन तदाधारत्वम् । 'आत्मेश्वरम्' लक्ष्म्ादिसकलचेतननियामकत्वेन तदाधारत्वम् । 'विश्वात्मानम्' 'परायणम्' इति पदयोरपि क्रमेण पूर्वोक्त एवार्थः । आदिपदेन, सर्वाश्रयत्वं विणोरन्यस्य विरु€मित्यत्र, भाव्योदाहृतं प्रमाणं सङ्गृहीतम् । पूर्वपक्षसाधकत्वेनोक्तयुक्तेः श्रौतत्वात्सावकाशत्वमाह- अनशनोक्तिस्त्विति ।। ततश्च विणोरन्यस्य, सर्वाधारप्रकृत्याधारत्वस्य विरु€त्वाद् विणुरेवाक्षरशब्दवाच्य इति भावः । (अयं च न्यायः 'अम्बरान्तधृतेः' इत्यनेन प्रस्तावसम्भावितहेतुप्रतिपादकेन प्रकृत्याधारस्य विरु€मिति सूचितो भवति ।) ।। ३ ।। 'अदृयिः' इत्युक्तन्यायं सदधिकरणसि€न्तसम्बन्धित्वेनापि विवृणोति - अचेतनस्येति ।। 'सदेव' इत्यादिसच्छब्दवाच्यो विणुरेव । 'तदैक्षत' इतीक्षतिश्रवणात् । नच तदचेतनप्रकृतौ सम्भवति । अचेतनस्येक्षणादृयेरित्यर्थः । (व्याप्तिमात्रस्यासाधकत्वात्प्रधानस्याचेतनत्वादिति हेतुवाक्यं चोपस्कर्तव्यम्) पूर्वपक्षयुक्तेः श्रौतत्वात्सावकाशत्वमाह- बहुभावेति ।। 'अन्यभावम्' परिणामम् । 'बहुत्वार्थत्वेनैव' इत्येवकारेण चेतनस्य विकारासम्भवम्, सि€न्तयुक्तेर्निरवकाशत्वं चाभिप्रैति । एवंच जडत्वेन प्रधानस्येक्षणा(सम्भवात्)दृयेः, विणौ च तदृयेः, (तत्सम्भवात्) विणुरेव सच्छब्दवाच्य इत्यर्थः । (अयं च न्यायः ईक्षतिकर्मव्यपदेशात्सः' इत्यनेनैवाचेतनस्येक्षणादृयिरित्युक्तो भवति ।) ।। ४ ।। 'अन्वयाभावः' इत्युक्तन्यायं दहराधिकरणसि€न्तसम्बन्धित्वेन विवृणोति -

आकाशपक्ष एवान्वयाभावः । विणुपक्षे तु योऽन्वेयव्यो भगवान् तस्यान्तर्हृदये यावान्वायमाकाशस्तावानाकाशः तस्मिन्द्यावापृथिवी अन्तरेव समाहिते, स भगवानपहतपाप्मेत्यन्वयः ।। ५ ।।

।। आकाशपक्ष एवेति ।।'दहराकाशस्थमुपास्यम्' इत्युक्ते, 'किं तदत्र विद्यते' इति प्रश्ने, 'यावान्वा' इत्यस्यान्वयादर्शनात् । नहि दहराकाशस्थो व्याप्ताकाशोऽन्वेयव्य इत्युपपद्यते, तदभावादयोगाच्च । नच दहराकाशमेव विशिय, 'उभे अस्मिन्' इत्यादिपरिहार इति युक्तम्, दहरस्याव्याप्तत्वेन विशेाणायोगात् । पृथिव्यादीनां मुख्यतोऽनुपास्यत्वाच्चेति भावः । एवकारव्यवच्छेद्यमाह- विणुपक्ष इति ।। 'तस्मिन्यदन्तः' इत्यत्र हृत्पद्मस्थाकाशगतं

ब्रह्मान्वेयव्यमित्युच्यते । 'ब्रह्मपुरः' पदेनैव ब्रह्मस्थितिसिद्धेः । नचैवं 'किं तदत्र' इति प्रश्नानुपपत्तिः । तस्य, 'कीदृशं तत्' इति धर्मविायत्वेन स्वरूपविायकत्वाभावादिति प्रश्नवाक्याभिप्रायं सिद्धवत्कृत्य 'अन्वेयव्यः' इत्यनूद्य वाक्यान्वयः प्रदर्शितः । तस्य, भगवतः । तावानाकाशः, विद्यत इति शेषः । तस्मिन्, आकाशे, विष्णौ वा । उपलक्षणं चैतत् । 'नास्य जरयैतज्जीर्यते, न वधेनास्य हन्यते' इति वाक्योक्तधर्मान्तरयुक्तश्चेत्यपि ग्राह्यम् । तथाच आकाशपक्ष एवान्वयाभावात्, विष्णुपक्षे चान्वयभावाद्, विष्णुरेव हृत्पद्मस्थ इत्यर्थः । (अयं च न्यायः 'प्रसिद्धेश्च' इत्यनेन विष्णोरेव दहराकाशस्थत्वं प्रसिद्धं नाकाशस्येति वदता सूचितो भवति । तदुक्तं तत्वप्रकाशिकायाम्- 'नहि दहराकाशस्थो व्याप्ताकाशोऽन्वेयव्य इति युज्यते, तदभावात्' इति । अत एवैतत्सूत्रव्याख्यानावसरे न्यायसम्बन्धः प्रदर्शितः ।) ।। ५ ।। 'विपरीतश्रुतिभ्रमः' इत्युक्तन्यायं 'अनुकृतेस्तस्य च' इत्यधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति -

यज्ञानाच्छाश्वतं सुखं स भगवान्यद्ब्रह्मानिर्देश्यं सुखमिति वदन्ति तदेतत्सुखरूपमिति मन्यन्ते । अतः पूर्ववादविपरीतैव श्रुतिः । पूर्ववादोक्तयोजना तु भ्रम एव ।। ६ ।।

।। यज्ञानाच्छाश्वतं सुखमित्यादिना ।। 'तदेतदिति मन्यन्ते' इति वाक्यस्य ज्ञानिसुखपरत्वे, 'तेाां सुखम्' इति ज्ञानिसुखस्य

प्रकृतत्वात्प्रकृतपरामर्शत्वम् । विष्णुपरत्वे तु, तस्याप्रकृतत्वादप्रकृतपरामर्शः स्यादिति शङ्कानिरासार्थं विष्णोः प्रकृतत्वमुपपादयितुं 'यज्ञानाच्छाश्वतं सुखं स भगवान्' इत्युक्तम् । 'तमात्मस्थम्' इत्युपनिाद्वाक्ये, तच्छब्देन, 'नित्यो नित्यानां चेतनश्चेतनानाम्' इति प्रकृतविष्णोः परामर्श इति भावः । ननु, परमात्मनः प्रकृतत्वेऽपि नपुंसकसुखशब्देनाप्रकृतत्वज्ञानिसुखस्य च तादृशसुखशब्देन प्रकृतत्वात्तस्यैव परामर्शो युक्त इत्यतः, तद्वाक्यं योजयति- यद्ब्रह्मेति ।। तदेतत्स्वरूपमिति ।। तद्, अनिर्देश्यं सुखम्, एतस्य, प्रकृतस्य भगवतः स्वरूपमित्यर्थः । न चैवमभ्युपगमे कारणाभावः । 'तमेव भान्तम्' इत्याद्युक्तहेतूनामनुपपत्तेरिति भावः । कथमनेन न्यायो विवृत इत्यत आह- अत इति ।। अत उक्तप्रकारेण विष्णुविायत्वात् 'तदेतदिति मन्यन्ते' इति श्रुतिः पूर्वपक्षबाधकरूपैवेत्यर्थः । पूर्ववादिनापि नपुंसकलिङ्गस्वारस्यादेरुक्तत्वात्कथमेतदित्यत आह- पूर्ववादोक्तेति ।। भ्रमो, भ्रममूलिकेत्यर्थः । नन्वेवं सति विपरीतश्रुतेरेव सिद्धान्तयुक्तित्वादनुव्याख्याने भ्रमपदं किमर्थमित्यतो वाऽह - पूर्ववादेति ।। 'इति सूचनाय भ्रमपदप्रयोगः' इति वाक्यशेषः । (अयं न्यायोऽनेनैव सूत्रेणानन्यथासिद्धेहेतुद्वयेन पूर्ववादविपरीतैव श्रुतिरिति सूचितो भवति ।) ।। ६ ।। 'लिङ्गावकाशराहित्यभ्रमः' इत्युक्तन्यायं वामनाधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति-

लिङ्गानां परमात्मन्यवकाशो विद्यत एवेति तद्राहित्यं भ्रम एव । वामनश्रुतेरेवानवकाश इति ईशानशब्दोक्तो विष्णुरेव ।। ७ ।।

।। लिङ्गानामिति ।। लिङ्गानां, प्राणव्यवस्थापकत्वादीनाम् । विद्यत एवेत्यवधारणं तु, 'शब्दादेव' इति सूत्रानुसारेण; साधकप्राबल्यानुरोधित्वात्साध्यावधारणस्य । ननु, भ्रमत्वे हेतुरनेनोच्यते, नतु न्यायविवरणमित्यत आह- इतीति ।। भ्रमो, भ्रमविायः । सौत्रप्रमितपदाभिप्रायं वदंस्तत्फलमप्याह - वामनेति ।। अनवकाशः, विष्णोरन्यत्रेति शेषः । (यद्वा, 'परमात्मन्यवकाशो विद्यत एव' इत्यत्र, 'परमात्मन्येव' इति एवकारसम्बन्धः । 'लिङ्गानाम्' इत्यनेनैव वाक्येन लिङ्गानां, प्राणव्यवस्थापकत्वादिलिङ्गानां विष्णोरन्यत्रावकाशराहित्यमिति न्यायो विवृतः । तदुक्तं भाये- 'तच्च लिङ्गं विष्णोरेव' इति । ननु, पूर्वपक्षिणा विष्णाववकाशराहित्यस्यैवोक्तत्वात्कथमित्यत आह- तद्राहित्यमिति ।। लिङ्गानां परमात्ममात्रनिष्ठत्वे हेतुमाह- वामनश्रुतेरिति ।।) सिद्धान्तफलकथनं तु मूल एव सयम् । (अयं च न्यायो लिङ्गानां प्रमितपदेन सावकाशत्वोक्तया, न लिङ्गानि सावकाशानीति सूचितः ।) ।। ७ ।। 'तादृग्द्वयम्' इत्युक्तन्यायं वज्राधिकरणसिद्धान्तसम्ब

ान्धित्वेनापि विवृणोति -

वज्रशब्दस्योद्यतत्वस्य च विणावेवावकाश: । उद्यमित्वमेवोद्यतत्वमिति ।। १० ।।

।। वज्रशब्दस्येति ।। अत्र वज्रशब्दोद्यतत्वयो: तादृक्तवं नाम वामनश्रुतेरिव विणोरन्यत्रानवकाशलक्षणं ज्ञातव्यम् । अत एव 'विणावेव' इत्युक्तम् । अन्यथा सकलजगज्ज्ञेयकत्वविरोधादिति भाव: । नन्वस्तु 'वर्जनाद्वज्रमुच्यते' इति वाक्यबलाद्वज्रशब्दस्य विणुपरत्वम् । उद्यतत्वलिङ्गस्य कथमित्यत आह- उद्यमित्वमेवेति ।। एवकारेणोŽामनादिकं व्यवच्छिनत्ति । हेतुस्तूक्त एव । एवंच निरवकाशत्वŽ पतादृक्तवोपेतवज्रशब्दोद्यतत्वलिङ्गŽ पद्वयाद् वज्रशब्दवाच्यो विणुरेवेति भाव: । (अयं च न्याय:, 'कम्पनाद्' इत्यनेन निरवकाशलोकचेयकत्वोक्तया, तत्सहश्रुतवज्रशब्दोद्यतत्वलिङ्गयो: निरवकाशत्वसूचनेन सूचितो भवति । अत्र सूत्रस्य, श्रुतिलिङ्गयो: सावकाशत्वप्रतिपादनेऽपि व्यापारोऽस्तीति दर्शयितुं भाये 'एजतीति कम्पनवचनादुद्यतवज्रो भगवान्' इत्युक्तम् । अन्यथा 'वज्र:' इत्येवावक्ष्यत् । सूत्रे च वज्रशब्दसमन्वयात्, श्रुतिलिङ्गयो: सावकाशत्वस्यापि प्रतिपादनात्, समन्वेतव्यशब्दानुक्ति: ।) ।। १० ।। 'बहुतादृक्तवम्' इत्युक्तन्यायं ज्योतिरधिकरणसिЄान्तसम्बन्धित्वेनापि विवृणोति -

अयं पुरा: इति संसारी । आत्मशब्दोदित एव विणु: । अत आदित्यादिज्योतिष्ट्वं संसारिण एव । आदित्येनैवेत्यवधारणं बाह्यज्योतिाु प्राधान्यापेक्षयेत्यादि ।

।। अयं पुरा इत्यादिना ।। 'हृद्यन्तर्ज्योति:' इति वाक्यस्य विणुपरत्वे, 'आदित्यादिज्योति: सम्राड्' इति वाक्योक्तादित्यादिज्योतिष्ट्वं न बाधकमिति वक्तुमाह- अयं पुरा इति ।। 'किं ज्योतिरयं पुरा:' इत्युक्त:, संसारीत्यर्थ: । 'न तद्भासयते सूर्य:' इत्यादिवचनान्मुक्तस्याप्यादित्यज्योतिष्ट्वायोगात् संसारीत्युक्तम् । नन्वस्यैव संसारिणो वागादि(ज्योतिाां)शान्तौ सत्यां, 'आत्मैवास्य ज्योति:' इति स्वयंशब्दपर्यायात्मशब्देन स्वयं ज्योतिष्ट्वोक्तौ, 'कतम आत्मा' इति तदात्मप्रश्ने, 'योऽयं विज्ञानमय:' इति वाक्यस्य प्रवृत्तत्वेन तस्य विणुपरत्वं कथमित्यत आह- आत्मशब्दोदित इति ।। 'आत्मैवास्य ज्योति:' इति वाक्यस्थात्मशब्दोदितो विणुरेवेत्यर्थ: । 'अयं पुरा:' इति संसारीत्युक्तस्य फलमाह- अत

इति ।। यत:, 'अयं पुरा:' इति संसारी, अतस्तत्रोक्तमादित्यादिज्योतिष्ट्वं तस्यैवेत्यर्थ: । नन्वात्मशब्दस्य विणुपरत्वे, तस्यास्तमयादिशून्यत्वेन तज्ज्योतिष्ट्वस्य सर्वदा जीवे सत्त्वात् 'आदित्येनैव' इति 'चन्द्रमसैव' इत्यवधारणानुपपत्तिरित्यत आह- आदित्येनैवेति ।। आदिपदेन, परमात्मनोऽस्तमयादिशून्यत्वेन जागरादावपि सद्भावात् 'आत्मैवास्य ज्योति:' इत्युक्तार्थप्रत्यभिज्ञानात्तत्र च स्वयंशब्दस्य, जीववाचकत्वात् आत्मशब्दस्य विणुवाचकत्वे, शङ्क्यमानप्रत्यभिज्ञाविरोधस्य 'अत्रायं भगवान्विणु:' इति बृहदारण्यकभायोक्तपरिहारश्च गृह्यते । एतदेवाभिप्रेत्योक्तं तत्वप्रकाशिकायां- 'नच विशियोक्तिविरोध:' इति । यद्वा, आदिपदेन 'इमं लोकमतिक्रामति' इत्यादे: 'कृत्वा विवाहन्तु कुरुप्रवीरा:' इत्यादिवदन्तर्णीतणिच्त्वेनोपपत्तिरिति बृहदारण्यक भायोक्तसावकाशत्वं गृह्यते । ननु तथापि कर्ममरणादिरहितस्य विणो: कर्मनिबन्धनोभयलोकसञ्चरणमृत्युŽ पदर्शनादि कथमित्यत आह-

लोकसञ्चरणं तु जीवमादाय तस्यैवादु:खेन स्वातन्त्र्ात् ।। ११ ।।

।। लोकसञ्चरणं त्विति ।। 'स समान: सन्' इति समानशब्दाभिप्रायमाह- अदु:खेनैवेति ।। एतच्च जीवे न सम्भवतीति तस्यैवेत्युक्तम् । समानत्वे प्रमाणान्तरप्रमितहेतुमाह- स्वातन्त्र्ादिति ।। नन्वादित्यादिज्योतिष्ट्वस्य जीवनिष्ठत्वं, (मृत्युŽ पदर्शनादेविर्णो सावकाशत्वमात्रम्) लोकसञ्चरणस्य विणुमात्रनिष्ठत्वमित्यनेकप्रकारत्वेन बहूनां तादृक्तवाभाव इति चेŽा, प्रसिЄत्वेन 'कतम आत्मा' इति प्रश्नायोग:, स्वाप्नपदार्थकर्तृत्वं, 'स्वप्नेन शारीरम्' इति मन्त्रासङ्गतिरित्येतै: सहितस्य लोकसञ्चरणस्य सिЄान्तसाधकत्वाङ्गीकारात्तादृशानां बहुत्वसम्भवात् । अत एव बृहदारण्यकभाये 'कतम

आत्मा' इति प्रश्न्नानुपपत्त्यादित्वेनैाां जीवपक्ष एव बाधकत्वोक्ति: । एतदेवाभिप्रेत्योक्तं तत्त्वप्रकाशिकायां - 'जीवपक्षे बहुबाधकसद्भावाद्' इति । ततश्च बहूनां लोकसञ्चरणादीनां तादृक्तवाद्विणोरन्यत्र निरवकाशत्वाद् विणुरेव ज्योति:शब्दवाच्य इत्यर्थ: । (अयं च न्यायो 'दर्शनाद्' इत्यनेनोपलक्षणत्वेन सूचितो भवति ।) ।। ११ ।। 'उक्तस्य विरोध:' इत्युक्तन्यायमाकाशाधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृण्वन्पूर्वपक्षन्यायस्य सावकाशत्वं तावदाह-

वै नामेति निर्वहितृत्वे श्रुत्यादिप्रसिद्धबाहुल्यम् । प्रसिद्धाकाशस्योक्तमनामत्व पत्वं विरुद्धम् ।। १२ ।। सुप्युत्क्रान्त्योर्जीवेश्वरयोर्भेदोक्तेरसङ्गत्वादि चेश्वरस्यैवेत्यर्थाद्भेद एव भवति । जीवस्य तदयुक्तेरीशे सावकाशत्वाच्च ।। १३ ।। ।। वैनामेति ।। वैनामेति निपातद्वयं भगवतो नामत्व पनिर्वहितृत्वे, लोकप्रसिद्धभावेऽपि 'एको दाधार भुवनानि विश्व' इत्यादि श्रुतिप्रसिद्धबाहुल्यं दर्शयतीत्यर्थ: । अनेन, श्रुतौ वैनामेति निपातद्वयस्य 'नामत्व पयोर्निर्वहित' इत्युत्तरेणान्वय:, विधेयाथर्प्रसिद्ध्यद्योतकत्वात्त्वपातस्य, पूर्वपक्षे तदयोगादित्युक्तं भवति । लौकिकोद्देश्यप्रसिद्धपरित्यागेन वैदिकविधेयप्रसिद्धयङ्गीकारे को हेतुरित्यतो न्यायं विवृणोति- अनेन निपातद्वयस्योद्देशस्य लौकिकोद्देश्यप्रसिद्ध्यद्योतकत्वमभ्युपेत्यापि प्रसिद्धाकाशग्रहणे, 'ते तदन्तर:' इत्युक्तानामत्व पत्वस्य विरोध इति न्यायविवरणं कृतं भवति । उपलक्षणं चैतत् । 'तद्ब्रह्म' इत्युक्तब्रह्मशब्दविरोधश्चेत्यपि ज्ञातव्यम् । प्रसिद्धपदं न केवलं विणुव्यावृत्त्यर्थम् । किन्तु, उक्ताभ्युपगमसूचनाथर्म् । एवंच प्रसिद्धाकाशस्य नामत्व पत्वेनोक्तस्यानामत्व पत्वस्य विरोधाद्विणुपक्षे च तदभावाद्विणुरेवाकाशपदवाच्य इत्यर्थ: । (अयं च न्याय:, 'अर्थान्तरत्वव्यपदेशात्' इत्यनेन श्रुत्युक्तस्य नामत्व पत्वस्य विरोध इति सूचनेन सूचित: ।) ।। १२ ।। 'अर्थात्तथागति:' इत्युक्तन्यायं सुप्युत्क्रान्त्योरधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति- सुप्युत्क्रान्त्योरिति ।। भेद एवाभेदो नेत्यर्थ: । यदुक्तमर्थात्स्वप्नादिद्रयृत्वासङ्गत्वयो: सामानाधिकरण्यान्यथानुपपत्त्या जीवेश्वरयोरभेद इति, तत्त्व ।। सुप्युत्क्रान्तिप्रकरणयो: 'प्राज्ञेनात्मना सम्परिवक्त:, प्राज्ञेनात्मनात्व ढ:' इति जीवेश्वरयोर्भेदोक्तेरसङ्गत्वमादिपदोक्तं स्वप्नादिद्रयृत्वं चेश्वरस्यैव भवतीति तदुभयसामानाधिकरण्यान्यथानुपपत्त्यभावाच्च जीवेश्वरयोरभेदस्यैवाभावादित्यर्थ: । अनेन, अर्थात्तथा, भेदेनैव नत्वभेदेन गतिरवगतिरिति न्यायो विवृतो भवति । असङ्गत्वमीश्वरस्यैवेत्युक्तमुपपादयति- जीवस्येति ।। ननु, स्वप्नादिद्रयृत्वं जीवस्यैव प्रसिद्धम्, इति कथमीश्वरस्यैवेत्युक्तमित्यत आह- ईशे सावकाशत्वाच्चेति ।। ईशस्य सर्वज्ञत्वेन स्वाप्नपदार्थानां च सत्यत्वेन स्वप्नादिद्रयृत्वस्य मुख्यत: परमात्मन्येवोपपत्तेरिति भाव: । (अयं च न्यायो 'भेदेन' इत्यस्यानन्तरं 'व्यपदेशाद्' इति पूरणेन भेदोक्तयन्यथानुपपत्त्या भेद: सिद्ध इति सूचित: ।) ।। १३ ।। 'समस्तमेतद्' इत्यत्रैतच्छब्देन पूर्वाधिकरणसम्बन्ध्यर्थात्तथागतित्व पन्यायपरामर्श इत्यभिप्रेत्य तं न्यायं 'पत्यादिशब्देभ्य:' इत्यधिकरणसिद्धान्तसम्बन्धित्वेनापि विवृणोति-

ब्रह्मणा वेदेन गम्यत इति ब्राह्मणशब्दो विणावेव युज्यत इत्यर्थादजशब्दोऽपि तस्मित्वव ।।

ब्रह्मणेति ।। सङ्कोचे कारणाभावेन 'ब्रह्माण'इति भवितव्ये 'ब्राह्मण:' इत्याधिक्यार्थकस्वरव्यत्ययेन च मुख्यतया सर्ववेदवेद्यत्वं 'ए नित्य:' इति श्रुतिगतब्राह्मणशब्दप्रवृत्तिनिमित्तमित्यभिप्रेत्य 'ब्राह्मणशब्दप्रवृत्तिनिमित्तमित्यभिप्रेत्य 'ब्राह्मणशब्दो विणौ' एवेत्युक्तम् । तथाच तत्समभिव्याहाराद् 'अज:'शब्दोऽपि केनापि प्रकारेण 'न जायते' इति व्युत्पत्त्या प्रयुक्त इत्यभिप्रेत्याह- तस्मित्वेवेति ।। नन्वजशब्दस्योक्तव्युत्पत्तिकत्वे, स्वत एव विणुपरत्वसम्भवेन तस्योक्तयौगिकार्थब्राह्मणशब्दसमभिव्याहारान्यथानुपपत्त्या विणुपरत्वं कुत इति चेत्त्व ।। 'अयं ब्राह्मणो विरिञ्च एव, तस्मित्वजशब्दश्रवणात् । नच तस्य विणाववकाश:, ब्राह्मणशब्दसमभिव्याहृतस्य चतुर्मुखपरत्वोपपत्ते:' इति पूर्वपक्षिणा ब्राह्मणशब्दस्य त्व ढिमभिप्रेत्याजशब्दस्य चतुर्मुखपरत्वसाधकताङ्गीकारात् । ततश्च पूर्ववाद्युक्तन्यायेनैव ब्राह्मणशब्दस्योक्तयोगेन विणुमात्रपरत्वे, तत्समभिव्याहारादजशब्दस्यापि तत्परत्वमित्यभिप्रायात् । अत एव तत्वप्रकाशिकायां, एतदनुरोधेनैव पूर्वपक्ष: कृत: । ननु, ब्राह्मणशब्दस्यैवय त्व ढिपरित्यागेन यौगिकत्वाङ्गीकारे को हेतु:, येनाजशब्द

दस्याप्युक्तयौगिकताङ्गीकार इति चेŽा । एतद्वाक्योक्तब्राह्मणस्य विरिञ्चत्वे, पापालेपादिलिङ्गविरोधात्, पत्यादिशब्दविरोधाच्च । ननु, विणुविरिञ्चयोरभेदाभिप्रायेण तल्लिङ्गं, स शब्दश्च चतुर्मुखे सावकाशावित्यतस्तमेव न्यायं प्रकारान्तरेण विवृणोति-

चतुर्मुखस्य कर्मफलाभावायुक्तेस्तयोर्भेदोऽर्थादापद्यते । उक्तविरोधश्च तत्रैव ।

।। चतुर्मुखस्येति ।। न विणुविरिञ्चयोरभेदः, मानाभावात् । नच ब्राह्मणाजशब्दपापालेपादिलिङ्गसामानाधिकरण्यबलात्तत्सिद्धिः । ब्राह्मणाजशब्दयोरुक्तरीत्या सावकाशत्वात् । 'स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिञ्चतामेति ततः परं हि माम् ।' इति वचनात् विरिञ्चस्य कर्मफलाभावायुक्तेर्नित्यमुक्तेन परमात्मना भेदस्यैवोपपŽात्वादिति भावः । ननु, ब्राह्मणाजशब्दयोर्विणौ सावकाशत्वमेव कुतः, ž ढ्यपेक्षया योगस्य दुर्बलत्वात् । तथाच तदुभयसामानाधिकरण्यबलाद भेदसिद्धेः स्यादेवेत्यत आह- उक्तविरोधश्चेति ।। चो यस्मादित्यर्थे । यस्मात् ब्राह्मणाजशब्दयोः ž ढ्या चतुर्मुखपरत्वाङ्गीकारे, 'सर्वस्य वशी' 'सर्वस्येशानः' 'सर्वस्याधिपतिः' इत्युक्तं विरुध्येत भवत्यत उक्तयोगेन तयोर्विणुपरत्वमेवेति भावः । विणुविरिञ्चयोर्भेद एव 'विश्वो हिरण्यगर्भः' इत्यादिभेदश्रुतिबाहुल्याŽातयोरभेदो युक्त इत्याह- तत्रैवेति ।। एवं विणुविरिञ्चयोभर्ेदेन यत्सिद्धेत तदाह- तल्लिङ्गमिति ।। यस्मादुक्तप्रकारेण विणुविरिञ्चयोरभेदाभावः, तस्मात् तल्लिङ्गं, पापाद्यलेपनित्यमहिमत्वादिलिङ्गं, पत्यादिशब्दश्च चतुर्मुखे विणुविरिञ्चयोरभेदेन सावकाश इति नेत्यर्थः । इत्युक्तप्रकारेण, एतत् पूर्वाधिकरणोक्तं, समस्तमत्र, नतु किञ्चिदेवेत्यर्थः । पूर्वाधिकरणवत् भेदश्रुतेः, सामानाधिकरण्यान्यथानुपपत्तिपरिहारस्य च साम्यादिति भावः । यद्वात्र समस्तशब्देन, 'बाहुल्यं लिङ्गशब्दानाम्' इत्यादयः, 'अर्थात्तथागतिः' इत्यन्ता एकादशापि न्यायाः सङ्गृहीताः । तत्रार्थात्तथागतेरव्यवहितपूर्वाधिकरणसम्बन्धित्वेनैतच्छब्देन शीघ्रोपस्थितेस्तद्विवरणं प्रथमतः कृत्वा तत्सङ्गत्या प्रतिलोमक्रमेण न्यायान्विवृण्वन् 'उक्तस्य विरोधः' इत्युक्तन्यायं तावद्विवृणोति - उक्तेति ।। चशब्दः समुच्चये । तत्रैव, ब्राह्मणशब्दस्य चतुर्मुखपरत्व एव । उक्तस्य, पत्यादिशब्दस्य विरोध इत्यर्थः । अत एव तत्वप्रकाशिकायां - 'अन्यथा पत्यादिशब्दविरोधात्' इत्युक्तम् । ब्राह्मणस्येत्यस्य, नित्यमहिमतवादिलिङ्गस्य च विरोध इति पूर्वपक्ष्युक्तं तु, ब्राह्मणशब्दव्याख्यानेनैव निरस्तम् । एवमुत्तरत्रापि ज्ञातव्यम् । ननु, विशियस्य कर्मफलाभावात्पत्यादिशब्दयोगेऽपि चतुमर्ुखस्येश्वरस्वž पत्वात्स्वž पापेक्षया तदुभयोपपत्तिरित्यत आह-

भेदश्रुतिबाहुल्यात् । तल्लिङ्गं स शब्दश्च चतुर्मुखेऽनवकाश इति समस्तमेतत् ।। १४ ।।

।। इति श्रीमŽायविवरणे प्रथमाध्यायस्य तृतीयः पादः ।।

।। भेदश्रुतीति ।। 'तत एते व्यजायन्त' 'विश्वो हिरण्यगर्भः' इत्यादिभेदश्रुतिबाहुल्यादित्यर्थः । यद्वा, 'बहुतादृक्तवम्' इत्युक्तन्यायं विवृणोति- भेदश्रुतीति ।। 'विश्वो हिरण्यगर्भः' इत्यादिबहुश्रुतीनां विशिय विणुविरिञ्चयोर्भेदप्रतिपादकत्वेन निरवकाशत्वž पं तादृक्तवं द्रयव्यम् । 'तादृग्द्वयम्' इत्युक्तन्यायं विवृणोति- तल्लिङ्गमिति ।। पापालेपत्वलिङ्गं पत्या(ब्राह्मणा)दिशब्दश्च । तादृक्त्वप्रदर्शनार्थमुक्तम् - चतुर्मुखेऽनवकाश इति ।। यद्वा 'लिङ्गावकाशराहित्यम्' इत्युक्तं विवृणोति- तल्लिङ्गमिति ।। उक्तरीत्या धर्मसाध्यपदप्राप्तिमति चतुर्मुखे नित्यमहिमत्वादिलिङ्गजातं निरवकाशमित्यर्थः । तथाच चतुर्मुखस्य परमात्मनाभेदं विना पापालेपत्वलिङ्गस्यावकाशराहित्यभ्रमेण पूर्वपक्षप्रवृत्तिरित्युक्तं भवति । तथा 'विपरीतश्रुतिः' इत्युक्तन्यायं विवृणोति- स शब्दश्चेति ।। सर्ववेदमुख्यार्थत्वनिमित्तकब्राह्मणशब्दः,

सर्वथाजन्मराहित्यनिमिवकाजशब्दश्च, चतुर्मुखेऽनवकाश इति पूर्वपक्षविपरीतैव श्रुतिः । प्रथमवर्णप्रतिपादको ब्राह्मणशब्दो, विणुजातत्वनिमित्तश्चाजशब्द इति भ्रमेण पूर्वपक्षप्रवृत्तेरिति भावः । 'अन्वयाभावः' इत्युक्तन्यायं विवृण्वन्

तत्साध्यमप्याह- चतुर्मुखस्येति ।। कर्मसाध्यज्ञानान्दादिवृ€मत: चतुमर्ुखस्य कर्मफलाभावायुक्तेरन्वयाभावात्, विणोश्च कर्मफलाभावात्तयोर्भेद एव बलादापद्यत इत्यर्थ: । यद्वा, 'अदृयि:' इत्युक्तन्यायं पूर्ववद्विवृणोति- चतुर्मुखस्येति ।। विरु€धर्माधिकरणयोरभेदस्य काप्यदृयेरुक्तरीत्या विरु€धर्माधिकरणयोस्तयोर्विणुविरिञ्चयोर्भेद एवार्थाद्बलादापद्यत इतयर्थ: । 'विरु€ता' इत्युक्तन्यायं विवृणोति- उक्तविरोध इति ।। चशब्दो न्यायान्तरसमुच्चये । तत्रैव, तयोरभेद एव श्रुत्युक्तविरोध इत्यर्थ: । कथमित्यत आह- भेदेति ।। अथवा 'अनुक्ति:' इत्युक्तन्यायं विवृणोति- उक्तेति ।। उक्तिरुक्तम् । भावोक्त: । तद्विरोधोऽनुक्तिरेवेति यावत् । तत्र, तयोरभेदे । वियसप्तमीयम् । ननु, 'स्थित्यादये हरिविरिञ्चिहरेतिसञ्ज्ञा:' इत्यादिना तयोरभेदस्योक्तत्वात्कथमनुक्तिरित्यत आह- भेदेति ।। एवेत्यनुवर्तते । भेदश्रुतेरेव बाहुल्यात्तद्विरोधेन क्वचित्तदुक्तेरन्तर्याभ्यभेदपरत्वमिति भाव: । यद्वा 'अनुक्तिश्च' इति चशब्दसमुच्चितयुक्तिमाह- भेदेति ।। न केलवमभेदानुक्ति:, किन्तु भेदोक्तिश्चेति भाव: । यद्वा 'बाहुल्यं लिङ्गशब्दानाम्' इत्युक्तन्यायं विवृणोति- तल्लिङ्गमिति ।। नित्यमहिमत्वादिलिङ्गजातं, पत्यादिशब्दसमूहश्च चतुर्मुखेऽनवकाश इत्यर्थ: । अनवकाश इति प्राबल्यकथनम् । इत्यनेन प्रकारेण, तत् प्रागुक्तन्यायजातं, समस्तमत्र नतु किञ्चिदेवेत्यर्थ: । सर्वमेतत्सूचितं सूत्रे, 'शब्देभ्य:' इति आद्यथर्कबहुवचनेन । (एते सर्वेऽपि न्याया: सूत्रेणैव वचनवृत्त्युपलक्षणाभ्यां दर्शिता: । अत एव सुधायां, 'दृश्यन्ते ताश्च सर्वश:' इत्यनुव्याख्यानं, 'सूत्रसूचिताऽयायानभिधाय' इति व्याख्यातम् । एवमुत्तरत्रापि 'स्वयं भगवतोदिता:' इत्यादौ द्रयव्यम्) ।। १४ ।।

।। इति श्रीमऽयायविवरणभावबोधे प्रथमाध्यायस्य तृतीय: पाद: ।।

अन्यत्रैव प्रसि€व्यक्तादिशब्दसमन्वयार्थं चतुर्थ: पाद: प्रवृत्त: । एतत्पादीयाधिकरणपूर्वपक्षसि€न्तन्याया: सङ्ग्रहेण अनुव्याख्यायामुक्ता: सर्वमानविरोधश्च व्युत्पत्तेरप्यशक्यता । परसरविरोधश्च विरोध: कार्यतद्वतो: । स्त्रीलिङ्गत्वं निधश्च युक्तय: पूर्वपक्षगा: । दोात्यसृयिनियम: शब्दार्थानेकता तथा । बहुऽ पत्वमीशस्य व्यक्ताव्यक्तिविशेाता ।। उत्पादनं स्वदेहाच्च दुर्जनाव्यक्ताता तथा । इत्याद्या युक्तय: साक्षात्सि€न्तस्थापका इह' इति । ॐआनुमानिकमप्येकेाामिति चेऽा, शरीरऽ पकविन्यस्तगृहीतेर्दर्शयति च ॐ इत्यत्र, 'अव्यक्तात्पुरुा: पर:' इति वाक्यगताव्यक्तादिशब्दवाच्यं किं प्रधानादि, उत विणुरिति अवरत्वादिलिङ्गापादितान्यत्रप्रसि€समन्वयसूत्राभ्यां सन्देहे, प्रधानाद्येवेति पूर्व: पक्ष:, विणुरेवेति सि€न्त: । तत्र, 'सर्वमानविरोधश्च' इति, 'दोात्यसृयिनियम:' इत्युक्तपूर्वपक्षसि€न्तन्यायौ बाध्यबाधकभावं दर्शयन् विवृणोति -

अवरत्वादिधर्मनियन्तृत्वं तत्तादात्म्यवत्त्वं चेति द्विविधं ह्यवरत्वादि । निरनिष्ठो निरवद्य इत्यादि श्रुतेस्तत्तद्दोातादात्म्यसृियनियमात् विणो: नामानि सर्वाणि यमाविशन्तीति श्रुतिबलाच्च नियन्तृत्वमवरत्वादिकमित्यापतति ।।

।। अवरत्वादीत्यादिना ।। सि€न्तयुक्तिं सङ्गमयितुं तदुपयुक्तं तावदाह- अवरत्वादिधर्मनियन्तृत्वमिति ।। (तत्तादात्म्यमित्यत्र तच्छब्देनावरादिवस्तुपरामर्श: ।) अवरत्वादीत्यत: पूर्वं 'परगता' इति शेा: । अवरत्वादिअवरत्वादिशब्दप्रवृत्तिनिमित्तमित्यर्थ: । हिशब्द: तस्य, 'यदधीना गुणा यस्य तद्गुणी सोऽभिधीयते' इत्यादिप्रमाणप्रसि€द्योतक: । ननु, अस्त्वेवमवरादिशब्दप्रवृत्तिनिमित्तद्वैविध्यम्; तत: किमित्यतो 'नेश्वरस्यावरत्वादिधर्माधिकरणत्वेनावरादिशब्दवाच्यत्वम् ; येन सर्वमानविरोध: स्यात्; किन्तु परगतावरत्वादिधर्मनियन्तृत्वेनैव' इति विवक्षुरवरत्वादिधर्माधिकरणत्वेनावरादिशब्दवाच्यत्वाभावे हेतुत्वेन सप्रमाणकं सि€न्तन्यायं विवृणोति- निरनिष्ठ इति ।। ननु दोात्यसृष्टिनियमस्य, अवरादिशब्दवाच्यत्वाभावेनाप्युपपत्तेरवरत्वादिनियन्तृत्वेन तच्छब्दवाच्यत्वापादकत्वं कथमित्यत उक्तम् - नामानीति ।। ननु, तथापि न परगतावरत्वादिनियन्तृत्वेनावरादिशब्दवाच्यत्वं विणो: 'निरनिष्ठ:' इत्यादिश्रुतेरर्थसङ्कोचेनावरत्वाद्यधिकरणत्वेनावरादिशब

दवाच्यत्वस्य वा, 'नामानि सर्वाणि' इति श्रुतेरर्थसङ्कोचेनावरादिशब्दवाच्यत्वस्यैव वा सम्भवात् इत्यत आह-

श्रुतिद्वयस्यापि निरवकाशत्वात् । मृत्युशब्दादिु प्रसि€श्-च । प्रसि€त्वात्कर्तृव्युत्पत्तेः । तमेव मृत्युममृतं, तात दैवं

सर्वात्मना वै हि परं परायणमित्यादेश्-च । उपचारकल्पनायाश्-च क्लिृयत्वात् ।

।। श्रुतिद्वयस्येति ।। ननु, भवेदेतत्प्रधानादिगतशब्दप्रवृत्तिनिमित्तप्रेरकत्वेनेश्-वरस्यावरादिशब्दवाच्यत्वम्, यद्यन्यगतप्रवृत्तिनिमित्तप्रेरकोऽसौ शब्दो वर्तत इति सि€येत् ; तदेव कुतः इत्यत आह- मृत्युशब्दादिविति ।। 'अन्यगतमारकत्वादिनियामकत्वेन यमादिवाचकत्वस्य' इति शेाः । एवं तर्ह्यन्यगतप्रवृत्तिनिमित्तप्रेरके वृत्तिरमुख्या स्यादित्यतो वाह- मृत्युशब्दादिविति ।। मृत्युशब्दस्य, यमादिवाचकत्वस्य, प्रसि€ः बहुलप्रयोगसि€त्वात्, बहुलप्रयोगसि€स्य च मुख्यत्वादित्यर्थः । न केवलमुक्तन्यायेन अवरादिशब्दवाच्यत्वं विणोः किन्तु 'स ब€ः' 'स दुःखी' 'स ब€यति' 'स दुःखयति' इत्यादिश्रुतिु ब€ादिशब्दानां विणौ कर्तृव्युत्पत्तेः प्रसि€त्वाच्चेत्याह- प्रसि€त्वादिति ।। स्मृतावपि, विणौ कर्तृव्युत्पत्ति (अन्यगतप्रवृत्तिनिमित्तनियामकत्व)मपेक्ष्य शब्दप्रयोगोऽस्तीत्याह- तमेवेति ।। मृत्युं मारकम् । अमृतं मोचकम् । नन्वत्र मृत्युप्रमुखशब्दानामौपचारिकत्वं किं नस्यादित्यत आह- उपचारेति ।। तर्हि 'सिंहो देवदत्तः' इत्यत्रापि न स्यादित्यत आह -

प्रमाणाभावाच्च । नाव्यक्तादिशब्दानां परमात्मवियत्वाङ्गीकारे सर्वमानविरोधः ।। १ ।।

।। प्रमाणाभावादिति ।। तत्र मुख्यार्थबाधानुसन्धानŽ पप्रमाणसद्भावादौपचारिकत्वमत्र तु तदभावाŽौपचारिकत्वमिति भावः । सि€ान्तन्यायफलत्वात्पूर्वपक्षन्यायनिोधस्य, इदानीं तŽिोधपूर्वं पूर्वपक्षन्यायं विवृणोति - नाव्यक्तादिशब्दानामिति ।। 'अव्यक्तात्पुरुाः परः' इत्यादिवाक्यगताव्यक्तादिशब्दानां परमात्मवाचकत्वाङ्गीकारे, पुरुागतपरत्वावधित्वादिना अवरत्वादिप्राप्त्या, 'न तत्समश्-चाभ्यधिकश्-च दृश्यते' इत्यादिसर्वमानविरोधो नेत्यर्थः । तथाच विणोरव्यक्तादिशब्दवाच्यत्वेऽवरत्वादिप्राप्तौ सर्वमानविरोधात्, प्रधानाद्येवाव्यक्तादिशब्दवाच्यमिति पूर्वपक्षे, दोाात्यसृयिनियमाद्, विणोरव्यक्तादिनियामकत्वेनाव्यक्तादिशब्दवाच्यत्वमिति सि€ान्त इति भावः । (अत्र पूर्वपक्षन्यायः 'तदधीनत्वात्' इत्यनेन,

अवरत्वादिनियामकत्वेनैवावरत्वादिशब्दजातमर्थवŽावरत्वाद्यधिकरणत्वेन, तथात्वे 'निरनिष्ठः' इत्यादि सर्वमानविरोधः इत्यर्थकेन सूचितः । यद्वा 'तदधीनत्वात्' इत्यनेनार्थवत्त्वसाधनेन श्रुतिनैरर्थ्यापादकत्वसूचनेन सूचितः । सि€ान्तन्यायः तदधीनत्वादित्येनोक्तो भवति ।) ।। १ ।। ॐ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॐ ।। अत्र 'वसन्ते वसन्ते ज्योतिाा यजेत' इतिवाक्यगतज्योतिरादिशब्दानां प्रागुक्तसंशयबीजेन भगवत्परत्वकर्मादिपरत्वकोटिकसंशये कर्मादिपरत्वमेवेति पूर्वः पक्षः । भगवत्परत्वमिति सि€ान्तः । एतत्पूर्वपक्षसि€ान्तसाधकत्वेन 'व्युत्पत्तेरप्यशक्यता' इति 'शब्दाथर्ानेकता तथा' इति न्यायौ बाध्यबाधकभावं दर्शयन्विवृणोति-

Ž ढो Ž ढियोगो महायोगो महाŽ ढियोगो Ž ढोपचारो Ž ढलक्षणोपचारो लक्षणेति शब्दवृत्तिभेदाः Ž ढिपूर्वकत्वेन महायोगवृत्त्या परमेश्-वरेऽखिलशब्दव्युत्पत्युपपत्तेः ।। २ ।।

।। Ž ढिरित्यादिना ।। शब्दार्थानामनेकत्वोपपादनार्थं वृत्तिभेदकथनम् । नारायणादिशब्दानां महाŽ ढियोगः, आनन्दमयादिशब्दानां महायोगः इति भगवति वृत्तिद्वयम् । तदितरत्र यथायथमितराः सप्त वृत्तय इति ज्ञातव्यम् । एतेाां लक्षणोदाहरणानि तत्वप्रकाशिकादौ द्रयव्यानि । ज्योतिर्वसन्तस्तोमादिशब्दानां यागकालसमूहादिु Ž ढत्वात् , शब्दान्तराणां, योगादिसद्भावेऽपि Ž ढेः प्रायिकत्वाच्च- Ž ढिपूर्वकत्वेनेत्युक्तम् । Ž ढ्यादिपूर्वकत्वेनेत्याशयः । अत एव

तत्वप्रकाशिकायां 'वृत्ती:' इति बहुवचनप्रयोगेनैतदभिप्राय उक्त: । 'व्युत्पत्त्युपपत्ति:' इति वदतैव 'तदशक्यता' इत्येतदधिकरणपूर्वपक्षसाधिकेति विवृतं भवति । (व्युत्पत्त्युपपत्तिरित्युपलक्षणम् । कर्मादिफलोपलक्षणविरोधाभावश्‍चेत्यपि द्रयव्यम् । तेन, 'अशक्यतापि' इति भिŽाक्रमेणापिशब्देन समुच्चित: कर्मक्रमादिविलोपŽ पो न्यायो विवृतो द्रयव्य: ।) ततश्‍च सर्वशब्दानां ब्रह्मपरत्वे, ज्योतियोमादिशब्दे्रु 'ज्योतिाां स्तोम:' इति विग्रहे भगवŽाामावृत्तिमात्रप्रसङ्गाद्वयुत्पत्तेरप्यशक्यत्वेन कर्मादिवाचकत्वमेव ज्योतियोमादिशब्दानामपि पूर्वपक्षे, शब्दार्थानामनेकत्वाज्ज्योतिरादिशब्दानामन्यत्र Ž ढ्यादिवृत्त्यभ्युपगमेन महायोगवृत्त्या परमेश्‍वरे शब्दप्रवृत्त्यभ्युपगमाज्ज्योतिाां स्तोम इत्याद्यखिलशब्दव्युत्पत्त्युपपत्ते:, ब्रह्मैव ज्योतियोमादिशब्दवाच्यमिति सि€ान्त इति भाव: । (अत्र पूर्वपक्षन्याय: 'कल्पनोपदेशात्' इत्यत्र सूत्रेऽविरोध इत्यनेन सूचित: । सि€ान्ते व्युत्पत्त्यविरोधं वदता पूर्वपक्षे तदशक्यतालक्षणविरोधसूचनात् । सि€ान्तन्यायस्तु 'मध्वादिवत्' इत्यनेन भागेनोक्तौ भवति, शब्दार्थानेकताया अनेनोक्तत्वात् ।) ।। २ ।। ॐ न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॐ ।। 'यस्मिन्पञ्चपञ्चजना आकाशश्‍च

तिष्ठत:' इति वाक्यगतपञ्चजनादिशब्दा: पूर्वोक्तसन्देहबीजेन विणोर्वाचका न वेति सन्देहे, विणोर्वाचका न भवन्तीति पूर्व: पक्ष: । विणोवर्ाचका इति सि€ान्त: । एतत्पूर्वपक्षसि€ान्तसाधकत्वेन 'परसरविरोधश्‍च' इति 'बहुŽ पत्वमीशस्य' इति उक्तौ न्यायौ पूवर्वदेव विवृणोति-

बहुŽ पत्वादधिकरणाधेयत्वादि तस्यैव युज्यते । व्यक्तयपेक्षया कारणत्वं च ।। ४ ।।

।। इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमŽायविवरणे प्रथमाध्यायस्य चतुर्थ: पाद: ।।

तस्यैव ईशस्यैव । इदं च 'बहुŽ पत्वात्' इत्यत्राप्यार्काणीयम् । एवकारेण तस्यैकस्यैव, नत्वन्यसाहित्येनेति वा, अतादृशविरु€धर्मघटकबहुŽ पत्वाद्यैश्‍वर्यं नान्यस्येति वा, अभिप्रैति । आधेयत्वादिकिमित्यादिपदेन, ईशत्वाधेयत्वयोरेकत्वबहुत्वयोर्ग्रहणम् । तथाच, 'एकस्मिŽाधाराधेयत्वयोरेकत्वबहुत्वयो:, ईशस्य सर्वाधारत्वादीशत्वाधेयत्वयोश्‍च परसरं विरोध:' इति पूर्वपक्षन्यायो विवृतो भवति । एवंच पञ्चजनादिशब्दानां विणुवाचकत्वे, आधाराधेयत्वादीनां, एकस्मिन् परसरविरोधाŽा विणो: पञ्चजनादिशब्दवाच्यत्वमिति पूर्वपक्षे, ईशस्य बहुŽ पत्वाद्विरोधाप्रसङ्गाद्विणोरेव पञ्चजनादिशब्दवाच्यत्वमिति सि€ान्त इति भाव: । (अत्र पूर्वपक्षन्यायो 'न सङ्ख्योपसङ्ग्रहात्' इत्यनेन सूचित: ।) ।। ३ ।। ॐ कारणत्वेन चाकाशादि्रु यथाव्यपदियोक्ते: ॐ, इत्यत्र, 'आत्मन आकाश: सम्भूत:' इति वाक्यगताकाशादिशब्दा उक्तबीजेनाकाशादिमात्रवाचका, उत विणोरपीति सन्देहे, आकाशादेरेवेति पूर्व: पक्ष:, विणोरपीति सि€ान्त: । एतत्पूर्वपक्षसि€ान्तसम्बन्धित्वेन 'विरोध: कार्य तद्वतो:' इति, 'ईशस्य व्यक्तयव्यक्तिविशेाता' इति न्यायौ पूर्ववदेव विवृणोति -

व्यक्तपेक्षया इति ।। अध्यक्तयपेक्षयेत्यपि ज्ञातव्यम् । चशब्द: कारणत्वसमुच्चयाथर्ो, 'युज्यत' इत्यस्यानुर्काणार्थश्‍च ज्ञातव्य: । 'तस्यैव' इत्यस्योभयत्रानुवृत्ति: । 'युज्यत' इत्येतदनुर्का: । एकस्यैव कार्यकारण भावानुपपत्तिरेतत्पूर्वपक्षसाधिकेति 'विरोध: कार्यतद्वतो:' इति न्यायो विवृतो भवति । तथाच आकाशवाय्वादिशब्दाादवाच्यत्वे, विणो: कारणत्वप्राप्ति: । कार्यकारणयोरेकत्वस्य विरोधात् भूताकाशाद्येवाकाशादिशब्दवाच्यमिति पूर्वपक्षे, व्यत्तयव्यक्तिविशेात्वादीश्‍वरस्य कार्यकारणभावोपपत्तेर्विणुराकाशादिशब्दवाच्य इति सि€ान्त इति भाव: । (अत्र पूर्वपक्षन्याय:, कार्यत्वे सति कारणत्वŽ पावान्तरकारणत्वार्थक 'कारणत्वेन च' इत्यनेन सूचित: । सि€ान्तन्यायस्तु, 'आकाशादि्रु' इत्यनेन, आकाशादि्रु स्थितस्य परमात्मनो व्यक्तयव्यक्तयपेक्षया कार्यकारणभावमुपपादयतोक्त: ।) ।। ४ ।। ॐ दृयान्तानुपरोधात् ॐ इत्यधिकरणपूर्वपक्षसि€ान्तसम्बन्धिनौ 'स्त्रीलिङ्गत्वम्' इति 'उत्पादनं स्वदेहाच्च' इति न्यायौ

भाय एव सयप्रतिभासत्वादत्र न विवृतौ । (अत्र पूर्वपक्षन्याय: 'साक्षाच्चोभयाम्नानात्' इति सूत्रेण हरे: स्त्रीलिङ्गशब्दवाच्यत्वमुपपादयता सूचित: । सिद्धान्तन्यायस्तु 'योनिश्च हि गीयते' इत्यनेनोक्त: ।) ॐ एतेन सर्वे व्याख्याता: ॐ इत्यत्रापि अधिकरणपूर्वपक्षसिद्धान्तसम्बन्धिनौ 'निोाश्च' इति 'दुर्जनाव्यक्तता' इति न्यायौ भाय एव सयं प्रतिपादितत्वाद्ग्रीह विवृताविति । (अत्र पूर्वपक्षन्याय: 'एतेन' इत्यनेन सूचित:, तेन निोधादीनां भगवदधीनत्वोक्ते: । सिद्धान्तन्यायस्तु 'व्याख्याता:' इत्यनेन सूचित: । निोध्यलक्षणप्रवृत्तिनिमित्ताभावेऽपि हरौ दुर्जनाव्यक्तत्वादिना शून्यादिशब्दा व्याख्याता: - इत्यर्थत्वात्तस्य ।) ।। ५-७ ।।

।। इति श्रीमद्भायविवरणभावबोधे श्रीरघूत्तमयतिकृते प्रथमाध्याय: ।।

आनन्दमयाद्युपलक्षिताशेवैदिकशब्दसमन्वयेन सिद्ध जगज्जन्मादिकारणत्वादौ प्रथमाध्यायार्थे, युक्तयादिविरोधपरिहाराथर्मयं द्वितीयोऽध्याय: प्रवृत्त: । तत्र सर्वविरोधानां युक्तिमूलकत्वाद्युक्तेरेव प्राधान्यात्तद्विरोधपरिहारार्थोऽयं प्रथम: पाद: प्रवृत्त: । एतत्पादीयाधिकरणपूर्वपक्षसिद्धान्तन्याया: सङ्ग्रहेणानुव्याख्यायामुक्ता: । 'आप्तता समताऽदृयिश्रुतिसाध्यबलोद्भवा: । सर्वानुसारो लघुता विशेाादर्शनाऽफले । इयासिद्धिश्च नियम: पूर्वपक्षेाु युक्तय: । एता एव त्वतिबला: सिद्धान्तस्य नियामका:' इति ।। ॐ स्मृत्यनवकाशदोाप्रसङ्ग इति चेद्यस्मृत्यनवकाशदोाप्रसङ्गात् ॐ, इत्यत्र मतमिवमत्या जगज्जन्मादिकर्तृत्वं विणोर्युक्तं, न वेति सन्देहे न युक्तमिति पूर्व: पक्ष:, युक्तमेवेति सिद्धान्त: । तत्र, 'आप्तता' इत्युक्तन्यायं पूर्वपक्षसिद्धान्तोभयसम्बन्धित्वेन विवृणोति-

रुद्रादीनां सकाशाद्विण्वादीनामेवाप्तत्वम् । श्रुत्यनुसारित्वात् ।। १ ।। न श्रुते: रुद्रादिस्मृतिसाम्यं किन्तु साक्षिप्रत्यक्षसाम्यमेव निरपेक्षत्वात् ।। २ ।।

।। रुद्रादीनामिति ।। अनेन रुद्रादीनामाप्तत्वं पूर्वपक्षन्याय: इति सूचितं भवति । तथाच रुद्रादीनां जगद्धितोपदेयृत्वेन सर्वज्ञत्वेन वाक्याथर्ज्ञानादिमत्त्वद्ग्र पाप्ततावत्त्वात्, तद्विरचितानां स्मृतीनां दोाभावगुणयुक्ततया प्रबलत्वेन निरवकाशत्वात्तद्विरुद्धाभिधायकश्रुतेरप्रमाण्यस्यैव प्रसङ्गाद्ग्रा तया विणोर्जगत्कारणत्वं सिद्धयतीति पूर्व: पक्ष इति भाव: । ''विण्वादीनामेव' इत्येवकारेण सिद्धान्तयुक्ते: प्राबल्यमाह- तत्र हेतुमाह- श्रुतीति ।। विण्वादिविरचितस्मृतीनामिति शेा: । अत्र श्रुत्यनुसारो नाम यथातथं तत्संवादस्तन्मूलत्वं चेति द्वयमपि ग्राह्यम् । अनेन पाशुपतादिश्रुतीनां श्रुतिविरोधेनाप्यप्रामाण्यमुक्तं भवति । तथाच वैणवस्मृतीनां परमाप्तैर्विण्वादिभि: प्रणीतत्वेन निरवकाशत्वात् पाशुपतादिस्मृतीनां तद्विरोध एवाप्रामाण्यप्रसङ्गात् सुतरां तत्साहाय्यवता श्रुत्या विरोधेऽप्रामाण्यप्रसङ्ग इति युक्तमेव विणोर्जगत्कर्तृत्वमिति भाव: । (अत्र पूर्वपक्षन्याय:, 'स्मृत्यनवकाश:' सति सौत्रपूर्वभागेन पाशुपादिस्मृतीनां अनवकाशमापादयता सूचित: । रुद्रादेराप्तत्वं विना तत्स्मृत्यनवकाशत्वानिर्वाहात् । अन्यथेयापादनं स्यात् । 'इतरेाां चानुपलब्धे:' इति द्वितीयसूत्रेण निोध्यतया सूचित: । सिद्धान्तन्यायस्तु 'स्मृत्यनवकाशदोाप्रसङ्गाद्' इति सिद्धान्तांशेन सूचित: ।) ।। १ ।। ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ इत्यत्र प्रमाणाप्रमाणभूतवाक्योपलब्ध्या श्रुत्यादिकं प्रमाणं न वेति सन्देहे, न प्रमाणमिति पूर्व: पक्ष:, प्रमाणमेवेति सिद्धान्त: । तत्र 'समता' इत्यनेनोक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृण्वन् प्रतिक्षिपति ।। नश्रुतेरिति ।। यथाविद्यमानार्थाभिधायकत्वेन रुद्रादिविरचितपाशुपतादिस्मृतीनामप्रामाण्यं, तथा 'कारीर्या यजेत वृयिकाम:' इति श्रुते: । उपलक्षणमेतत् । पञ्चरात्रादिस्मृतेश्च । कारीर्याद्यनुष्ठानेऽपि वृययाद्यदृययाऽविद्यमानार्थाभिधायकत्वादप्रामाण्यमित्येवं द्ग पं श्रुते: रुद्रादिस्मृतिसाम्यमिति न तया विणोर्जगत्कर्तृत्वं सिद्धयतीति नेत्यर्थ: । तद्धितुत्वेन 'समता' इत्यनेनैवोक्तन्यायं सिद्धान्तसम्बन्धित्वेन विवृणोति- किन्त्विति ।। यथा साक्षिप्रत्यक्षस्य प्रामाण्यं नियतं, तथा श्रुते: पञ्चरात्रादिस्मृतेश्च

प्रामाण्यं नियतम् । प्रामाण्यनियमप्रदर्शनार्थमेव साक्षीत्युक्तम् । एवकारेण रुद्रादिस्मृतिसाम्यं व्यावर्तयति । अत्र हेतुमाह- निरपेक्षत्वादिति ।। कर्तृगुणप्रमाणान्तरसंवादफलसंवादाद्यपेक्षशून्यत्वादित्यर्थः । अयं भावः । वाक्याप्रामाण्यं वक्तृदोानिब न्धनम् ; नहि नित्ये वेदे दोाः कल्पयितुं शक्यन्ते । अतो नित्यत्वाददोावाक्यत्वेनान्यानपेक्षिततया साक्षिप्रत्यक्षत्वप्रामाण्यमिति । श्रुत्यपेक्षयैवैतत् । पञ्चरात्रादिस्मृतेस्तु श्रुतिŽ पप्रमाणानुकूलत्वहेतुना सर्वमेतदुपपादनीयम् । तथाच, आश्-वाससम्भवाच्छ्रुत्याद्युक्तं जगत्कर्तृत्वं विणोर्युक्तमिति भावः । (अत्र पूर्वपक्षन्यायः 'तथात्वम्' इत्यनेनोक्तो भवति । सि€न्तन्यायाश्-च विलक्षणत्वाद्' इत्यंशेन सूचितो भवति, श्रुत्यादेर्नित्यत्वात् निर्दोात्वादिलक्षणस्य साक्षिप्रत्यक्षसाम्यस्य सूचनात् ।) ।। २ ।। ॐ अभिमानिव्यपदेशस्तु विशेाानुगतिभ्याम् ॐ इत्यत्र सन्देहतद्बीजपूर्वपक्षसि€न्ताः पूर्वाधिकरणवदेव द्रयव्याः । तत्र, 'अदृयिः' इत्युक्तन्यायं पूर्वपक्षसम्बन्धितया तत्फलं सूचयन्विवृण्वन् प्रतिक्षिपति -

न मृदादीनां वचनाद्यदृयिः श्रुत्यप्रामाण्यकारणम् ।

।। न मृदादीनामिति ।। प्रत्यक्षादिसि€मृज्जलतेजःप्रभृतीनां, 'वचनाद्यदृयिः' इत्यस्य, 'वचनेक्षणाद्यदृयिः' इति, नञ्व्यत्यासेन 'वचनेक्षणाद्यभावदृयिः' इति चार्थः । अनेन दृयान्ते साध्यसत्त्वं प्रदर्शितम् । मृदादीनामित्यनेनैव मृदादित्वं, जडत्वं च साधनं प्रदर्शितम् । तथाच प्रसि€मृदादौ, जडत्वादेर्हेतोः, वक्तृत्वाद्यभावेन, व्याप्तिरित्युक्तं भवति । एवंच जडत्वादिहेतोरादिकालीनमृदादिŽ पपक्षधर्मत्वं च द्रयव्यम् । ततश्-चेयं मृदादीनां वचनाद्यदृयिः, नञ्व्यत्यासेन व्याप्तिदृ- यत्वेन, 'सर्गाद्यकालीनमृदादिकं वक्तृत्वाद्युपेतं न भवति, जडत्वात् ; प्रसि€मृदादिवत्' इत्यनुमानोत्थापकतया, 'मृदब्रवीत्" आपोऽब्रुवन्' 'ता आप ऐक्षन्त' 'तत्तेज ऐक्षत' 'ओाधयः संवदन्ते' इत्यादिश्रुतेरप्रामाण्यकारणम् । अतो विश्-वसा भावाŽा तया जगत्कर्तृत्वं सि€यतीति भावः । कथं तर्हि, निरवकाशत्वेनोक्तप्रबलानुमानविरोधपरिहारः श्रुतेरित्याशयवान् पृच्छति-

अपि तु वचनादिशक्ताया देवताया मृदादिशब्दवाच्यत्वद्योतिकैव ।। ३ ।। ईश्-वरस्य स्रयृत्ववदसतोऽपि स्रयृत्वं श्रूयत इति नास्ति ।

।। अपि त्विति ।। तदुत्तरत्वने 'अदृयिः' इत्यनेनैवोक्तन्यायं सि€न्तसम्बन्धितया विवृणोति- वचनादिति ।। आदिपदेनेक्षणादिकं ग्राह्यम् । शक्ताया: इत्यनेन वक्तृत्वाद्युपयुक्तविग्रहादेरपि द्योत्यत्वं सूचयति- द्यौतिकैवेत्यवधारणेन पूर्वपक्षं व्यावर्तयति । ननु, मृदादीनां वचनाद्यदृये:, 'मृदब्रवीत्' इत्यादिवेदाप्रामाण्येनाप्युपपत्तेः कथं वचनादिशक्तदेवताया मृदादिशब्दवाच्यत्वद्योतकत्वमवधार्यते इति चेŽा, वेदस्य निदोावाक्यत्वेन अप्रामाण्याभावस्य

निश्-चितत्वादित्यस्याप्येवकारेणोक्तत्वादिति । अत एवोक्तं तत्वप्रकाशिकायां - 'अचेतनस्य वचनाद्यदृयया, निर्दो- ावाक्यस्याप्रामाण्यादृयया च तत्कल्पनोपपत्तेः' इति । तथाच श्रुत्युक्तं जगत्कारणत्वं विणोर्युक्तमेवेति भावः । (अत्राचेतनस्य वचनाद्यदृयया, निर्दोावाक्यस्याप्रामाण्यादृयया च अभिमानिव्यपदेशं समर्थयता 'अभिमानिव्यपदेशस्तु' इति सूत्रेण, अचेतनस्य वचनाद्यदृयिः पूर्वपक्षन्यायः, निर्दोावाक्यस्याप्रामाण्यादृयिः सि€न्तन्यायः इति सूचितमिति ज्ञातव्यम् ।) ।। ३ ।। ॐ असदिति चेŽा प्रतिोधमात्रत्वात् ॐ ।। इत्यत्र 'यतो वा इमानि भूतानि जायन्ते' 'असदेवेदमग्र आसीत्' इति श्रुतिविप्रतिपत्त्या जगत्कारणत्वं विणोर्युक्तमयुक्तं वेति सन्देहे, न विणोर्जगत्कारणत्वं युक्तमिति पूर्वः पक्षः, युक्तमेवेति सि€न्तः । तत्र 'श्रुतिसाम्यम्' इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृण्वन्प्रतिक्षिपति - ईश्-वरस्येति ।। यथेश्-वरस्य स्रयृत्वं 'यतो वा इमानि--' इत्यादिना श्रूयते, असतोऽपि स्रयृत्वं 'असदेवेदमग्र आसीत्' इत्यादिना श्रूयते । तथाच ब्रह्माऽसतोः स्रयृत्वश्रुतिसाम्यम् । अतो जगत्कारणत्वनिश्-चयः इत्येतŽाास्तीत्यर्थः । कुतो न

साम्यमित्यत: 'श्रुतिसाम्यम्' इत्युक्तमेव न्यायं सिद्धान्तसम्बन्धित्वेन विवृणोति-

सोऽसच्छब्दो ब्रह्मशब्दवदेव ब्रह्मवाचक इति श्रुते: साम्यम् ।। ४ ।।

सोऽसच्छब्द इति ।। यथा ब्रह्मशब्द: 'अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणा:' इति श्रुतिबलाद्ब्रह्मवाचक:, एवं, 'तद्वा एतदासीदित्याह नह्यासादयति कश्चन' इति श्रुतिबलात् 'असदेव' इति श्रुतिगताऽसच्छब्दो ब्रह्मवाचक: इति हेतो: 'असदेव' इति श्रुते: 'यतो वा--' इति श्रुत्या साम्यमेकार्थप्रतिपादकत्वमित्यर्थ: । अनेन, श्रुतिसाम्यमित्येतत् निर्वचनश्रुत्यो:, ब्रह्मसच्छब्दयो:, तदुपेतश्रुतिवाक्ययोश्च साम्यमिति त्रेधा व्याख्यातं भवति । अत्र, पूर्वपक्षे, 'सतोऽपि' इति अपिपदेन 'ईश्वरस्य' इत्युक्तसमुच्चयात् 'एतेन शिया अपरिग्रहा अपि--' इति सूत्रनिरसनीयजीवादेरपि समुच्चय: । सिद्धान्ते, 'असच्छब्द:' इति जीवशब्द इत्यादेरुपलक्षक इति ज्ञातव्यम् । तथाच सङ्क्षेपे- 'असज्जीवप्रधानादिशब्दा ब्रह्मैव नापरम् । वदन्ति कारणत्वेन--' इत्युक्तम् । तथाच श्रुत्युक्तं जगत्कारणत्वं विणोर्युक्तमेवेति भाव: । (अत्र, पूर्वपक्षन्यायो 'यतो वा--' इति श्रुत्या ब्रह्मणो जगत्कारणत्ववत्, 'असदेवेदम्' इति श्रुत्या असतोऽपि जगत्कारणत्वमिति प्रतिपादकेन 'असदिति चेत्' इति (सूत्र) भागेन सूचित: । सिद्धान्तन्यायश्च, 'प्रतिोधमात्रत्वात्' इत्यादिसूत्रे असत: कारणत्वप्रतिक्षेपात्, श्रुतेर्निरर्थकत्वायोगात्' 'एतेन सर्वे व्याख्याता:' इत्युक्तन्यायेन, असच्छब्दस्य ब्रह्मवाचकत्वेन, 'असदेव' इति, 'यतो वा' इति श्रुत्यो: साम्यमित्यर्थसूचकै: सूचित: ।) ।। ४ ।। ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ इत्यत्र, वादिविवादेन जगज्जन्मादिकर्तृत्वं परमात्मनो युक्तमयुक्तं वेति सन्देहे, न युक्तमिति पूर्व: पक्ष:, युक्तमेवेति सिद्धान्त: । तत्र, 'बलोद्भव:' इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृण्वन्प्रतिक्षिपति ।।

कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति इति श्रुतिबलाद्वाक्यम् । किन्तु भेदापादकमेवैतत् 'निरञ्जन: परमं साम्यमुपैति परात्परंपुरिशयं पुरुषमुपैति दिव्यम् इति संहितवाक्यबलात् । एकीभावशब्दस्तु संध्येऽपि भवति ।

।। कर्मणीति ।। अत्र, 'श्रुतिसाम्य:' इत्यतो बुद्ध्या विवेकेन 'श्रुति:' इत्यनुवर्तत इत्यभिप्रेत्य, श्रुतिबलादित्युक्तम् । अनेन, श्रुतिबलात्, उद्भवोज्ञानं यस्य जीवेश्वरैक्यं पूर्वपक्षन्याय इति विवृतं भवति । तथाच जीवाभिधास्येश्वरस्य जीवेऽसम्भाव्यमानं जगत्कर्तृत्वं न युक्तमिति पूर्वपक्षो, नेत्यर्थ: । तर्हि, श्रुतेरप्रामाण्यासम्भवात्का गतिरित्याशयेन पृच्छति - किन्त्विति ।। श्रुतिगतिमाह- भेदापादकमेवेति ।। एवकारेण पूर्वपक्षं व्यावर्तयति । एतत् श्रुतिवाक्यम् । अनेन, श्रुतिबलोद्भवशब्द: सिद्धान्ते भेदपर इति विवृतं भवति । ननु, पूर्वपक्षे, 'एकीभवन्ति' इति बलमस्ति, सिद्धान्ते किं बलमित्यत आह- निरञ्जन इति ।। ननु, संहितैतद्वाक्यादपि, 'एकीभवन्ति' इत्येकीभावशब्दस्य, वाक्यावयवत्वेनान्तरङ्गतया प्रबलत्वेन, ऐक्यापादकत्वमेव 'कर्माणि' इति वाक्यस्य, न भेदापादकत्वमित्यत आह- एकीभावशब्द इति ।। संध्यं स्थानैक्यम् । अपिशब्देन मत्यैक्यसमुच्चय:, स्वप्ने पैक्याभावेऽपीति वा । अन्तरङ्गत्वेऽपि सावकाशत्वात् नैकीभावशब्द: प्रबल:, 'निरञ्जन:--' इत्यादि संहितवाक्यन्तु, निरवकाशत्वात्प्रबलमिति भाव: । (नैतत्सावकाशत्वं स्वोत्प्रेक्षितमित्याशयेन) स्थानैक्यमत्यैक्याभ्यामेकीभावशब्दप्रयोगं दर्शयति- एकीभूतेति ।। एवमान्तरोपपत्तिमुक्त्वा बाह्यामपि तामाह- यथोदकमिति ।। नतु तदेव भवति । एवं विजानतो मुने: विजानतां मुनीनामात्माधिपतिपतिर्हिरण्यगर्भोऽपि मुक्त: परमात्मानं प्राप्य तादृगेव भवति, किमुताऽन्य इत्यर्थ: । तथाच श्रुतिबलोद्भवाज्जीवेश्वरयोर्भेदाज्जीवेऽसम्भाव्यमानमपि जगत्कर्तृत्वं विणौ युक्तमेवेति भाव: । (अत्र पूर्वपक्षन्याय: 'कर्माणि' इति श्रुतिबलात् श्रुतिबलात् एक्यसिद्धेरिति वदता 'भोक्त्रापत्तेरविभागश्चेत्' इत्यंशेनोक्त: । सिद्धान्तन्यायश्च, 'यथोदकम्' इति सूचितो भवति ।) ।। ५ ।। ॐ

तदन्यत्वमारम्भणशब्दादिभ्य: ॐ ।। पटादिसृये: स्वतन्त्रसाधनसापेक्षत्वदर्शनात्, ईश्वरसृयेरलौकिकत्वात्, जगत्सृ-

ययादिकं किं स्वतन्त्रसाधनसापेक्षं नवेति सन्देहे, स्वतन्त्रसाधनसापेक्षमिति पूर्व: पक्ष:, नेति सिद्धान्त: । तत्र, 'सर्वानुसार:' इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृण्वन्प्रतिक्षिपति- न लौकिकेति ।। व्याप्तिनिश्चयाय व्यभिचारनिरासार्थं सर्वेतिकार्यविशेणम् । पक्षव्यावृत्त्यर्थं, प्रमाणप्रदर्शनार्थं च लौकिकेति । अकर्तृतन्त्रत्वं, उपादानादि भूतप्रधानादे:, कर्तृभूतपरमात्मतन्त्रत्वाभाव: इत्येवंरूप सर्वानुसार: । तथाच लौकिकसवर्कार्यवत्, कार्यत्वेनेशकृतकार्यमपि स्वतन्त्रसाधनसापेक्षमिति पूर्वपक्षो नेत्यर्थ: । ईश्वरसृये: कीदृक्त्वं तर्हीति पृच्छति-

किं तर्हि तद्वैलक्षण्येन सर्वकर्तृविलक्षणसर्वशक्तित्वमेवाशेयुक्तिश्रुत्यनुसारि । एा सर्वेश्वर: इत्यादिश्रुते: । युक्तिमात्राच्छ्रुतियुक्ता हि युक्तिर्बलीयसी ।। ६ ।।

।। किं तर्हीति ।। तदुत्तरत्वेन 'सर्वानुसार:' इत्युक्तमेव न्यायं, सिद्धान्तसम्बन्धित्वेन विवृणोति- तद्वैलक्षण्येनेति ।। तेभ्यो लौकिकसर्वकार्येभ्यो, वैलक्षण्येन स्वतन्त्रसाधनरहितत्वाख्येन, सर्वकार्यकर्तु: परमात्मन:, स्वव्यतिरिक्तकुविन्दकुलालादिसर्वकर्तृभ्य: विलक्षणं साधनान्तरनियमनादिसर्वशक्तित्वमेव अशे-षायुक्तिश्रुत्यनुसारिसर्वयुक्तिश्रुतिसिद्धमित्यर्थ: । प्राधान्याच्छ्रुतिमुदाहरति- सर्वेश्वर इति ।। एवं, 'परतन्त्रो ह्यपेक्षेत स्वतन्त्र: किमपेक्षते । साधनानां साधनत्वं यत: किं तस्य साधनै:' इत्यादिस्मृत्युक्ता: परतन्त्रत्वस्-वतन्त्रत्वसाधनसत्तातत्प्रदत्वादियुक्तयोऽपि द्रयव्या: । ननु, पूर्वपक्षयुक्तेरपि, व्याप्तिपक्षधर्मतोपेतत्वेन प्राबल्यात्कथमेवं निर्णय इत्यत आह- युक्तिमात्रादीति ।। अङ्गीकृत्य चेदमुदितम् । बाधितविायत्वेन पूर्वपक्षयुक्तेयर्ुक्तित्वमेव नास्तीति ज्ञातव्यम् । एवंच सर्वश्रुतियुक्तयनुसारादीशकृतकार्यं न स्वतन्त्रसाधनापेक्षमिति भाव: । (अत्र, पूर्वपक्षन्यायो 'यथा प्राणादि:' इत्यनेन निोध्यतया सूचित: । सिद्धान्तन्यायश्च, स्वरपसामर्थ्यादेव स्नयृत्वमनेकश्रुतियुक्त्यनुसारीत्यर्थकेन 'आरम्भणशब्दादिभ्य:' इत्यनेन सूचित: ।)।। ६ ।। ॐ इतरव्यपदेशाद्धिताकरणादिदोाप्रसक्ति: ॐ ।। इत्यत्र, श्रुतिविप्रतिपत्त्या, श्रुत्यनुभवविप्रतिपत्त्या वा, जगत्कतर्ृत्वादि विणोर्युक्तमयुक्तं वेति संशये, न युक्तमिति पूर्व: पक्ष:, युक्तमेवेति सिद्धान्त: । तत्र 'लघुता' इत्युक्तन्यायं पूर्वपक्षसम्बन्धित्वेन विवृण्वन्प्रतिक्षिपति-

नचेश्वरत्यागेन जीवस्यैव कर्तृत्वाङ्गीकारे कल्पनालाघवम् । श्रुतिसिद्धत्वेनाकल्पनात् । अश्रुतजीवकर्तृत्वाङ्गीकारे गौरवमेव ।

।। नचेश्वरत्यागेनेति ।। तदनङ्गीकारेणेत्यर्थ: । जीवस्यैव, महदादिकार्य इति शेा: । यद्वा, ईश्वरस्य घटादिकर्तृत्वत्यागेनेत्यर्थ: । जीवस्यैव, घटादिकार्य इति शेा: । इदमुक्तं भवति, नेश्वरस्य महदादिसकलकार्यकर्तृत्वं युक्तम्, अनुपलब्धिबाधिमीश्वरं कल्पयित्वा, तस्य सर्वकर्तृत्वकल्पने, कल्पनागौरवापत्ते: । ईश्वरानङ्गीकारेण जीवस्यैव सर्वकर्तृत्वाङ्गीकारे, कल्पनालाघवम् । धर्मिकल्पनातो धर्मकल्पनाया लघुत्वात् । जीवस्य घटादौ कर्तृत्वस्य क्लृप्तत्वाच्च । अथ देवादिवददृश्यत्वशक्तियोगादनुपलभ्यमानोऽपीश्वर: प्रमाणेनाङ्गीक्रियत इति चेत्, तथापि तस्य महदादिकार्य एव कर्तृत्वमस्तु, न घटादावपि । उभयत्र कल्पने गौरवापत्ते: । घटादौ तु, ईश्वरत्यागेन जीवस्यैव कर्तृत्वाङ्गीकारे, कल्पनालाघवम्, इति । एतच्च नेत्यर्थ: । कुतो नेत्यतो 'लघुता' इत्युक्तमेव न्यायं, सिद्धान्तसम्बन्धित्वेन विवृणोति- श्रुतिसिद्धत्वेनेति ।। ईश्वरस्य, तस्य घटादिसर्वकार्यकर्तृत्वस्य चेत्यर्थ: । कल्पनाऽनेकत्वे खलु कल्पनागौरवम् । ईश्वरस्य, तस्य घटादिसर्वकार्यकर्तृत्वस्य च श्रुतिसिद्धत्वेन, कल्पनाया एवाभावाद्गोभयपक्षोक्तगौरवमिति भाव: । तर्हि पक्षद्वयस्यापि प्रामाणिकत्वेन कथं निर्णय इत्यत आह- अश्रुतेति ।। अङ्गीकार एवेति सम्बन्ध: । जीवस्य अनन्याधीनतया महदादौ घटादौ वा कर्तृत्वस्य अश्रुतत्वेन, तदङ्गीकार एव गौरवम्, नतु ईश्वरस्य तदङ्गीकार इत्यर्थ: । तथाच विपरीतलाघवमिति वदन्, न्यायं विवृणोति -

तदभावे सिद्धान्ते लघुता । नान्य: कर्ता सहि स्वतन्त्र: परमात्परमो हरिरित्यादेश्च । अभेदपक्षस्तु निराकृत: । श्रुत्यनु

भवविरोधाच्च ।। ७ ।।

।। तदभाव इति ।। ईश्-वरकर्तृत्वस्य श्रुतिसिद्धत्वेनाश्रुतत्वाभावात्सिद्धान्ते, ईश्-वरकर्तृत्वपक्षे लघुतेत्यर्थः । न केवलं जीवकर्तृत्वस्याश्रुतत्वम्, तदभावाश्-च श्रुत इत्यभिप्रेत्य, तां श्रुतिमुदाहरति- नान्य इति ।। 'स हि' इत्यादिश्रुतिशे-ाोदाहरणं, श्रुतिसिद्धत्वेनेत्येतदुपपादनार्थम् । अन्यो जीवः, स्वातन्त्र्येण सर्वकार्याणां न कर्ता, हि यस्मात्, तस्मात्प्रसिद्धो हरिः

स्वतन्त्रः अन्याप्रेर्यतया सर्वकार्यकर्ता, परमात्परमः उत्तमादुत्तमः, इति श्रुत्यर्थः । ननु, श्रुतिरीश्-वरस्य स्वातन्त्र्येण कर्तृत्वं प्रतिपादयति । 'अहं करोमि' इत्याद्यनुभवस्तु, जीवस्य तथाकर्तृत्वं गोचरयति । नच स्वतन्त्रवस्तुद्वयमङ्गीकर्तं शक्यम् । तथात्वे दोास्य वक्ष्यमाणत्वात् । अतः श्रुत्यनुभवान्यतानुपपत्त्या जीवेश्-वरयोरभेदाङ्गीकारे, जीवपक्षस्यापि श्रौतत्वाद्ग्रा कल्पनागौरवमित्यत आह- अभेदपक्षस्त्विति ।। निराकृतो 'भोक्तृापत्तेः' इत्यादाविति भावः । अनुभवस्य पराधीनाल्पकर्तृत्वविायत्वं, भ्रान्तित्वं वेति भावः । प्रमाणान्तरविरोधाच्च नाभेदपक्षो युक्त इत्याह- श्रुतीति ।। एवंच प्रामाणिकपक्षस्यैव लघुतया, ईश्-वरकर्तृत्वस्य श्रुतिसिद्धत्वात्, युक्तमेवेश्-वरस्य कर्तृत्वमिति भावः । (अत्र, पूवर्पक्षन्यायः 'उपसंहारदर्शनाद्गोति चेत्' इत्यनेन, जीवकतर्ृत्वे प्रत्यक्षसद्भावोक्तया सूचितः । सिद्धान्तन्यायश्-च, 'देवादिवदपि' इति सूत्रे, श्रुतेर्योग्यानुपलम्भबाधपरिहारेण, श्रुतिसिद्धान्तत्वसूचनात्सूचितः ।) ।। ७ ।। ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ।। इत्यत्र, ईश्-वरस्य जगत्कर्तृत्वे तत्र तत्रोक्तन्यायैः, कृत्स्नप्रसक्त्यादिदोाैश्-च जगत्स्रयृत्वं विणोर्युक्तं वेति सन्देहे, न युक्तमिति पूर्वः पक्षः, युक्तमेवेति सिद्धान्तः । तत्र, 'विशोाादर्शनम्' इत्युक्तन्यायं, सिद्धान्तसम्बन्धित्वेन तावद्विवृणोति-

शब्दैकसमधिगम्यत्वसर्वशक्तित्वादीनां विशोाणामदर्शनं जीवे । न जीवाद्विशोादर्शनं परमेश्-वरे । विशोाश्रुतेरेव ।। ८ ।।

।। शब्दैकसमधिगम्यत्वेति ।। शब्दैकसमधिगम्यत्वं, 'शब्दमूलत्वात्' इति सूत्रोक्तम्, सर्वशक्तित्वादयस्तु, 'आत्मनि चैवं विचित्राश्-च हि' इत्यादिसूत्रोक्ताः । एतोां विशोाणां जीवेऽदर्शनम् । अत्र दर्शनशब्दो ज्ञानमात्रपरः । ज्ञापकश्रुत्यादिद्ग पप्रमाणाभवादिति भावः । सिद्धान्तफलत्वात्पूर्वपक्षनिोधस्येदानीं 'विशोाादर्शनम्' इत्युक्तमेव न्यायं, पूर्वपक्षसम्बन्धित्वेन विवृण्वन्प्रतिक्षिपति - न जीवादिति ।। परमेश्-वरे, जीवाद्विशोाणां जीवव्यावर्तकानां, तत्राविद्यमानानामिति यावत् । कृत्स्नप्रसक्तयादिदोानिरासकानामदर्शनं नेत्यर्थः । अदर्शनाभावो दर्शनम् । तत्केन प्रमाणेनेत्याकाङ्क्षायामाह- विशोाश्रुतेरेवेति ।। 'न वेदविन्मनुते तं बृहन्तम्' 'विचित्रशक्तिः पुरुाः पुराणः' इत्यादिश्रुतेः, शब्दैकसमधिगम्यत्वसर्वशक्तित्वादीनां जीवविशोाणां दर्शनेनादर्शनं नेत्यर्थः । एवकारेण श्रुतेः प्रसिद्धतामाह । एवंच जीववदीश्-वरेऽपि कृत्स्नप्रसक्तयादिदोानिरासकविशोाणामदर्शनाङ्गगत्कर्तृत्वायोग इति पूर्वपक्षे, ईश्-वरगतशब्दैकसमधिगम्यत्वादिविशोाणां जीवेऽदर्शनाद्ग्रा जीवसाम्यमिति, ईश्-वरस्य जगत्कर्तृत्वं युक्तमेवेति सिद्धान्त इति भावः । (अत्र, पूर्वपक्षन्यायः, 'शब्दमूलत्वात्' 'आत्मनि चैवं विचित्राश्-च हि' इति सूत्रद्वयेन (पूर्वपक्ष)निरसनीयतया सूचितो भवति । सिद्धान्तन्यायश्-च, अवधारणार्थेन 'आत्मनि च' इति चशब्देन, 'स्वपक्षदोाच्च' इत्यनेन च युक्तिविरोधपरिहारोपयोगिनो विशोास्य जीवेऽदर्शनोक्त्या सूचितः ।) ।। ८ ।। ॐ न प्रयोजनवत्त्वात् ॐ ।। इत्यत्र, जगत्कर्तृत्वोपपादनाफलाभ्यां, जगत्कर्तृत्वमीश्-वरस्य युक्तमयुक्तं वेति सन्देहे, न युक्तमिति पूर्वः पक्षः, युक्तमेवेति सिद्धान्तः । तत्र 'अफलम्' इत्युक्तन्यायं, तत्फलप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षेपति -

नच प्रयोजनाभावोऽकर्तृत्वे कारणम् । अशोकर्तृत्वापादकश्-च । फलापेक्षिणस्त्वपूर्णत्वादेव । न सर्वकर्तृत्वादिशक्तिः इतरस्य पूर्णत्वादेवानन्तशिाक्तत्वाल्लीलयैव कर्तृत्वम् ।। ९ ।।

।। नच प्रयोजनाभाव इति ।। तथाच प्रयोजनाभावे, प्रवृत्तेरेवाद्दयत्वेन तस्याकर्तृत्वे कारणत्वात्, यदीश्-वरस्य, 'न प्रयोजनवत्त्वात्' इति प्रयोजनाभावोऽप्युपेयते, तर्हि कर्तृत्वमेव न स्यात्, कुत: सर्वकर्तृत्वमिति भाव: । कुत इत्याकाङ्क्षायां 'अफलम्' इत्युक्तमेव न्यायं सिद्धान्तसम्बन्धितया विवृणोति- अशेति ।। चो हेतौ । यस्मात्प्रयोजनाभाव:, अशेाकर्तृत्वापादक:, तस्मादकर्तृत्वे कारणं न । न केवलं प्रयोजनाभावोऽकतर्ृत्वे न कारणम्, किन्तु, अशे-ाकर्तृत्वापादकसमुच्चयवाचकश्-चशब्द: । कथं फलाभावोऽशेाकर्तृत्वापादक इत्यत आह- फलापेक्षिणस्त्विति ।। इतरस्य फलापेक्षारहितस्य । कर्तृत्वं अशेाकर्तृत्वम् । इदमुक्तं भवति । ईश्-वर: अशेाकतर्ा, अनन्तकर्तृत्वात् व्यतिरेकेण देवदत्तवत् इति । नच स्वŽ पासिद्धे: ईश्-वरोऽनन्तशक्ति:, पूर्णत्वात् इति तत्साधनात् । नच व्याप्त्यभाव:, अपूर्णस्य सर्वकर्तृत्वादिशक्तयभावदशर्नेन, व्यतिरेकव्याप्तिसत्त्वात् । नच तत्राप्यसिद्धे:, फलापेक्षिणोऽपूर्णत्वनियमेन, फलापेक्षाशून्यचेतनत्वपूर्णत्वस्यापि साधनात् सति प्रयोजनाभाव: परम्परयाशेाकर्तृत्वस्यापादक इति । भगवत: प्रयोजनानुद्देशे, कीदृशी प्रवृत्तिरिति प्रश्-नपरिहाराय लीलयैवेत्युक्तम् । नहि लीला प्रयोजनाय भवति । अफलŽ पन्यायस्य पूर्वोत्तरपक्षफलसम्बन्धो मूल एव सय: । (अत्र पूर्वपक्षसिद्धान्तन्यायावनेनैव सूत्रेणोक्तौ ।) । ९ ।। ॐ वैाम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ।। इत्यत्र, जगत्कर्तृत्वादिविाये, श्रुत्या, वैाम्यादिविरोधदर्शनेन च जगज्जन्मादिकर्तृत्वमीश्-वरस्य युक्तमयुक्तं वेति सन्देहे, न युक्तमिति पूर्व: पक्ष:, युक्तमेवेति सिद्धान्त: । तत्र,

"<™ÎÎÜôÎÜ€ù:' <t™ÎŢEuÎ™ÎÎ™Îţ ÎŅŗÎÊÎKÎôÎ˜–ÎĻŒÎtÎ™ÎÎ ÜŗÎŗÎĻsŗÎÎĻŪtÎŪKÎÎŪtÎ-

नेशस्य पूर्णत्वासिद्धे: । कर्मसापेक्षत्वेनीशत्वमनपेक्षत्वे श्रुतेरप्रामाण्यमिति ।

।। नेशस्येति ।। पूर्णत्वं, पूर्णकर्तृत्वम्, अशेाकर्तृत्वमिति यावत् । युक्तिविरोधादिति भाव: । अनेन, इयस्य अशे-ाकर्तृत्वस्य, असिद्धेरिति न्यायो विवृतो भवति । कुत ईशस्याशेाकतर्ृत्वं युक्तिविरुद्धमिति चेत्, 'ईश्-वर: किं तत्प्राणिकर्मसापेक्ष: सन् सुखदु:खादि सर्वं करोति, उत तदŽारपेक्ष:' इति विकल्पं मनसि निधाय, आद्ये दोामाह - कर्मसापेक्षत्व इति ।। अत्र, निर्निमित्तं प्राणिनां सुखदु:खादिदानेन वैाम्यनैघर्ृण्ये स्यातामित्यपि ग्राह्यम् । यदीश्-वर: कर्मानपेक्षया फलादिप्रदाता, तर्हि ज्योतियोमयागादे: स्वर्गादिसाधनत्वं न स्यात्, तदभावेऽपि भगवतस्तत्कार्यत्वायोगात् । तथाच, 'ज्योतियोमेन स्वर्गकामो यजेत' इत्यादिश्रुतेरप्रामाण्यं स्यादित्यर्थ: । अतो नेत्यत:, 'इयासिद्धे:' इत्युक्तमेव न्यायं सिद्धान्तसम्बन्धितया विवरितुं, कर्मसापेक्षत्वमभ्युपेत्य, तत्रोक्तदोापरिहारार्थमाह-

कर्मणोऽपि तदधीनत्वम् । तथापि तदनुसारेण फलदानमित्यनङ्गीकार एवेयश्रुतिप्रामाण्यासिद्धे: ।। १० ।।

।। कर्मणोपीति ।। न केवलं फलादे:, किन्तु कर्मणोऽपि इत्यपिशब्दार्थ: । तथाचापेक्ष्यकर्मणोऽपि स्वाधीनत्वात् नानीशत्वमिति भाव: । ननु, स्वनियम्यापेक्षा नामानपेक्ष्यैव, तथाच, किमीश्-वर: कर्ता कर्मापेक्ष्य करोतीत्यङ्गीकार्यम् इत्यतो न्यायं विवृणोति- तथाऽपीति ।। यद्यपि, कर्मणस्तदधीनत्वेन तदपेक्षा नामानपेक्षैवेति शेा: । तदनुसारेण कर्मानुसारेण, फलस्य शुभाशुभलक्षणस्येश्-वरकर्तृकदानमित्यनङ्गीकार एव इयस्य 'ज्योतियोमेन स्वगर्कामो यजेत' इत्यादिश्रुतिप्रामाण्यस्यासिद्धे:, नतु तथाङ्गीकार इत्यर्थ: । तथाचेश्-वरस्य कर्मानपेक्षश्रुतिप्रामाण्यŽ पेयासिद्धे:, कर्मापेक्षा । ततश्-च न वैाम्यादिदोा: । अपेक्ष्यकर्मणश्-चेशाधीनत्वात् नेशत्वासिद्धेदोाोऽपीति, युक्तमीश्-वरस्य सवर्जगत्कर्तृत्वमिति भाव: । (अत्र पूर्वपक्षन्यायो 'वैाम्यनैर्घृण्ये न' इत्यनेन सूचित: । यद्वा, 'उपपद्यते चाप्युपलभ्यते च' इति सूत्रेण पक्षद्वयेऽपि दोापरिहारात् 'कर्मापेक्षत्वे, अस्वातन्त्र्यम्, कर्मनिरपेक्षत्वे वैाम्याद्यापात:' इति सूचनेन सूचितो भवति । सिद्धान्तन्यायश्-च 'उपलभ्यते च' इत्यनेन वेदाप्रामाण्यकारणस्य वैाम्यादेरुपलभ्यमानत्वादिति प्रतिपादयता

सूचितः ।) ।। १० ।। ॐ सर्वधर्मोपपत्तेश्च ॐ ।। इत्यत्र, समन्वया€यायान्यत्रादर्शनाभ्यां, पूर्णत्वं विणोर्युक्तमयुक्तं वेति सन्देहे, न युक्तमिति पूर्वः पक्षः, युक्तमेवेति सि€न्तः । तत्र 'नियमः' इत्युक्तन्यायं पूर्वपक्षसम्बन्धितया विवृण्वन्प्रतिक्षिपति-

सर्वचेतना अपूर्णगुणा इति नियमो न । स्वतन्त्रस्य पूणर्गुणत्वनियमात् । 'ैअपूर्णोऽयं जीवसङ्घोऽस्वतन्त्रः पूणर्ो हरिर्यः स्वतन्त्रः सदैव । नहि स्वतन्त्रोऽपूर्णतां कामयति, पूर्णो यदि स्यादस्वतन्त्रः कुतः सः ।। इति श्रुतेः ।। ११ ।।

।। इति द्वितीयाध्यायस्य प्रथमः पादः ।।

।। सर्वचेतना इति ।। अत एव व्यभिचारशङ्कापरिहारार्थं सर्वेत्युक्तम् । तथाचेश्वरस्यापि चेतनत्वेनापूर्णतया अवश्यम्भावित्वाŽा जगत्कर्तृत्वं युक्तमिति पूर्वपक्षो नेत्यर्थः । कुतो नेत्यतो 'नियमः' इत्युक्तमेव न्यायं सि€न्तसम्बन्धित्वेन विवृणोति- स्वतन्त्रस्येति ।। स्वतन्त्रस्य पूर्णगुणत्वेन व्याप्तिरित्यर्थः । अनेन पूर्वपक्ष्युक्तानुमाने, अस्वातन्त्र्यमुपाधिरित्यपि सूचितम् । नन्वेवं, सत्प्रतिपक्षत्वेनानिर्णयः स्यादिति चेŽा, अस्मदुक्तानुमानस्य श्रुतिसि€व्याप्तिपक्षधर्मतोपेतत्वेन प्रबलत्वात्, इति भावेन तत्प्रतिपादकश्रुतिमुदाहरति - अपूर्णोऽयमिति ।। अनेनानुमाने व्यतिरेकव्याप्तिः, उपाधावन्वयव्याप्तिरुक्ता भवति । अयमित्यपूर्णत्वस्य जीवेऽनुभवसि€तामाह । एवं व्याप्तिमुक्त्वा पक्षधर्मताप्रदर्शनपूर्वकं प्रतिज्ञां दर्शयति । अनेन, 'हरिः पूर्णः, स्वतन्त्रत्वात्' इति प्रयोग उक्तो भवति । यच्छब्देन हरेः पूर्णत्वस्वातन्त्र्ययोः श्रुतिप्रसि€माह- सदैवेति ।। स्वातन्त्र्यादेरनागन्तुकत्वमुक्तम् । अपूर्णस्यास्वातन्त्र्येण व्याप्त्यनङ्गीकारे बाधकमाह- नहीति ।। हि यस्मात्, स्वतन्त्रः स्वस्यापूर्णतां न कामयीत, ततः पूर्ण इत्यर्थः । इदानीमस्वातन्त्र्यस्यापूर्णत्वेन व्याप्तिमुपपादयति- पूर्ण इति ।। सः जीव इति सम्बन्धेन, भावः । (अत्र, पूर्वपक्षन्यायः 'उपपत्तेः' इत्यनेन, सर्वचेतनानामपूर्णत्वनियमात्परमात्मनोऽपि चेतनत्वात्पूर्णत्वस्यानुपपत्तिरिति सूचितः । सि€न्तन्यायश्च श्रुतिसूचकेन समुच्चायकचशब्देन स्वातन्त्र्यादिलक्षणयुक्तेः सूचनात् स्वातन्त्र्यादिमतः पूर्णत्वनियम इति सूचनेन सूचितः । तदुक्तं तत्वप्रकाशिकायाम्- न केवलं युक्तया सर्वधर्मोपपत्तिः, किन्तु 'गुणाः श्रुताः' इति सर्वधर्मोपपादकश्रुतेश्चेति भावः इति ।) ।। ११ ।।

।। इति द्वितीयाध्यायस्य प्रथमः पादः ।।

उक्तविरोधिनस्तत्तत्समयसि€ाः पूर्वपक्षन्यायाः तद्विरोधिनोऽन्ये इति प्रसि€ा एव ।। १ ।।

।। इति द्वितीयाध्यायस्य द्वितीयः पादः ।।

समयपादीयात्रदकरणानां सर्वेामनुव्याख्याने व्याख्यातत्वात्, न तत्पूर्वपक्षसि€ान्तन्यायाः सङ्ग्रहेणोक्ताः । यद्यपि सङ्ग्रहेणोक्तयभावेऽपि न्यायानां प्रथमाध्यायगताद्यपादद्वये विवरणं कृतम्, तथाप्येतत्पादीयाधिकरणेाु न्यायानां सयमुक्तत्वाद्विवरणं न कृतमित्याशयेनाह- उक्तविरोधिन इति ।। उक्तजगत्कारणत्वादौ, विरोधिनो विरु€ार्थसाधकाः; तत्तत्समयसि€ाः साङ्ख्यचार्वाकादिसि€ान्तोत्प्रेक्षिताः, पूर्वपक्षन्यायाः, तद्विरोधिनः, तत्साध्यविरु€ार्थसाधकाः, अन्ये सि€ान्तन्यायाः । इतिशब्दः प्रकारार्थः । ततश्चोक्तविरोधित्वेन प्रकारेण पूर्वपक्षन्यायाः, तद्विरोधित्वेन प्रकारेण सि€ान्तन्यायाः, अनुव्याख्याने प्रर्कोण सि€ा एव, नतु विवरणमर्हन्तीत्यथर्ः ।

।। इति श्रीमŽायविवरणे भावबोधे द्वितीयाध्यायस्य द्वितीयः पादः ।।

विणोर्जगत्कारणत्वादौ, अधिभूतादिवियश्रुतीनां परसरविरोधपरिहारायायं तृतीयः पादः प्रवृत्तः ।

एतत्पादीयाधिकरणपूर्वपक्षसिद्धान्तन्यायाः, अनुव्याख्यायां सङ्ग्रहेणोक्ताः 'अनुभूतियुक्तिबहुवाग्वैलोम्यं च ततोऽधिकम् । एतत्सर्वं सतः साम्यं द्वारवैयर्थ्यमेव च । दृययुक्तयनुसारित्वमुक्तान्याथर्ाविरोधतः । प्रसिद्धनामस्वीकारे बहुवाक्यानुवर्तिता । लोकदृययनुसारित्वं जीवसाम्यमनादिता । तत्रतत्र परिज्ञानं गुणसाम्यश्रुती तथा । उत्पत्तिमत्त्वं स्वगुणाननुभूत्यल्पकल्पने । नानाश्रुतिश्च वैचित्र्यं युक्तयः पूर्वपक्षगाः ।। व्यवस्थानुपपत्तिश्च स्वातन्त्र्यमनुसारिता । मुख्यताशक्तिमत्त्वं च वैदृष्यं सर्वसङ्ग्रहः । गत्यादिरीशशक्तिश्च सर्वमानविरोधिता । अभीयासिद्धसुव्यक्ती शास्त्रसिद्धिर्विपर्ययः ।। विशेाकारणं चेति सिद्धान्तस्यैव साधिकाः इति । ॐ न वियदश्रुतेः ॐ ।। इत्यत्र 'आत्मन आकाशः सम्भूतः', 'अनादिर्वायमाकाशः' इति श्रुतिविप्रतिपत्त्या, आकाश उत्पत्तिमादावेति सन्देहे, वियदनुत्पत्तिमदेवेति पूर्वः पक्षः, नेति सिद्धान्तः । तत्र 'अनुभूतियुक्तिबहुवाग्वैलोम्यम्' इत्युक्तपूर्वपक्षन्यायं, अर्थात्तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच वियत उत्पत्तिमत्त्वेऽनुभूतियुक्तिबहुवाग्विरोधोऽस्ति व्यवस्थाऽयोगात् ।

।। नच वियत इति ।। उत्पत्तिमत्त्वे, अङ्गीकृत इति शेाः । अवकाशपाकाशस्यानुत्पत्तेः साक्ष्यनुभवसिद्धत्वेन तदुत्पत्तेरनुभवविरोधः । तथा वियदनुत्पत्तिमत्, विभुत्वात्, सम्प्रतिपन्नावदित्यादियुक्तिविरोधः, 'अनादिर्वायमाकाशः' इत्यादिबहुवाग्विरोधश्च । एवंचानुभूत्यादिविरोधेनाकाशस्योत्पत्त्यभावात्, तदुत्पत्तिप्रतिपादकश्रुतिवज्ञगत्कर्तृत्वश्रुतेरप्यप्रामाण्यात्, न विणोजर्गत्कारणत्वं युक्तमिति नेत्यर्थः । तदुक्तत्वेन 'व्यवस्था' इत्युक्तसिद्धान्तन्यायं विवृणोति- व्यवस्थेति ।। उत्पत्तिश्रुतेराकाशपदार्थसर्वविायत्वसम्भवेन मुख्यार्थत्वं, अनादिश्रुतेः कतिपयाकाशपदार्थविायत्वेन गौणत्वमिति व्ययस्थायोगादित्यर्थः । तामेव व्यवस्थां दर्शयति-

अवकाशमात्रस्याव्याकृतात्मकत्वादनुत्पत्तिवचनानां तद्विायत्वं उत्पत्तिवचनानामसितवर्णभूततदभिमानिशरीरविायत्वं पराधीनविशेावत्त्वमात्रविायत्वं चेति व्यवस्था । आकाशो नीलिमोदेति न प्रदेशः कथञ्चन । अभावो हि प्रदेशस्य नह्यत्राभाव इत्यपि इति पैङ्गिश्रुतेः ।। १ ।।

।। अवकाशमात्रस्येति ।। दिग्रूपावकाशस्याव्याकृतात्मकत्वेन कूटस्थत्वात् 'अनादिवर्ा' इत्यनुत्पत्तिवचनानां तद्रूपावकाशपदार्थैकदेशविायत्वमित्यनादित्वस्यामुख्यत्वम् । 'आत्मन आकाशः सम्भूतः' इत्याद्युत्पत्तिवचनानां, असितवर्णत्वेनानुमितोत्पत्तिमद्भूताकाशतदभिमानिविनायकोत्पत्तिमज्जडशरीरविायत्वम् । तथा, अवकाशतदभिमानिभूततदभिमानिपाणां चतुर्णामप्याकाशपदवाच्यानां पराधीनविशेावत्त्वमात्रपोत्पत्तिविायत्वं चेति व्यवस्था । अनेन, 'आत्मन आकाशः सम्भूतः' इत्याद्युत्पत्तिप्रतिपादकवाक्यगताकाशशब्दस्य सर्वविायत्वम्, सम्भूतादिशब्दोक्तोत्पत्तेरुक्तप्रकारेण सर्वत्राकाशशब्दवाच्ये सत्त्वात् । 'अनादिर्वा अयमाकाशः' इत्यादिवाक्यगताकाशशब्दस्य सर्वाकाशपदवाच्यविायत्वम्, भूते कथमप्यसम्भवात्, तस्य स्वपेणात्पत्तेरित्युक्तं भवति । भूताकाशस्यासितवर्णत्वे श्रुतिमाह- आकाश इति ।। नीलिमा नीलपविशियः । प्रदेशः अवकाशः । कथञ्चन स्वपेण, विकृतपेण वा, नोदेतीति सम्बन्धः । अनुत्पत्तौ युक्तिमाह- अभावो हीति ।। यस्य चोत्पत्तिः, तस्य प्रागभावेन भाव्यम् । नच प्रदेशस्य प्रागभावः सम्भवति । अनुत्पत्तिप्रतीतिकत्वादिति भावः । तत्कथमित्यत आह- न ह्यत्रेति ।। अपिपदेन नञोऽनुर्काः । अभावो हि प्रतीयमानः 'अस्य, अत्र' इति प्रतीयते, नतु निराश्रयः । नच प्रदेशाभावस्याश्रयप्रतीतिरुपपद्यते, यदेव 'अत्र' इति निर्दिश्यते, तस्यैव प्रदेशत्वादित्यर्थः । तथाचाकाशोत्पत्त्यनुत्पत्तिश्रुत्योरुक्तमार्गेण व्यवस्थोपपत्तेः,

प्रामाण्यसम्भवाद्युक्तं हरेर्वियदादिजगत्कतर्ृत्वमिति भावः । (अत्र, पूर्वपक्षन्यायः, 'गौण्यसम्भवात्' इति सूत्रेणानुत्पत्तिश्रुतिगतिं वदतोपलक्षणत्वेन सूचितः । सिद्धान्तन्यायश्चाननैव सूत्रेणोक्तः ।) ।। १ ।। ॐ एतेन

मातरिश्वा व्याख्यात: ॐ ।। इत्यत्र, 'तासां वायुर्वत्स: सावा एा देवतानादिर्योऽयं पवते' इति विगानेन मुख्यो वायुरुत्पत्तिमाŽा वेति सन्देहे, अनुत्पत्तिमानेवेति पूर्व: पक्ष:, मुख्यावायुरुत्पत्तिमानेवेति सि€न्त: । तत्र, 'ततोऽधिकमेतत्सर्वम्' इत्युक्तपूर्वपक्षन्यायमर्थात्तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

ततोऽधिकमेतत्सर्वमनुभूत्यादिविरु€त्वं वायूत्पत्ताविति न वायोरेव मुख्यानुत्पत्त्यनुपपत्ते: ।।

।। ततोऽधिकमिति ।। एतच्छब्दपरामृयं दर्शयति- अनुभूत्यादिविरु€मिति ।। आदिपदेन युक्तिबहुवाग्ग्रहणम् । अधिकमित्येनेनाभ्यधिकाशङ्कामाह । तथाहि । नचाकाशानुत्पत्तिश्रुतिवद्वाप्यनादित्वश्रुतेगर्ौणार्थत्वम् । तथा सत्याकाशादिवन्मुख्यवायोरुत्पत्त्यनुत्पत्तिमत्त्वे, तेजोऽबŽाकाशादीनां, 'अथ ह नित्याश्चानित्याश्च तेजोऽबŽान्याकाश इति तान्यनित्यानि' इत्यनित्यत्वमुक्त्वा, 'वायुर्वा व नित्य:' इति वायोर्नित्यत्वोक्तिरयुक्ता स्यात् । किंच वायोरनुत्पत्तेर्गौणत्वं नाम स्वŽ पमात्रवियत्वमिति वक्तव्यम् । तथा सति तस्य सर्वचेतनसाम्येन 'अथ चेतनाश्चाचेतनाश्च तेजोऽबŽान्याकाश इति तान्यचेतनानि' इति तेज:प्रभृतीनामचेतनत्वमुक्त्वा, 'वायुर्वा व चेतन:' इत्युक्तं वायोरतिशयचेतनत्वमयुक्तं स्यात् । 'कुविदङ्ग:' इति ऋगुक्तसर्वदेवोपास्यता च नोत्पत्तिमत्त्वे घटते । तस्योदयनिग्लोचाभावे च कुतो जन्मसम्भव: । एवंविधस्य चोत्पत्त्यङ्गीकारेऽनुभूत्यादिव्याकोप: स्यात् । (ततोऽधिकमेतत्सर्वं अनुभूतियुक्तिबहुवाग्विरु€, वायूत्पत्तावङ्गीकृतायामित्यर्थ: ।) युक्तयश्च 'वायुर्नोत्पत्तिमान् परमनित्यत्वात्, परमचेतनत्वात्, इत्यादिŽ पा द्रयव्या । बहुवाचश्च भायोदाहृता एव । एवं चानुभूतिविरोधेन मुख्यवायोरुत्पत्त्यभावाद् वायूत्पत्तिप्रतिपादकश्रुतिवज्ञगत्कर्तृत्वश्रुतेरप्रामाण्याŽा विणोर्जगत्कारणत्वं युक्तमिति नेत्यर्थ: । कुतो नेत्यतस्त€तुत्वेन 'अनुपपत्ति:' इत्युक्तसि€न्तन्यायं विवृणोति-

वायोरेवानुत्पत्त्यनुपपत्ते: पराधीनविशेवत्त्वमात्रं ह्युत्पत्ति: । तदभाव उभयो: स्वातन्त्र्यं विरु€मेव ।

।। वायोरेवेति ।। अनुत्पत्तिश्रुतेर्ब्रह्मण्येव मुख्यत्वाद्वायोरनित्यत्वव्यापिप्तविभक्तशक्तिमत्त्वाच्चानुत्पत्तेरनुपपत्तेरित्यर्थ: । एवशब्दस्य प्राबल्यादिद्योतकत्वेनानुपपत्तेरेवेति सम्बन्ध: । यद्वा वायोरनुत्पत्तिं वदन् प्रयव्य: 'किं वायुरेवानादि:, ईश्वरोऽपि वा' इति । तत्राद्यं पक्षं दूायति- वायोरेवेति ।। ईश्वरानादित्वप्रतिपादकप्रमाणविरोधेन, वायोरेवेत्यन्ययोगव्यवच्छेदेनानुत्पत्तेरनुपपत्तेरित्यर्थ: । द्वितीये, द्वयोरपि स्वातन्त्र्ापात इति दूाणमभिप्रेत्य तदुपपादयति- पराधीनेति ।। हि यस्माद्वायोरुत्पत्ति: पराधीनविशोलाभŽ पा विवक्षिता, अत: तदभावे पराधीनविशोलाभाभावे, उभयो: वायुविण्वो: स्वातन्त्र्यं स्यात् । नच तदस्त्विति वाच्यमित्याह- विरु€मेवेति ।। उभयो: स्वातन्त्र्यं विरु€मेव, नतु केनापि प्रकारेण घटनीयमित्यर्थ: । तत्कथमित्यत आह-

सर्वोत्तमत्वानुपपत्ते: । उभयोरपि पराधीनत्वप्राप्तेश्चान्योन्यानुरोधे अननुरोधे तु न सर्वेश्वर्यम् । ज्ञानाविस्मृत्या वायावपि व्यवस्थेत्यतिदेश: । अनुपपत्तिस्तु तत्प्रापिका ।

।। सर्वेति ।। उभयोरिति, अत्रापि सम्बध्यते । तदपि कथमित्यत आह- उभयोरपीति ।। वायुविण्वोरन्योन्यानुरोधे, उभयोरपि पराधीनत्वप्राप्ते:, अननुरोधे तु वायोरीश्वरनियामकत्वाभावादीश्वरस्य च वायुनियामकत्वाभावाŽा तयो: सर्वेश्वर्यमित्यर्थ: । ननूक्ताभ्यधिकाशङ्कानिरासाय 'एतेन' इति 'गौण्यसम्भवात्' इत्युक्तव्यवस्थाया अतिदेशो न युज्यते, अकाशाद्यपेक्षया स्वŽ पातिरिक्तस्यानादित्वश्रुतिवियस्यानादिभूतस्याभावात् । स्वŽ पवियत्वेन व्यवस्थाया: पूर्वमेव सि€त्वादित्यत आह- ज्ञानाविस्मृत्येति ।। ज्ञानस्य वृत्तिŽ पस्य, स्वŽ पातिरिक्तस्याविस्मृत्यापरिलोपेन, वायावपि शरीराद्युत्पत्तिस्वŽ पानुत्पत्तिभ्यामाकाशपदवाच्यदेवतासमानयोगक्षेमे, प्रवाहतो वृत्तिज्ञानं स्वŽ पातिरिक्तमादाय व्यवस्था

सम्भवतीति हेतो: 'एतेन' इत्यदिदेशो युक्त इत्यर्थ: । नन्वेवं तर्हि, अनुव्याख्याने व्यवस्थां विहाय कथमनुपपत्ति: सिद्धान्तयुक्तित्वेनोक्ता । 'एतेन' इति सूत्रानुगुणत्वादित्याह- अनुपपत्तिस्त्विति ।। तत्प्रापिकाव्यवस्थाप्रापिका । साक्षात्सिद्धान्तयुक्तिर्व्यवस्थैव । तदभ्युपगमे 'अथैतान्युत्पत्तिमन्ति च प्राण:' इत्याद्यवगतोत्पत्त्यनुत्पत्तिविशिये वायौ मुख्यानुत्पत्यनुपपत्ति: कारणत्वेनोक्तेत्यर्थ: । नन्वनुपपत्तेर्व्यवस्थाप्रापकत्वं पूर्वाधिकरणेऽपि वक्तव्यमेव । तत्र मुख्यवायोरिव भूताकाशाभिमानिनो देहोत्पत्तिमत्त्वेन मुख्यानुत्पत्त्यनुपपत्तावपि, अव्याकृताकाशचित्प्रकृत्यो: कथं मुख्यानुत्पत्त्यनुपपत्ति:, देहोत्पत्तेरप्यभावादित्याह-

पराधीनविशेवत्त्वमात्रं त्वव्याकृतकाशस्य तदभिमानिप्रकृतेश्-च सममेव ।। २ ।।

पराधीनविशेोति ।। मुख्यवायौ पराधीनविशेावत्त्वमपि मुख्यानुत्पत्त्यनुपपत्तिहेतुत्वेन विवक्षितम्, तन्मात्रं तु देहाद्युत्पत्तिरहितयोरवकाशचित्प्रकृत्योश्-च सममेव । तादृशोत्पत्तिमादाय मुख्यानुत्पत्त्यनुपपत्ते: सत्त्वाद्युक्तमनुपपत्तेर्व्यवस्थाप्रापकत्वं पूर्वाधिकरणेऽपीति भाव: । यद्वा, ननु किमनेन, वायूत्पत्तिश्रुति: शरीरोत्पत्तिवाया, अनुत्पत्तिश्रुतिर्ज्ञानविपरीतलोपवायेति व्यवस्थाङ्गीकारेण, वायूत्पत्तिश्रुति: पराधीनविशेावत्त्वमात्रवाया, तदनुत्पत्तिश्रुतिस्तु देहाद्यनुत्पत्तिवायेति व्यवस्था कुतो नाङ्गीकार्या, पूर्वाधिकरणसिद्धव्यवस्थाविलक्षणत्वादित्यत आह- पराधीनेति ।। भवेदेवं यदीयं व्यवस्था पूर्वाधिकरणसिद्धव्यवस्थाविलक्षणा स्यात् । नचैवम् । भूताकाशतदभिमानिनोरिव पूर्वाधिकरणेऽ व्याकृताकाशतदभिमानिनोरपि वियच्छब्देन विवक्षितत्वात्, तयोश्-च शरीरादितोऽप्युत्पत्त्यसम्भवेन पराधीनविशेावत्त्वमात्रेण व्यवस्थाया वाच्यत्वेन, अस्या: पूर्वाधिकरणसिद्धव्यवस्थावैलक्षण्याभावात् । अत एवोक्तं तदधिकरणीयतत्त्वप्रकाशिकायाम्- 'आकाशपदेन भूतावकाशतद्देवता उच्यतन्ते' इति, अवकाशतदभिमानिनोरप्यस्ति पराधीनविशेालाभलक्षणोत्पत्ति:' इति च । अत एतदधिकरणवैयर्थ्यायोक्तविधैव व्यवस्थाङ्गीकार्यैवेति भाव: । एवंच वायोर्मुख्यानुत्पत्त्यनुपपत्ते: पूर्ववद्वयवस्थया श्रुतिप्रामाण्यसम्भवाद्युक्तं विणोजर्गत्कारणत्वमिति हृयदम् । (अत पूर्वपक्षसिद्धान्तन्यायावप्यतिदेशेनैव पूर्वाधिकरणत्वसूचितौ ज्ञातव्यौ ।) ।। २ ।। ॐ असम्भवस्तु सतोऽनुपपत्ते: ॐ ।। इत्यत्र, 'असत: सदजायत, सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतिविभागेन, ब्रह्मोत्पत्तिमŽावेति संशये, उत्पत्तिमदेवेति पूर्व: पक्ष:, नेति सिद्धान्त: । तत्र (सदेव सोम्येदमग्र आसीदित्यादिश्रुतिविभागेन) 'सत: साम्यम्' इत्युक्त पूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच सत: पराधीनविशेावत्त्वम् स्वातन्त्र्यात् ।। ३ ।। नच विणोरेव तेजस उत्पत्तौ द्वारकारणवैयर्थ्यम् ।

।। नच सत इति ।। अस्त्येव सत: परब्रह्मण: उत्पत्ति: । न चानादित्वश्रुतिविरोध: । अनादित्वेऽप्यनादिभूतयोरपि नभोनभस्वतोरुत्पत्तिवत्, स्वŽ पलाभाद्युत्पत्त्यसम्भवेऽपि पराधीनविशेावत्त्वŽ पोत्पत्त्यङ्गीकारात् । तथा चोत्पत्तिमत्त्वेनाकाशादिना साम्याद्ब्रह्मणो न जगत्कर्तृत्वमिति पूर्व: पक्षो नेत्यर्थ: । कुतो नेत्यतस्तद्धेतुत्वेन 'स्वातन्त्र्यम्' इत्युक्तसिद्धान्तन्यायं विवृणोति- स्वातन्त्र्यादिति ।। गगनपवनादीनामस्वातन्त्र्यादेवोत्पत्तिरिति भाव: । एवंच ब्रह्मण: स्वातन्त्र्येणानुत्पत्त्युपपत्तेर्नोत्पत्तिमत्त्वेनाकाशादिसाम्यमिति युक्तं जगत्कारणत्वमिति हृदयम् । (अत्र, पूवर्पक्षन्याय एवशब्दार्थेन तुशब्देन सूचित: । सिद्धान्तन्यायश्-च 'सत:' इत्यनेन सूचित: ।) ।। ३ ।। ॐ तेजोऽतस्तथा ह्याह ॐ ।। इत्यत्र, 'वायोरग्निस्तेजोऽसृजत' इति श्रुतिविगानेन, तेज: किं वायोर्जायते, ब्रह्मणो वेति सन्देहे, वायोरिति पूर्व: पक्ष:, ब्रह्मण इति सिद्धान्त: । तत्र 'द्वारवैयर्थ्यम्' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति - नच विणोरिति ।। एवेति वाय्वपेक्षाराहित्यमुच्यते । तथाचायमर्थ: । 'वायोरग्नि:' इति श्रुतिप्रामाण्यनिर्वाहार्थं तेजसो वायुद्वारा परमात्मजातत्वं वदन्प्रयव्य: ब्रह्म किं वायुद्वारमन्तरेण स्रयुमीये, नवेति । द्वितीये, ब्रह्मवायूभयकारणत्वापत्त्याद्य एव पक्ष: स्वीकार्य: । तत्र च विणोरेव वाय्वनपेक्षया तेजस उत्पत्तावङ्गीकृतायां वायुŽ पद्वारकारणवैयर्थ्यम् । तथाच द्वारवैयर्थ्यात्तेजसो वायुब्रह्मोभ-

ायकारणकत्वमिति न ब्रह्मण एव प्राधान्येन कर्तृत्वमिति नेत्यर्थः । कुतो नेत्यतस्तत्वेन 'अनुसारिता' इत्युक्तसिद्धान्तन्यायं विवृणोति-

द्वारमनुसृत्यैव विणेः प्रवृत्तेः ।। ४ ।। नच तेजस एवापामुत्पत्त्यङ्गीकारे धर्मात्स्वेदादिदृययनुसारित्वमिति गुणाधिक्यम् ।

।। द्वारमिति ।। तेजआदिकं प्रति वाय्वादेरकारणत्वेऽपि वाय्वादिद्वारमनुसृत्यैव विणोरिच्छयैव लीलया तेजःप्रभृतिसर्जनार्थं प्रवृत्तेः श्रुत्यादिसिद्धत्वादित्यर्थः । एवं (च)शक्तत्वेऽपि ब्रह्मणः, श्रुतिसिद्धत्वेन द्वारानुसाराद्युक्तं सर्वकर्तृत्वमिति भावः । (अत्र पूर्वपक्षन्यायो वायुद्वारा तेजसो ब्रह्मजातत्वमिति सिद्धान्तयता द्वारवैयर्थ्यादुभयकारणत्वमिति सूचनेन सूचितः । सिद्धान्तन्यायश्च 'तथा ह्याह' इत्यनेन विणोर्वायुद्वारा तेजसो जनकत्वमशेाश्रुत्यनुसारीत्यर्थकेन सूचितः ।) ।। ४ ।। ॐ आपः ॐ इत्यत्र, 'अग्नेरापस्तदपोऽसृजत' इति श्रुतिविगानेन, तेजसोऽनन्तरं प्राप्ता आपः किं तेजसो जायन्ते, ब्रह्मणो वेति सन्देहे, तेजस इति पूर्वः पक्षः, ब्रह्मण इति सिद्धान्तः । तत्र, 'दृययुक्तयनुसारित्वम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच तेजस इति ।। द्वारकारणत्वव्यावृत्त्यर्थं एवशब्दः । ततश्च द्वारतामन्तरेण, स्वातन्त्र्येण च तेजस अपामुत्पत्त्यङ्गीकारे, धर्मात्स्वेदादिदृयेस्तदनुसारित्वं, दृयिमूलिका या, 'विमता आपस्तेजसो जायन्ते, अम्वात्, स्वेदादिवत्' इति युक्तिः, तदनुसारित्वमिति हेतोः 'अग्नेरापः' इति श्रुतेरुक्तयुक्तियुक्तत्वगुणयोगेन,

आधिक्यं प्राबल्यम् । यद्वा, इति शब्दः प्रकारार्थः । तदनुसारित्वमित्येवंऽ पगुणेनाधिक्यं प्राबल्यमित्यर्थः । 'युक्तयनुसारित्वम्' इति वक्तव्ये, यत् 'दृयिः' इत्युक्तमनुव्याख्याने तदभ्यधिकाशङ्काप्रदर्शनार्थम् । अन्यथा 'तेजोऽतस्तथाह्याह' इत्यनेन न्यायेन 'अग्नेरापः' इति श्रुतेरपि निर्णीतत्वाऽ पूर्वपक्षोत्थापकत्वम् । अत एव दृयेरेव प्राधान्यादत्र दृययनुसारित्वादपां साक्षात्तेजोजातत्वाऽ ब्रह्मणः सर्वकारणत्वमिति च नेत्यर्थः । कुतो नेत्यतस्तत्वेन 'मुख्यतः' इत्युक्तसिद्धान्तन्यायं विवृणोति-

मुख्यार्थपरित्यागप्राप्तेः ।। ५ ।।

।। मुख्यार्थेति ।। 'इदं सर्वमसृजत' इति, 'कर्ता सर्वस्य वै विणुः' इति श्रुतिस्मृतिगतसर्वशब्दस्यासङ्कुचितसर्वऽ पमुख्यार्थपरित्यागप्राप्तेरित्यर्थः । उक्तयुक्तयुपेतायाः 'अग्नेरापः' इति श्रुतेस्तेजसो द्वारकारणत्वप्रतिपादकत्वेन सावकाशत्वमिति भावः । ततश्च 'इदं सर्वमसृजत' इत्यादिवाक्यगतसर्वशब्दस्य सकलपदार्थग्रहणमुख्यतालाभात्सर्वजगत्कर्तृत्वं विणोर्युक्तमिति भावः । (अत्र पूर्वपक्षन्यायोऽपि शब्दप्रयोगादेव सूचितः । अथवा पृथगधिकरणारम्भात्सूचितः । सिद्धान्तन्यायश्च पूर्वसूत्रात् 'अतस्तथा ह्याह' इत्यनुवृत्तौ सत्यां, 'स इदं सर्वमसृजत' इति श्रुतिप्रदर्शकेन 'तथा ह्याह' इत्यनेन सूचितः ।) ।। ५ ।। ॐ पृथिव्यधिकारऽ पशब्दान्तरादिभ्यः ॐ ।। इत्यत्र, 'ता आप ऐक्षन्त बह्वयः स्याम प्रजायेम हीति । ता अऽामसृजन्त' 'अब्दयः पृथिवी' इति श्रुतिविगानेनाऽपः किमऽास्य द्वारकारणमुत पृथिव्या इति सन्देहे, नापः पृथिव्याः कारणं, नाप्यऽास्येति पूर्वः पक्षः, पृथिव्याः कारणमिति सिद्धान्तः । तत्र, उक्तान्यार्थाविरोधतः, प्रसिद्धनामस्वीकारे बहुवाक्यानुवर्तिता' इत्युक्तं पूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नचाब्दयो वाऽामुत्पद्यत इत्याद्युक्तप्रसिद्धाऽाख्यान्यार्थाविरोधेन प्रसिद्धाऽानामस्वीकारे बहुवाक्यानुवर्तितेति गुणः । अऽाशब्दस्य प्रयोगबाहुल्यात्पृथिव्यामपि शक्तिमत्त्वात् ।

।। न चाब्दय इति ।। 'इत्याति' इत्यादिपदेन 'ता अऽामसृजन्त' 'ता आपोऽऽामसृजन्त' इत्यादिग्रहणम् । नापः

पृथिव्या: कारणं, नाप्यŽामय:, उदाहृतश्रुतिद्वयस्य परसरविरु€त्वात् । निरवकाशत्वेनान्यतरग्रहणायोगात् । नच 'ता अŽामसृजन्त' इत्यादिश्रुतिगताŽाशब्दस्य पृथिव्यर्थत्वेन तस्या: सावकाशत्वम् । 'ता अŽामसृजन्त' इत्यादिश्रुत्युक्त:, प्रसि€ž पोऽŽाख्य:, पृथिवीसकाशादन्योऽथर्ो य:, तदविरोधेन तद्वाचकत्वेनेति यावत्, प्रसि€स्य अŽामित्यस्य नाम्न: स्वीकारे, 'तस्माद्यत्र क्व च र्वाति तदेव भूयिष्ठमŽां भवति' 'अद्भय एव त€यŽाद्यं जायते' इत्यादिबहुवाक्यानुर्वतिता, तथा 'अŽामशितं त्रेधा विधीयते' इति प्रसि€ाŽालिङ्गप्रतिपादकबहुवाक्यानुर्वतितेति गुणलाभादित्यर्थ: । उपलक्षणमेतत् । नापि पृथिवीशब्दस्याŽाार्थत्वेन, 'अद्भय: पृथिवी' इति श्रुते: सावकाशता, अद्भय एवाŽासृययङ्गीकारे, 'अद्भय: पृथिवी, पृथिव्या ओाधय:, ओाधिभ्योऽŽाम्' इति विरोधात् इत्यपि ग्राह्यम् । एवंच श्रुतिद्वयस्याप्रामाण्याŽा तत्समन्वयेन विणोर्जगत्कारणत्वं सि€यतीति नेति भाव: । कुतो नेत्यतस्त€तुत्वेन 'शक्तिमत्त्वम्' इत्युक्तसि€ान्तन्यायं विवृणोति- अŽाशब्दस्येति ।। 'पृथिव्यामपि' इति पूर्वोत्तराभ्यां सम्बध्यते । अपिपदेनाŽासमुच्चय: । 'आपश्च पृथिवी चाŽाम्' 'पृथिवी वा अŽाम्' 'ता आपोऽŽामसृजन्त' 'पृथिवी वा अŽाम्' इत्यादिश्रुतावŽा इव पृथिव्यामप्यŽाशब्दस्य प्रयोग৬ाहुल्यात्' प्रयोगबाहुल्यस्य शक्तिकल्पकत्वात्पृथिव्यामŽाशब्दस्य शक्तिमत्त्वात् 'ता अŽामसृजन्त' इत्यत्राŽाशब्देन पृथिव्येवोच्यत इत्यपां पृथिवीं प्रत्येव द्वारकारणत्वमित्यर्थ: । अनेन 'शब्दान्तरादिभ्य:' इति सौत्रो हेतुर्विवृत: । अŽाश৬दस्योभयत्रापि शक्तिसद्भावाविशेाात्पृथिवी(मात्र)परत्वे को विशेाहेतुरित्यत: 'अधिकारž प:' इति सूत्रोक्तं, 'शक्तिमत्त्वं च' इत्यनुव्याख्यानगतचशब्दोक्तन्यायमाह-

अधिकारादीनां निरवकाशत्वाच्च । बहुवाक्यानुरोधोऽप्यत्रैवेति ।। ६ ।।

।। अधिकारादीनामिति ।। 'तत्तेजोऽसृजत तदपोऽसृजत । तासां त्रिवृतं त्रिवृतमेकैकामकरोदित्यादेरस्य प्रकरणस्य भूताधिकारत्वात्, आदिपदोक्तस्य काण्र्यप्राचुर्यž पपृथिवीलिङ्गादे: प्रसि€ाŽा निरवकाशत्वाच्च 'ता अŽामसृजन्त' इत्यत्राŽाशब्देन पृथिव्येवोच्यत इत्यर्थ: । ननु, पूर्वपक्षे बहुवाक्यानुर्वतित्वस्योक्तत्वादनिर्णय इत्यत आह- बहुवाक्येति ।। अत्र सि€ान्ते । एवेति वदता पूर्वपक्षे बहुवाक्यानुर्वतित्वस्यासि€रुक्ता भवति, 'अद्भयो वाŽामुच्यते' इत्यादावŽाशब्दस्य पृथिवीपरत्वात् 'तदेव भूयिष्ठमŽां भवति' 'अŽामशितम्' इत्यादौ पार्थिवार्थत्वात् । एवंचाŽाशब्दस्य पृथिव्यामपि शक्तिमत्त्वेनाŽाश्रुते: पृथिवीपरत्वेन श्रुतिविरोधाभावादपां पृथिवीकारणत्वसि€र्युक्तं विणोर्वस्त्वन्तरद्वारा जगत्कारणत्वमिति भाव: । (अत्र पूर्वपक्षन्याय: 'शब्दान्तर' इति 'आपश्च पृथिवी चाŽाम्' इत्यादिपृथिवीशब৬दोपेतश्रुत्यन्तरपरशब्दप्रयोगेन,

"tĪô˜ĪĪ†wĪ Jò ZĪ' <t™ĪĪŪzù ĪĻŪyĪŗĪŌ®Ī–
zùœúŪḍþtĪĪĪŢŪtĪŗ™ĪĪŗĪtĪÊ ĪĪtôĪN̲ŪZĪtĪ: * ŪôĪ€ùĪ tĪ ™ĪĪ™Ī®›ZĪ
"+Ī Ī®›ZĪ ĪĻŪyĪŗĪŌ ZĪĪŽĪ˜Īṃ' <t™ĪŪ—
ĪŒĪĪ ĪžüĪĪŢŪtĪ ĪœúĪtĪœú®Ī–zṢùĪ ôĪN̲ŪZĪtĪ: *
ZĪ®Ī–zùôĪN̲ŪZĪtĪôtŗĪŪŒĪFòĪœúžüĪṢt™ĪĪṢĪĪṢEuĪ: *) ** 6 ** $ tĪzùŪ—
ĪŒ™ĪĪĪĪzṢùŗĪ tĪŢ tĪŪīôWóĪtôĪ: $ ** <t™ĪwĪ, "™Īt ĪĻ™Ī t™ĪŪ
—ĪôĪţŪŗĪ®ĪL̲tĪ ûǂùĪṢ ˜ĪĪŪŗĪ®ĪĪ tĪFò:' <ŪtĪ ĪĪŢŪtĪŪŗĪOĪĪ ĪṢĪĪŪŒĪ
—ĪN̲tĪĪŪŒĪzGh̲ùŗĪĪŪ Ī ṚFò —ĪOĪŗĪtĪĪ āôŌ™Ī tĪṢ, ûǂṢùsĪ ŗĪṢŪtĪ
ôĪzṢùḍSþ, ûǂṢùsĪGh̲ŗĪṢŪtĪ ĪN̲ŗĪÊ: ĪKĪ:, —ĪOĪŗĪtĪGh̲ŗĪṢŪtĪ ŪôĪ€ùĪ tĪ: *

tĪwĪ, "āôĪṢFò‹ù™Ī™Ī℠ĪṬôĪĪŪœúṭ℟Ī˜Īṃ'
<t™ĪṬEuĪ℠ĪN̲℟ĪÊ℠ĪKĪ℠™ĪĪ™Ī˜ĪyĪĪÊuĪtôĪĪŒ™Ī℠ĪĻzù®ĪÊ℠Ī℠ĪN̲℟ĪÊFṭò
Ū℟Ī℟ĪĻs℟Ī℠℠ĪĻŪtĪŪKĪ℠ĪŪtĪ -

नच रुद्रादीनां लयकारित्वाङ्गीकारे, पितुरन्यस्यैव मारकत्वदृयेर्लोकदृययनुसारित्वमिति गुण: । लोकपितृवैŽ प्याद्वि-णोर्यथावाक्यमङ्गीकारोपपत्ते: । अन्यथा न विणोरन्येविलयकृŽा विणोरन्यो विमुक्तिद: इत्यादिश्रुतिविरोधात् ।

।। नच रुद्रादीनामिति ।। आदिपदेन यमादीनां ग्रहणम् ।। पितुरन्यस्येति ।। विणोस्तु जगदुत्पादकत्वेन पितृत्वादिति भाव: ।। लोकेति ।। लोके च पितुरन्यस्यैव मारकत्वदर्शनादित्यर्थ: । एवंच लोकदृययनुसारित्वात्सर्जकविणोरन्यस्यैव रुद्रादे: संहर्तृत्वेऽङ्गीकार्ये, विणो: संहारकत्वादिश्रुतेरप्रामाण्याŽा जगत्कतर्ृत्वादि तस्य युक्तमिति नेत्यर्थ: । त€तुत्वेन 'वैŽ प्यम्' इथ्युक्तसि€न्तन्यायं विवृणोति - लोकेति ।। विणोमर्मत्वादिदोाराहित्येन लोकपितृविलक्षणत्वात्, 'इदं सर्वं विलापयति' ,'स्नया पाता च संहर्ता स एको हरिरीश्-वर:' इत्यादिश्रुतिस्मृतिवाक्यमनतिक्रम्य विणोरेव संहर्तृत्वाङ्गीकारोपपत्तेरित्यर्थ: । ननु, रुद्रादीनामेव संहर्तृत्वाङ्गीकारे बाधकाभावात्किमिति लोकवैलक्षण्यं विणो: कल्पनीयमित्यत आह- अन्यथेति ।। मुक्तेरपि लयविशोत्वात् 'न विणोरन्यो विमुक्तिद:' इति श्रुतिशोादाहरणम् । यद्वक्ष्यति 'विमुक्तिलययोविर्शोाभावाच्च' इति । ननु, 'रुद्रो माविशान्तक:' इत्यादिवाक्यानां का गतिरित्यत आह-

रुद्रस्य तु क्वचित्संहारद्वारत्वेनैव तद्वाक्यानां सावकाशत्वात् ।। ७ ।। नच लोकानुसारित्वम् । क्रमादुत्पद्यते, क्रमाद्विलीयते, क्रमेणैवोत्पत्तिर्विलयश्-च क्रमेणैवास्योत्पत्तिविलयौ इत्यादिलोकानुसारिबहुवाक्यानुरोधश्-च यथोत्पत्तिलये ।

।। रुद्रस्य त्विति ।। रुद्रादीनां त्वित्यर्थ: । संहारद्वारत्वमपि न सर्वत्रेति क्वचिदित्युक्तम् । ततश्-च वि-णोर्लोकपितृवैŽ प्याद्युक्तं तस्यैकस्यैव सृयिसंहारादिकर्तृत्वमिति भाव: । (अत्र, पूर्वपक्षन्याय: 'स:' इत्युपादकत्वेन प्रकृतपरमात्मपरामर्शकेन, तस्यसंहारकतर्ृत्वोक्तया सूचितो भवति । सि€न्तन्यायश्-च, एवकारार्थकतुशब्देनोत्पादकस्यैव संहर्तृत्वोक्तया सूचित: । अथवा विशोार्थकतुशब्देनोक्त: ।) ।। ७ ।। ॐ विपर्ययेण तु क्रमोऽत्र उपपद्यते च ॐ ।। इत्यत्र 'अत एव हीदं परात्क्रमादुत्पद्यते क्रमाद्विलीयते', 'अक्षरात्परमादेव सर्वमुत्पद्यते क्रमात् । व्युत्क्रमाद्विलयश्-चैव' इति श्रुतिविगानेन, अधिभूतादीनि किमुत्पत्तिक्रमानुसारेण लीयन्ते, व्युत्क्रमेण वेति सन्देहे, उत्पत्तिक्रमेणैव (लय:) इति पूर्व: पक्ष:, व्युत्क्रमेणैवेति सि€न्त: । तत्र 'लोकदृययनुसारित्वम्' इति प्रागुक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच लोकेति ।। लोके उत्पत्तिक्रमानुसारेणैव लयस्य प्रायिकत्वादिति भाव: । न्यायं प्रकारान्तरेण विवृणोति- क्रमादुत्पद्यत इति ।। अत एव लोकानुसारीत्युक्तम् । यथोत्पत्तिक्रमेणैव लये । एवंच लोकदृययनुसारिक्रमश्रुतिविरोधेन व्युत्क्रमश्रुतेरप्रामाण्यवत् श्रुत्यन्तरस्याप्यप्रामाण्याŽा वि-णोर्जगत्कारणत्वं युक्तमिति च नेत्यर्थ: । त€तुत्वेन 'वैŽ प्यम्' इत्युक्तमेव सि€न्तन्यायं पूर्वपक्ष्युदाहृतश्रुते: श्रुत्यैव सावकाशत्वं वदन्विवृणोति-

द्विविध: क्रम उद्दियो व्युत्क्रमोऽनुक्रमस्तथा । सृयावन्यो लये चान्य इति वेदविदो विदु: । इति श्रुते: क्रमवाक्यस्य सावकाशत्वाद्वैŽ प्यं बहुप्रकारत्वं क्रमस्य ।। ८ ।।

।। द्विविध इति ।। अत्र 'वैŽ प्यम्' इत्यनुवादेन 'बहुप्रकारत्वम्' इति व्याख्यातम् । अनेकप्रकारत्वमित्यर्थ: । अनेन, Ž पशब्द: प्रकारवचन:, द्वि(वि)विधं अनुक्रमत्वव्युत्क्रमत्वाख्यं, Ž पं यस्येति विŽ पम्, तस्य भावो वैŽ प्यमिति न्यायो विवृतो भवति । अधिभूतादि, उत्पत्तिक्रमवैपरीत्येनैव लीयते, नच लोकानुसारिबहुवाक्यविरोध:, क्रमस्य व्युत्क्रमानुक्रम

भेदेनानेकप्रकारत्वात् 'क्रमाद्विलीयते' इति वाक्यस्य व्युत्क्रमपरत्वेन सावकाशत्वात् । नच, क्रमानेकत्वे मानाभाव:, द्विविध: इति श्रुते: इत्यर्थ: । कुतो नेत्यतस्तावत्पूर्वपक्ष्युदाहृतश्रुते: सावकाशत्वं प्रदर्शयति -द्विविध इति ।। व्युत्क्रमानुक्रमभेदेन क्रमस्य द्वैविध्यात् क्रमवाक्यस्य व्युत्क्रमपरत्वेन सावकाशत्वात्, यथोत्पत्तिविलये न बहुवाक्यानुरोध इत्यर्थ: । सावकाशत्वप्रकारमेव व्यञ्जयŽयायमनूद्य विवृणोति- वैŽ प्यमिति ।। बहुप्रकारत्वं अनेकप्रकारत्वमित्यर्थ: । एवंच क्रमस्य व्युत्क्रमानुक्रमभेदेन वैŽ प्याद्वयुत्क्रमेण लयेऽपि श्रुतिप्रामाण्योपपत्तेर्युक्तं विणोर्जगत्कर्तृत्वमिति भाव: । (अत्र पूर्वपक्षन्याय: 'उपपद्यते च' इत्यनेन निोध्यतया सूचित: । सि€न्तन्यायश्च 'उपपद्यते' इत्यनेनैव सूचितो भवति ।) ।।

८ ।। ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेŽाविशेाात् ॐ ।। इत्यत्र 'अक्षरात्परमादेव' इति श्रुत्या, 'प्राणान्मनो मनसश्च विज्ञानं, यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि' इति लिङ्गदर्शनेन च, किमधिभूतादीनि सर्वाण्युत्पत्तिक्रमवैपरीत्येन लीयन्ते, कानिचित्क्रमेणापि वेति सन्देहे, सर्वेाां न व्युत्क्रमेण लय:, किन्तु केाां चित्क्रमात्के-ाञ्चिद्वयुत्क्रमादिति पूर्व: पक्ष:, सर्वेाां व्युत्क्रमेणैव लय इति सि€न्त: । अत्र लोकदृययनुसारित्वमिति प्रागुक्तमेव न्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति -

नच केाञ्चित्क्रमाल्लय: केाञ्चिद्वयुत्क्रमाल्लय इत्यङ्गीकारे लोकदृययनुसारदन्तरा विज्ञानमनसी व्युत्क्रम: । सर्वं वा एतत्क्रमादुत्पद्यते व्युत्क्रमाल्लीयते इति श्रुतौ सर्वस्यापि व्युत्क्रमाल्लयसङ्ग्रहात् । तल्लिङ्गस्य तु चराचरव्यापाश्रयविज्ञानादिवियत्वेनैव सावकाशत्वात् ।। ९ ।।

।। नच केाञ्चिदिति ।। लोकदृययनुसारादिति । लोके पितु: पुरत: पुत्रस्य, पुत्रस्य पुरत: पितुर्मरणदर्शनादित्यर्थ: । व्युत्क्रम: इत्यनेन 'अन्तरा विज्ञानमानसी क्रमेण' इत्यत्र क्रमशब्दो व्युत्क्रमपर इत्युक्तं भवति । नन्वेतत् सम्भावकमेवोक्तं, न निश्चायकमितिचेत्सत्यम्, तथापि 'प्राणान्मनो मनसश्च विज्ञानम्' इति मनस्तत्त्वोत्पŽास्य विज्ञानतत्त्वस्य, 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छज्ज्ञान आत्मनि' इति मनस्तत्त्वलयानन्तरमेव लयोक्तयन्यानुपपत्तिविलयनिश्चय इति । एवंच लोकदृययनुसारिलिङ्गदर्शनेन विरु€ाया: श्रुतेरप्रामाण्याŽा वि-णोर्जगत्कारणत्वं युक्तमिति च नेति भाव: । त€तुत्वेन 'सर्वसङ्ग्रह:' इत्युक्तसि€न्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- सर्वं वा एतदिति ।। ननूक्तलिङ्गबलात् 'सर्वं वा' इति श्रुतिगतसर्वशब्दस्यार्थसङ्कोच: क्रियत इत्यत आह- तल्लिङ्गस्य त्विति ।। तस्य विज्ञानमनसोर्यथोत्पत्तिविलयसाधकस्येत्यर्थ: । आदिपदेन मनोग्रहणम् । श्रुतिद्वयान्यथानुपपत्तिर्हि लिङ्गम् । तत्र, यद्यपि 'यच्छेद्वाङ्मनसी प्राज्ञ:' इत्येव तत्त्वलयक्रम:, तथापि नायमुत्पत्तिक्रम: । नच 'मनसश्च विज्ञानं' इति श्रुतिविरोध:, तस्या: चराचरवियकवृत्तिŽ पज्ञानस्य, मनोŽ पेन्द्रियजन्यत्वप्रतिपादकत्वेनैव सावकाशत्वादित्यर्थ: । एवंच 'सर्वं वा' इति श्रुतौ, लीयमानस्य सर्वस्यापि सङ्ग्रहाद्वयुत्क्रमेणैव लयसि€: श्रुतिप्रामाण्याद्युक्तं विणोर्जगत्कारणत्वमिति भाव: । (अत्र पूर्वपक्षन्याय: 'अन्तरा विज्ञानमनसी क्रमेण' इति के-ाञ्चित्क्रमाल्लयस्य, केाञ्चिद्वयुत्क्रमाल्लयस्योक्तया सूचित: । अन्यथा 'विज्ञानमनसो: क्रमेण' इत्यवक्ष्यत् । सि€न्तन्यायश्च 'अविशेाात्' इत्यनेन सूचित: ।) ।। ९ ।। ॐ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य: ॐ ।। इत्यत्र, 'नित्यो नित्यानां, अन्तस्तमसि निलीन:' इति श्रुतिविरोधेन, परमात्मा लीयते, न वेति सन्देहे, लीयत इति पूर्व: पक्ष:, न लीयत इति सि€न्त: । तत्र 'जीवसाम्यम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूवर्कं विवृण्वन्प्रतिक्षिपति-

नच चेतनत्वेन साम्याद्विणोरपि देहलय: ।

।। नच चेतनत्वेनेति ।। साम्यात् जीवेनेति शेा: । विणोरित्यत्रापि सम्बध्यते । तथाच 'विणुर्लयवान्' चेतनत्वाज्जीववत्

इत्युक्तं भवति । स्वŽ पलयस्यासम्भवादहेत्युक्तम् । (अनेन सौत्र: प्रतिज्ञांशो 'नाम्ना देहतो लीयते' इति व्याख्यातो भवति ।) नच 'असम्भवस्तु सतोऽनुपपत्ते:' इत्यत्र, स्वातन्त्र्यहेतुता परमात्मनोऽनुत्पत्तेरुक्तत्वात्कथं लय इति वाच्यम्, स्वतन्त्रस्य लीलया विग्रहग्रहणपरित्यागोपपत्त्याधिकाशङ्क्यैतदधिकरणोत्थानादिति भाव: । एवंच चेतनत्वेन जीवसाम्येनेश्-वरस्य लयसि€:, प्रबललयश्रुतिविरोधेन नित्यत्वश्रुतेरप्रामाण्यात्, न विणोर्जगत्कारणत्वं युक्तमिति च नेत्यर्थ: । कुतो नेत्यत:, तत्र साक्षा€तुप्रदर्शनपूर्वकं, तत्साधकत्वेन 'सर्वसङ्ग्रह:' इत्युक्तमेव सि€न्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति-

सर्वे वा एते चिदात्मनो ब्रह्मंल्लयमनुप्राप्य विणोरुदरे संविशन्तीति तस्योदरे सर्वसङ्ग्रहणादिश्रुतिभ्यो नित्यत्वावगमात्तद्देहस्य । अश्रुतत्वाच्चान्यथा ।। १० ।। नचानादित्वाज्जीवस्य पराधीनविशेाप्राप्ति: ।

।। सर्वे वा इति ।। ब्रह्मन् ब्रह्मणि, चतुर्मुखे । सर्वसङ्ग्रहणादिति ।। प्रलये विणोरुदरे सर्वेामपि चिदात्मनां सङ्गृहीतत्वप्रतिपादकश्रुतिभ्य इत्यर्थ: । विणुदेहस्यानित्यत्वे, प्रलये सर्वस्य तदुदरस्थत्वं न स्यादित्यर्थ: । (अनेन 'नित्यत्वाच्च' इति सौत्रो हेतुर्व्याख्यात: ।) साधकाभावाŽा देहलय इत्याह- अश्रुतत्वादिति ।। अन्यथा लयत्वेन, निलीनश्रुतेरपि हितत्वपरत्वात्, चेतनत्वयुक्ते: श्रुतिविरोधेनाप्रामाण्यादित्यर्थ: । एवंच प्रलये विणोरुदरे सर्वसङ्ग्रहणात्तद्देहस्य लयाभावाद्युक्तं विणोर्जगत्कारणत्वमिति भाव: । (अत्र पूर्वपक्षन्याय: 'श्रुते:' इति जीवाद्विशेाोक्तया सूचित: । सि€न्तन्यायश्-च 'नित्यत्वाच्च ताभ्य:' इत्यनेन सर्वसङ्ग्रहादिश्रुतिभ्यो नित्यत्वावगमादिति प्रतिपादयता सूचित: ।) ।। १० ।। ॐ ज्ञोऽत एव ॐ ।। इत्यत्र, 'नित्यो नित्यानाम्' 'सर्व एते चिदात्मानो व्युच्चरन्ति' इति श्रुतिवि भागेन जीव: किमुत्पद्यते नवेति सन्देहे, नोत्पद्यत इति पूर्व: पक्ष:, उत्पद्यत इति सि€न्त: । तत्र 'अनादिता' इत्युक्त पूर्वपक्षन्यायं

तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नचानादित्वादिति ।। जीवस्येति पूर्वोत्तराभ्यां सम्बध्यते । जीवस्य स्वŽ पोत्पत्त्यभावस्य सि€न्तिनाप्यङ्गीकृत्वाद्विवादविायप्रदर्शनार्थं पराधीनविशेाप्राप्तिरित्युक्तम् । नचाकाशादौ व्यभिचार:, तस्य पक्षसमत्वादिति भाव: । एवंच जीवस्यानादितयोत्पत्त्यसम्भवाŽा सर्वकर्तृत्वं विणोर्युक्तमिति च नेति भाव: । त€तुत्वेन 'सर्वसङ्ग्रह:' इत्युक्तमेव सि€न्तन्यायं विवृणोति -

इदं सर्वमसृजतेति सर्वस्मिन्गृहीतत्वात् । पराधीनविशेावत्त्वेऽप्यनादित्वस्याविरोधात् ।। ११ ।। नच सर्वदेहसर्शज्ञानाद्रसादीनां च तत्रतत्र परिज्ञानाज्जीवस्यानणुत्वम् । उत्क्रान्तिगत्यादे: ।

।। इदं सर्वमिति ।। गृहीतत्वात्, जीवस्येति शेा: । नन्वनादित्वबलात्सर्वशब्दसङ्कोच इत्यत आह- पराधीन इति ।। एवंच 'इदं सर्वमसृजत' इति सर्वपदार्थे सर्वस्मिन् जीवस्यापि सङ्ग्रहात्तस्योत्पत्तिसि€र्युक्तं विणोर्जगत्कर्तृत्वमिति भाव: । (अत्र पूर्वपक्षन्यायोऽनादित्वेऽप्युत्पत्तिर्युज्यत इत्यर्थप्रतिपादकेन 'युक्तेश्-च' इति सूत्रेण सूचित: । सि€न्तन्यायश्-च 'अत एव' इत्यनेन सर्वसङ्ग्राहकश्रुतेरित्यर्थप्रतिपादकेन सूचित: ।) ।। ११ ।। ॐ उत्क्रान्तिगत्यागतीनां ॐ ।। इत्यत्र, 'व्याप्ता ह्यात्मन:' 'अणुर्ह्यो आत्मा' इति श्रुतिविगानेन, जीव: किं व्याप्तोऽणुर्वेति सन्देहे, व्याप्त इति पूर्व: पक्ष:, अणुरिति सि€न्त: । अत्र, 'तत्रतत्र परिज्ञानम्' इत्युक्तपूवर्पक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति - नच सर्वदेह इति ।। जीवस्येति पूर्वेणोत्तरोण च सम्बध्यते । एवंच तत्रतत्र सर्वदेहे, जीवस्य सर्शज्ञानात्तत्रतत्र रसादीन्द्रियाधिष्ठानेाु रसादीनां युगपत्परिज्ञानाच्च जीवस्य अनणुत्वं अणुत्वाभाव: । एवंच 'आत्मा कार्त्स्न्यम्' इत्यत्र देहपरिमाणस्य निरस्तत्वात्परिशे-ासि€ व्याप्तत्वमिति च नेत्यर्थ: । त€तुत्वेन 'गत्यादि:' इत्युक्तसि€न्तन्यायं विवृणोति- उत्क्रान्तिगत्यादेरिति ।। अनेनानुव्याख्यानगतगतिशब्द उपलक्षणार्थं इत्युक्तं भवति । ननु, उत्क्रान्तिगत्यादिहेतो: (निराकृतमध्यमपरिमाणस्य)

जीवस्याणुत्वे, सर्वदेहादौ सर्शादिज्ञानोपपत्तिः कथमित्यत आह-

आदिशब्देन सूक्ष्मतेजोǁ पेण व्याप्त्या सर्शादिज्ञानोपपत्तिः । अतोऽणुत्वमनणुत्वं चेति भावः ।। १२ ।। नच जीवस्य बहुǁ पत्वशक्तावीशेन गुणसाम्यम् ।

।। आदिशब्देनेति ।। 'गत्यादि' इत्यनुव्याख्यानगतादिशब्देनेत्यर्थः । (अनेन 'अविरोधश्-चन्दनवत्' 'गुणाद्वा लोकवत्' इति सूत्रद्वयतात्पर्यमुक्तं भवति ।) सूक्ष्मतेजोǁ पेण चिद्गुणेन जीवस्य व्याप्त्या सवर्देहादौ युगपत्सर्शादिज्ञानोपपत्तिरित्यर्थः । नन्वेवं सति 'उत्क्रान्तिगत्यागतीनाम्' 'गुणाद्वा लोकवत्' इति सूत्रयोर्विरुद्धार्थत्वं स्यादित्यतस्तदभिप्रायमाह- अत इति ।। सूत्रयोः (उक्त)क्रमेण स्वǁ पचिद्गुणवियत्वादित्यर्थः । एवंच स्वǁ पचिद्गुणाभ्यामणुत्वव्याप्तत्वसम्भवाǁ तच्छ्रुत्यप्रामाण्यमिति भावः । (अत्र पूर्वपक्षन्यायः 'अविरोधश्-चन्दनवत्' 'गुणाद्वा लोकवत्' इति सूत्राभ्यां तत्रतत्र परिज्ञानप्रदर्शकाभ्यां सूचितः । सिद्धान्तन्यायश्-च 'उत्क्रान्तिगत्यागतीनाम्' इति सूत्रेणोक्तः । आदिपदोक्तस्तु 'गुणाद्वा लोकवत्' इत्यनेन सूचितः ।) ।। १२ ।। ॐ व्यतिरेको गन्धवत्तथा च दर्शयति ॐ ।। इत्यत्र, 'स नित्यो निरवयवः स एकधा न सप्तधा' इति, 'स पञ्चधा स सप्तधा' इति च श्रुतिविगानेन जीवः किमेकǁ पः किं वाऽनेकǁ प इति सन्देहे, एकǁ प एवेति पूर्वः पक्षः, अनेकǁ प इति सिद्धान्तः । तत्र 'गुणसाम्यम्' इत्युक्तं विपक्षबाधकतर्कǁ पपूर्वपक्षन्यायं आपादकप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच जीवस्येति ।। शक्तौ, अङ्गीकृतायामिति शेषः । (तथा गुणसाम्यं स्यादिति शेषः ।)एवंच जीवस्याऽनेकǁ पत्वे, ईशेन गुणसाम्यं प्राप्नोतीति तर्कसहितैकǁ प्यश्रुतिविरोधेनाऽनेकश्रुतेरप्रामाण्याǁ श्रुतिसमन्वयेन विणोर्जगत्कारणत्वं युक्तमिति च नेति भावः । कुतो नेत्यतस्तद्धितुत्वेन 'ईशशक्तिः' इत्युक्तसिद्धान्तन्यायं विवृणोति-

ईशशक्तयैव बहुǁ पत्वादेः ।। १३ ।। नच श्रुत्या जीवेश्-वरैक्यम् । सर्वमानविरोधात् । श्रुतेः सादृश्यैक्यादिान सावकाशत्वात् । बहुमानविरोधे एकस्य दौर्बल्याच्च ।

।। ईशशक्तयैवेति ।। योगिनामपि योगाराधितेश्-वरप्रसादǁ पशक्तयायत्तत्वाद्बहुǁ पत्वादेः । आदिपदेनांशस्यापि अंशेनान्यत्र गमनं गृह्यते । ईशपदप्रयोगेन जीववत्परमात्मनोऽप्येतदशक्यमिति शङ्कां वारयति । एवं चेशशक्तयैव बहुǁ पत्वेन गुणसाम्याभावात् श्रुतेः स्वǁ पांशवियत्वेन विरोधाभावाद्युक्तं विणोर्जगत्कारणत्वमिति भावः । (अत्र पूर्वपक्षन्यायो योगशक्तेरपि, ईश्-वराधीनत्वप्रतिपादकश्रुतिप्रदर्शकेन सूचितः । सिद्धान्तन्यायश्-च 'दर्शयति च' इत्यनेनोक्तः) ।। १३ ।। ॐ पृथगुपदेशात् ॐ ।। इत्यत्र, 'तत्त्वमसि' अहं ब्रह्मास्मि इति 'नित्यो नित्यानां चेतनश्-चेतनानाम्' 'द्वासुपर्णा' इत्यादिश्रुतिविगानेन जीवः किं ब्रह्मणो भिǁ उताभिǁ इति सन्देहे, अभिǁ इति पूवर्ः पक्षः, भिǁ एवेति सिद्धान्तः । तत्र, 'श्रुतिः' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच श्रुत्येति ।। 'तत्त्वमसि, अहं ब्रह्मास्मि'

इत्यादिकया श्रुत्या जीवेश्-वरयोरैक्यमिति च नेत्यर्थः । कुतो नेत्यतः 'सर्वमानविरोधिता' इत्युक्तसिद्धान्तन्यायं तद्धितुत्वेन विवृणोति- सर्वमानेति ।। ऐक्यस्येति शेषः । सर्वैरनुभवǁ पैर्मानैरित्यर्थः । तर्ह्यपौरुषेयतयासम्भवदप्रामाण्यायाः श्रुतेः का गतिरित्यत आह- श्रुतेरिति ।। सादृश्यं च तदैक्यं चेति विग्रहः । आदिपदेन 'परेऽव्यये एकीभवन्ति' इत्यादिश्रुतिप्रतिपाद्यस्थानैक्यमत्त्यैक्ययोर्ग्रहणम् । विपरीतं किं न स्यादित्यत आह- बहुमानविरोध इति ।। भेदग्राहकानुभवादिबहुमानविरोधेऽभेदप्रतिपादकत्वेनाभिमतस्य श्रुतिǁ पैकमानस्य दौर्बल्याच्च । सावकाशत्वकल्पने हेत्वन्तरं चाह-

धर्मिग्राहकविरोधाच्च ।। १४ ।। न चोत्पत्तिमत्त्वाद्विनाशित्वं जीवस्य । अनित्यत्वे तदभीयमोक्षाद्यसिद्धेः ।

।। धर्मिग्राहकेति ।। जीवेश्वरǍ पधर्मिग्राहकानुभवागमयो: परसरं भिǍात्वेनैव तद्ग्राहकत्वादिति भाव: । एवंच सर्वमनाविरोधाǍीश्वरेणैकीभूतो जीव:, किं तु पृथगेव वर्तत इति हृदयम् । (अत्र पूर्वपक्षन्याय: 'तद्गुणसारात्तद्व्यपदेश: प्राज्ञवत्' इत्यनेन 'तत्त्वमसि' इत्याद्यैक्यश्रुतिगतिं वदता सूत्रेण सूचित: । सिद्धान्तन्यायश्च 'पृथगुपदेशात्' इत्यनेनोक्त: । उपदेशग्रहणस्य प्रत्यक्षाद्युपलक्षकत्वात् ।। १४ ।। ॐ यावदात्मभावित्वाच्च न दोस्तद्दर्शनात् ॐ ।। इत्यत्र, 'ब्रह्मैवैतन्मय म्युपैति' 'आनन्त्याय कल्पते' इति श्रुतिविगानेन जीवो नित्योऽनित्यो वेति सन्देहे, अनित्य इति पूर्व: पक्ष:, नित्य एवेति सिद्धान्त: । तत्र 'उत्पत्तिमत्त्वम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नचोत्पत्तिमत्त्वादिति ।। 'ज्ञोऽत एव' इत्यत्र जीवस्योत्पत्तेर्निर्णीतत्वादिति भाव: । एवं चोत्पत्तिमत्त्वेन जीवस्यानित्यत्वमिति युक्तिसहितानित्यत्वश्रुतिविरोधेन, नित्यत्वश्रुतेरप्रामाण्याǍा श्रुतिसमन्वयेन विणोर्जगत्कर्तृत्वं युक्तमिति च नेति भाव: । तदुत्तुत्वेन 'अभीयासिद्ध:' इत्युक्तसिद्धान्तन्यायं विवृणोति- अनित्यत्व इति ।। जीवस्येत्यत्रापि सम्बध्यते । ननु तर्हि विनाशित्वव्याप्तोत्पत्ते: का गतिरित्यत आह-

नहि पराधीनविशोवत्त्वमात्रेण विनाशित्वम् तादृशानामेव नित्यत्वश्रुतिविरोधात् ।। १५ ।। नच स्वगुणाननुभूत्यनुपपत्ते: पूर्वज्ञानादीनां सामस्त्येनाभव: ।

।। नहीति ।। यद्विनाशित्वेन व्याप्तं, आत्मलाभलक्षणोत्पत्तिमत्त्वं, न तत् 'ज्ञोऽत एव' इत्यत्रोक्तम् । तत्र यदुक्तं पराधीनविशोलाभलक्षणोत्पत्तिमत्त्वं, न तद्विनाशित्वेन व्याप्तमित्यर्थ: । पराधीनविशोवत्त्वं कुतो न विनाशित्वेन व्याप्तमित्यत आह- तादृशानामेवेति ।। पराधीनविशोलाभलक्षणोत्पत्तिमतामेवेति युक्तं श्रुतिसमन्वयेन कर्तृत्वमिति भाव: । (अत्र पूर्वपक्षन्यायो 'यावदात्मभावित्वात्' इत्यनेन निोध्यतया सूचित: । सिद्धान्तन्यायश्च 'न दोा:' इत्यनेन आनन्त्यानवाप्तिरुपदोाो नेत्यर्थकेन, अनित्यत्वे तदभीयमोक्षाद्यसिद्धिरिति विपक्षबाधकतर्कǍ प: सूचित: ।) ।। १५ ।। ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ । इत्यत्र, 'विज्ञानात्मा सहदेवैश्च सर्वै: स आनन्द: सबल: सओज:' इति, 'स दु:खाद्विमुक्त आनन्दीभवति । सोऽज्ञानाद्विमुक्तो ज्ञानी भवति । सोऽबलाद्विमुक्तो बलीभवति' इति श्रुतिविगानेन जीवो ज्ञानादिǍ पो न वेति सन्देहे, ज्ञानादिीǍ पो नेति पूर्व: पक्ष:, ज्ञानादिǍ प इति सिद्धान्त: । तत्र स्वगुणाननुभूतिरित्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच स्वगुणेति ।। (अत्र स्वशब्दस्तन्त्रेणोपात्त: । तत्र जीवपरस्य ष्ठीतत्पुरु: ।) ज्ञानादीनाम् स्वǍ पभूतानाम् । तथाच न जीवो ज्ञानादिस्वǍ प:, स्वगुणानां ज्ञानादीनामननुभूतेरित्यर्थ: । ननु, मुक्तौ स्वगुणाननुभूतिसिद्धैव । मुक्ते: पूर्वं स्वगुणाननुभूतिरज्ञानादिप्रतिबन्धाद्युज्यत इति न तथा तदभाव: कल्पयितुं शक्यत इत्यत उक्तम्- पूर्वज्ञानादीनां सामस्त्येनेति ।। नार्ना भव्यक्तत्वमात्रेणाभाव:, किन्तु, सामस्त्येन, स्वǍ पेऽप्यभाव इत्यर्थ: । कुत इत्यत उक्तम्- स्वगुणेति ।। स्वस्याहमिति नित्याभिव्यक्तत्वेन स्वǍ पभूतत्वेनाननुभूत्यनुपपत्ते: । नच प्रतिबन्धात्तदुपपत्ति:, स्वǍ पस्याप्रतिबन्धत्वे, स्वǍ प भूतगुणानामननुभूतिर्येन प्रतिबध्येन, तस्याप्रतिबन्धस्यानुपपत्तेरिति भाव: । एवंच स्वगुणाननुभूत्या जीवस्यानन्दादिǍ पत्वा भावादानन्दादिश्रुतिरप्रमाणमेवेति न श्रुतिसमन्वयेन विणोर्जगत्कारणत्वं युक्तमिति च नेति भाव: । तदुत्तुत्वेन 'सुव्यक्ति:' इत्युक्तसिद्धान्तन्यायं विवृणोति-

पूर्वमव्यक्तानां पश्चात्सुव्यक्तयुपपत्ते: ।। १६ ।।

पूर्वमिति ।। मुक्ते: पूर्वं, अज्ञानावृतत्वेन अव्यक्तानां, पश्चात् मुक्तयनन्तरमज्ञाननिवृत्ते:, सु सम्यक् व्यक्तयुपपत्तेरित्यर्थ: । अनेन, स्वगुणाननुभूति:, स्वगुणानां प्रतिबन्धत्वेनाव्यक्तत्वाद्युज्यते, मुक्तयनन्तरमभिव्यक्तत्वेन सैव नास्तीत्युक्तं भवति । अव्यक्तीति वदता पूर्वमपि सुप्त्यादावीादभिव्यक्ति: सूचिता । नच सुखǍ पस्याप्रतिबन्धत्वेन तदभिǍज्ञानादीनां

प्रतिबन्धायोगः, विशोबलात्तदुपपत्तेरिति । एवंच मोक्षानन्तरमेव सुव्यक्तेस्तत्पूर्वमननुभूत्युपपत्तेर्युक्तं श्रुतिसमन्वयेन विणोर्जगत्कर्तृत्वमिति भावः । (अत्र पूर्वपक्षन्यायोऽनुभवव्यपदेशयोरभिव्यक्तिहेतुतुकत्वं वदता 'अभिव्यक्तियोगात्' इत्यनेन निोध्यतया सूचितः । सिद्धान्तन्यायश्च 'अभिव्यक्तियोगात्' इत्यनेनैवोक्तः ।) ।। १६ ।। ॐ कर्ता शास्त्रार्थवत्त्वात् ॐ ।। इत्यत्र, 'नान्यः कर्ता' इति, यत्कर्म कुरुते तदभिसम्पद्यते' इति श्रुतिविगानेन जीवः किं कर्ता नवेति सन्देहे, नेति पूर्वः पक्षः, कर्तेति सिद्धान्तः । तत्र 'अल्पकल्पनम्' इत्युक्तं पूर्वपक्षन्यायं तत्साध्यं सूचयन् विवृण्वन्प्रतिक्षिपति-

नचेश्वरस्यैव कर्तृत्वे कल्पनालाघवम् । जीवस्याकर्तृत्वे शास्त्रवैयर्थ्यात् । तस्यापि कर्तृत्वे शास्त्रार्थसिद्धेश्च ।। १७ ।।

।। नचेश्वरस्यैवेति ।। नच 'जीवस्यैव' इत्यपि वक्तुं शक्यत्वात्किं विनिगमकमिति वाच्यम् । 'इतरव्यपदेशात्' इत्यदावीश्वरस्यैवानन्ययोगेन कर्तृत्वस्य श्रुत्यादिना समर्थितत्वादिति भावः । एवं चेश्वरस्यैव कर्तृत्वाङ्गीकारेऽल्पकल्पनमिति युक्तिसहिताकर्तृत्वश्रुतिविरोधेन, कर्तृत्वश्रुतेरप्रामाण्याऽऽ श्रुतिसमन्वयेन विणोर्जगत्कर्तृत्वं युक्तमिति च नेति भावः । तदेतुत्वेन 'शास्त्रसिद्धेः' इत्युक्तसिद्धान्तन्यायं, विपक्षबाधकतर्कसाध्यं प्रदर्शयन्विवृणोति- जीवस्येति ।। जीवस्य सर्वथा कर्तृत्वाभावे 'प्रातः सन्ध्यामुपासीत' इत्यादिविधिनिोधऽ पशास्त्रस्य वैयर्थ्यप्रसङ्गात्, तस्यापि जीवस्यापि, कर्तृत्वे, अङ्गीक्रियमाणे सति शास्त्रस्य उक्तलक्षणस्य, अर्थस्य प्रयोजनस्य सिद्धिरित्यर्थः । अनुग्राहकतर्कसहितस्यैव साधकत्वमिति चशब्दः । एवंच जीवस्य कर्तृत्वे, शास्त्रप्रयोजनसिद्धेर्युक्तं श्रुतिसमन्वयेन विणोर्जगत्कर्तृत्वमिति भावः । (अत्र पूर्वपक्षन्यायोप्रामाणिकत्वपरिहारेण कल्पनागौरवस्यापि परिहारात् 'कर्ता' इत्यादिसूत्रे सूचितः । सिद्धान्तन्यायश्च 'शास्त्रार्थवत्त्वात्' इत्यनेनैवोक्तः ।) ।। १७ ।। ॐ अंशो नानाव्यपदेशादन्यथा दाशक्तित्वादित्वमधीयत एके ॐ ।। इत्यत्र, 'अंशा एव हीमे जीवाः' इति, 'नैवांशो न सम्बन्धो' इति श्रुतिविगानेन जीवः किमीश्वरांशो न वेति सन्देहे, जीवो न हरेरंशो नाप्यनंश इति निर्णयो युज्यत इति पूर्वः पक्षः, अंशो भवत्येवेति सिद्धान्तः । तत्र 'नानाश्रुतिः' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच नानाश्रुतेरप्रामाण्यम् । दृयभेदानुसारेण तासामर्थोपपत्तेः । अप्रामाण्यकल्पनस्य विपरीतज्ञानमूलत्वात् ।। १८ ।।

।। नच नानाश्रुतेरिति ।। नानाप्रकारेण श्रवणादित्यर्थः । अप्रामाण्यं श्रुतिद्वयस्येति शेाः । यद्वा, नानाश्रुतेः नियमेनांशत्वानंशत्वऽ पविरुद्धार्थप्रतिपादकश्रुतेः, विरुद्धार्थत्वऽ पनानात्वादेवाप्रामाण्यमित्यर्थः । एवंच श्रुतेर्नानात्वेन श्रुतिद्वयस्याप्रामाण्याऽऽ श्रुतिसमन्वयेन विणोर्जगत्कारणत्वं युक्तमिति च नेति भावः । कुतो नेत्यतस्तदेतुत्वेन 'विपर्ययः' इत्युक्तसिद्धान्तन्यायं विवरितुं श्रुतिगतिं तावदाह- दृयेति ।। जीवेश्वरप्रतियोगिकभेदस्य प्रत्यक्षसिद्धत्वेन तदनुसारेण तासामंशत्वादिप्रतिपादकश्रुतीनामंशत्वऽ पाभेदाख्यार्थोपपत्तेरित्यर्थः । किमर्थमेवं श्रुतिगतिः कल्पनीयेत्यतः सिद्धान्तन्यायं विवृणोति- अप्रमाण्येति ।। वेदे चापौरुोयत्वेन वक्तृविपरीतज्ञानमूलत्वासम्भवादित्यर्थः । एवंच वक्तुर्विपर्ययात् भ्रमाद्वाक्यस्याप्रामाण्यम्; वेदे च तदसम्भवादंशत्वश्रुतेरर्थान्तरे प्रामाण्यमेवेति युक्तं श्रुतिसमन्वयेन विणोर्जगत्कर्तृत्वमिति भावः । (अत्र पूर्वपक्षन्यायोंऽशत्वमङ्गीकृत्यानंशत्वश्रुतेर्गतिं वदता 'प्रकाशादिवत्' इति सूत्रेण सूचितः । सिद्धान्तन्यायश्च 'प्रकाशादिवत्' इति श्रुतिगत्युक्तयानंशत्वप्रतिपादकश्रुतेरपौरुोयत्वेन वक्तृमिथ्याज्ञानमूलकाप्रामाण्यसम्भव इति सूचनेन सूचितः ।) ।। १८ ।। ॐ अदृयानियमात् ॐ ।। इत्यत्र, 'ऽ पं ऽ पं प्रतिऽ पो बभूव' इति श्रुतिविरोधपरिहारप्रकरणाऽऽ जीवः परमात्मनः प्रतिबिम्ब इति विकल्पितश्रुतिविगानेन जीवो भगवत्प्रतिबिम्बो न वेति सन्देहे, नेति पूर्वः पक्षः, प्रतिबिम्ब इति सिद्धान्तः । तत्र, 'वैचित्र्यम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच वैचित्र्यमनाभासत्वे कारणम् । जीवानां सामान्यत आभासत्वेऽपि विशेाादृयाद्वैचित्र्योपपत्तेः ।। १९ ।।

।। इति श्रीमŽयायविवरणे द्वितीयाध्यायस्य तृतीयः पादः ।।

नच साधनेन सह श्रुतेस्तद्वत्फलेऽपि जीवस्य स्वातन्त्र्यम् । अविहितत्वेन कारणाभावात् ।

।। नच साधनेनेति ।। 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते' 'तेऽर्चिमभिसम्भवन्ति' 'अथ य इमे ग्रामा इ-यापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति' इति श्रुतौ, विद्येयादिसाधनेन सह, अर्चिरादिधूमादिभावलक्षण(स्य)फलस्य श्रवणात्, तद्वत्साधन इव, फलेऽपि स्वातन्त्र्यमङ्गीकार्यम्, साधने स्वातन्त्र्याभावे तु, वैराग्यादिसाधनमपि नोत्पादयितुं शक्यं स्यादिति तद्विधिवैयर्थ्यप्रसङ्गादिति भावः । एवंच (फलस्यैव साधयितुं शक्यत्वात्) फलार्थं न वैराग्यादिकमापाद्यमिति नेति भावः । (अयं च न्यायः 'प्रकृतत्वात्' इत्यनेन देवयानपितृयाणवत् विद्याकर्मणोः प्रकृतत्वादिति सूचितः । अत एव भाये 'तयोरपि' इत्यपिशब्दः ।) तत्तुत्वेन 'कारणाभावः' इत्युक्तमेव सिद्धान्तन्यायं विवृणोति- अविहितत्वेनेति ।। फलस्ये(त्यर्थः)ति शेषः । अनेन स्वातन्त्र्यविहितत्वं कारणं, तच्च वैराग्यादिसाधने ब्रह्मणो निर्वेदमायादीत्यादिना प्रमितं विध्यादिशास्त्राऽवैयर्थ्याय हि, तत्रेश्वरः स्वातन्त्र्यं ददातीति 'कर्ता शास्त्रार्थवत्त्वात्' इत्यत्रोक्तम् । फले तु विहितत्वाभावात् न साधनप्रतिबन्दिग्रहणं युक्तमित्युक्तं भवति । ननु तर्हि, 'अथैतयोः पथोः' इति श्रुतौ 'नैकतरेण' इति कथं मार्गेण गतिनिषेधः, नहि पुरुषप्रयत्नाविायेन(ण)गच्छन्तीति प्रयोगो युज्यत इत्यत आह-

अथैतयोः पथोरित्यस्य च साधनार्थत्वात् ।। १४ ।। नच दुःखसहस्थायित्वादन्धेतमस्यपि सुखम् । ईशस्याप्रियत्वेनैव कारणाभावात् ।। १५ ।।

।। अथैतयोरिति ।। साधनार्तत्वादिति देवयानपितृयाणरूपमार्गद्वयसाधनतया प्रकृतविद्याकर्मविायत्वादित्यर्थः । एवंच विहितत्वरूपकारणाभावात्फले जीवस्य स्वातन्त्र्याभावेन तदर्थं वैराग्यादिकमापाद्यमेवेति भावः । (अयं च न्यायः, तुशब्देन विद्याकर्मणोर्विहितत्वरूप विशेषस्योक्तत्वादेव देवयानपितृयाणयोः फलभूतयोर्विहितत्वरूप पकारणाभावसूचनेन सूचितः ।) ।। १४ ।। ॐ न तृतीये तथोपलब्धेः ॐ ।। इत्यत्र, दुःखवतः सुखदर्शनेन, अलौकिकत्वेन (च), अन्धन्तमः सुखयुक्तं न वेति सन्देहे, सुखयुक्तमेवेति पूर्वः पक्षः, नेति सिद्धान्तः । अत्रापि 'सहस्थानम्' इत्युक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच दुःखेति ।। (सुखस्येति शेषः) दुःखस्य सुखेन सहावस्थायित्वात् व्याप्तत्वादित्यर्थः । तथाच नाप्रयोजकता । नच वक्तव्यं सवर्सुखदुःखयोरप्रत्यक्षत्वाद्व्याप्तिग्रहणानुपपत्तिरिति, 'यत्र दुःखं सुखं तत्रा' इत्यागमेन व्याप्तिग्रहणोपपत्तिरिति भावः । एवंच दुःखस्य सुखेन सहावस्थानात् तमः प्राप्तानामपि सुखसम्भवात्तत्साधने भगवद्द्वेषादौ नातिशयेन वैराग्यमापाद्यमिति नेति भावः । (अयं च न्यायः 'तथोपलब्धेः' इत्यनेन, तृतीयतमोव्यतिरिक्तनरकेषु सुखदुःखयोः सहस्थानप्रतिपादकश्रुतिग्राहकेण सूचितः ।) तत्तुत्वेन 'कारणाभावः' इत्युक्तमेव सिद्धान्तन्यायं विवृणोति-

ईशस्येति ।। कारणेत्यतः पूर्वं ईशेच्छारूपेत्यध्यहार्यम् । इदमुक्तं भवति- विप्रतिपन्ना न सुखवन्तः, तथात्वेनेश्वरानि-यत्वात्, यद्यथेश्वरानियं तत्तथा न भवति, यथा शशो विषाणित्वेन इति । हेत्वसिद्धिपरिहारार्तमुक्तम् - अप्रियत्वेनैवेति ।। अप्रियत्वहेतोः अत्यप्रिये सुखमपि' इति स्मृतिसिद्धत्वेन प्राबल्यमेवकारोणाह । अयमर्थः नैते सुखित्वेनेश्वरेयाः, तदप्रियत्वात् । यो यस्याप्रियः स सुखित्वेन न तदियः, यथा राजविरोधी राज्ञ इति । नच व्याप्तिवचनविरोधः, तस्य तमोव्यतिरिक्तविायत्वेन सावकाशत्वादिति । एवं चेश्वरेच्छारूप पकारणाभावावच्छिन्धन्तमः प्राप्तानां सुखमिति भावः । (अयं च न्यायो 'लोके' इत्यनेन ईशाप्रियत्वाख्यः सूचितः ।) ।। १५ ।। ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ ।। इत्यत्र, शब्दास्य शक्तयाद्यनेकवृत्तिसद्भावात्, 'धूमो भूत्वा' इत्यत्र भवनशब्दार्थः किं धूमादिदैवतैक्यं, उत तत्पदप्राप्तिः, अथ

तत्स्वाभाव्यापत्तिरिति सन्देहे, तदैक्यं, तत्पदप्राप्तिर्वेति पूर्व: पक्ष:, तत्स्वाभाव्यापत्तिरिति सि€ान्त: । अत्रापि सहस्थानमित्युक्तमेव न्यायं द्वितीयपूर्वपक्षसाधकत्वेन तावद्विवृण्वन्प्रतिक्षिपति-

नच धूमादिदेवतासहावस्तानात्कर्मिणोऽपि तत्पदप्राप्ति: ।

।। नच धूमादीति ।। अयं भाव: 'धूमो भूत्वा' इति सामानाधिकरण्यश्रुतिरुक्तोभयरीत्या युज्यते, अन्यथा तद्विरोध: । नच श्रुतेरन्यथात्वं कल्पनीयम्, बाधकमन्तरेण मुख्यार्थत्यागायोगात् । नच कर्मिणो दैवतैक्यवत् देवतापदप्राप्तिरप्यसम्भाविता, धूमादिदेवताभि: सहावस्थानात् स्नेहादिवशेन ताभिरेव स्वपदादेर्दानस्यापि युक्तत्वात् । एवंच कर्मिणो धूमादिदेवताभि: सहावस्थानादाकल्पसमाप्ति परममुख्यसाधनतत्पदप्राप्तिसम्भवाŽा कर्मणि वैराग्यमापाद्यमिति नेति भाव: । (अयं च न्याय: 'तत्स्वाभाव्यापत्ति:' इत्यनेनैव सूचित: ।) त€तुत्वेन पूर्वोक्तमेव 'कारणाभाव:' इति न्यायं विवृणोति-

तŽामित्तविद्याख्यकारणाभवात् ।। १६ ।। नच तैस्तै: सहावस्थानादतिचिरत्वम् ।

।। तŽामित्तेति ।। विद्येत्युपलक्षणम् । 'अधिकार:' इत्यपि ग्राह्यम् । कर्मिप्राप्यत्वे, युगपदनेककर्मिसमवायेऽनेकाां युगपदनेकपदप्राप्तिप्रसङ्ग: । नच श्रुतेर्नैरर्थ्यम्, तत्स्वभावप्राप्तेरेव भवनशब्दार्थत्वात् । नचास्यापि पदप्राप्तिपर्यायत्वम्, 'तद्गतौ गति:' इत्याद्येकदेशस्वाभावत्वात् । नच शब्दार्थत्याग: सादृश्ये च सामानाधिकरण्यप्रयोगदर्शनादिति भाव: । एवंच विद्यादिकारणाभावात् न कर्मिणां धूमादिदेवतापदप्राप्तिरिति आपाद्यमेव वैराग्यादिति भाव: । (अयं च न्याय: 'उपपत्ते:' इत्यनेन विद्याख्यकारणाभावेन तत्पदप्राप्तेरिति सूचनेन सूचित: ।) ।। १६ ।। ॐ नातिचिरेण विशेाात् ॐ ।। इत्यत्र, चिराचिरगमनविशिय(द्विविध)पान्थदर्शनेन, कर्मिण: स्वर्गाŽार्गत्य किं चिरेण गर्भवासं प्राप्नुवन्ति, उताचिरेणेति सन्देहे, चिरेणैवेति पूर्व: पक्ष:, अचिरेणेति सि€ान्त: । अत्रापि सहस्थानमित्युक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच तैस्तैरिति ।। धूमादिदेवैरित्यर्थ: । 'आकाशाद्वायुम्' इति श्रुतौ बहूनामुक्तत्वात्, 'तैरेतै:' इति वीप्सा । ततश्चातिचिरत्वमागमनस्योपपादितं भवति । उपलक्षणं चैतत् । तत्रतत्र तत्स्वाभाव्येनातिमहासुखे सम्भवति, तद्विहायागमने प्रयोजनाभावादित्यपि द्रयव्यम् । एवंच धूमादिदेवै: सहावस्थानात्, कर्मिणस्तल्लोकादागमनस्यातिचिरत्वेन, तत्रैव महासुखत्वसम्भवात्, न तत्र वैराग्यमापाद्यमिति नेति भाव: । (अयं च न्याय: 'नातिचिरेण' इत्यनेन, निोध्यतया पूर्वपक्षसाध्यनिर्देशशात्त€तुरेव सूचित: ।) त€तुत्वेन पूर्वोक्तमेव 'कारणाभाव:' इति सि€ान्तन्यायं विवृणोति-

वत्सरात्पूर्वमेव त्विति क्लृप्तकालादधिकावस्थाने कारणाभावात् ।। १७ ।। नच व्रीह्यादिजीवै: सहानवस्थानाद्दु:खप्राप्ति: । शब्दविहितत्वेन पापाख्यकारणाभावात् ।। १८ ।।

।। वत्सरादिति ।। नच महासुखप्राप्तेरियत्वेन कारणमिति वाच्यम् । न कर्मिणां महासुखप्राप्तिरिति भाव: । (अयं च न्याय: विशेाादित्यनेन वत्सरात्पूर्वमेव तु इति प्रमाणविशेाक्लृप्तकालादधिककालावस्थाने कारणाभाव इति सूचित: ।) ।। १७ ।। ॐ अन्याधिष्ठिते पूर्ववदभिलपात् ॐ ।। इत्यत्र, लोके ग्रामान्तरगमनस्य दु:खहेतुत्वदर्शनात्, अस्य स्वर्गमार्गस्य पुरुाार्थत्वेन कर्मिण: स्वर्गादागमने दु:खवन्तो न वेति सन्देहे, दु:खवन्त इति पूर्व: पक्ष:, नेति सि€ान्त: । अत्रापि सहस्थानमित्युक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच व्रीह्यादीति ।। न चेश्वरे व्यभिचार:, अस्वातन्त्र्यस्य हेतुविशेाणत्वात् । नचासि€:, 'त इह व्रीहियवा:' इति तेाां व्रीह्यादिभावदर्शनात् । न चाप्रयोजकता, व्रीह्यादिसहावस्थाने च तच्छेदनादिना दु:खनियमात् । नहि दु:खिना सहावस्थानेऽपि दु:खप्राप्तावीश्वरवत्स्वातन्त्र्यं प्रमितमस्तीति भाव: । तच्च दु:खं यज्ञादिफलमेव, आगमनादेर्यज्ञादिफलत्वस्य प्रतिपादितत्वात् । नच दु:खकारणाभाव:, यज्ञानां हिंसायुक्तत्वेन तत: पापस्य सम्भवादिति पूर्वपक्षशेाो द्रयव्य: । एवंच सुखसाधनतया वेदोक्तस्य कर्मणो यथा दु:खसाधनत्वं, तथा वैराग्यस्यापीति न वैराग्यमापाद्यमिति नेति भाव: । (अयं च न्याय: 'अन्याधिष्ठित:' इत्यनेन सूचित:

।) त€तुत्वेन

प्रागुक्तमेव 'कारणाभाव:' इति सि€ान्तन्यायं विवृणोति- शब्दविहितत्वेनेति ।। 'यज्ञादे:' इति शो: । यज्ञादेर्हिंसायुतत्वेऽपि न पापहेतुत्वम्, निहि€हिंसाया एव तथात्वात् । यमाहिंसाया: 'अग्नीोमीयं पशुमालभेत' इति शब्दविहितत्वादित्यर्थ: । पापान्तरनिमित्तकदु:खानुभवस्य नायमवसर इति हृदयम् । नास्वातन्त्र्ये सति, दु:खिसहावस्थानमात्रं दु:खप्राप्तौ हेतु:, जीवनियामकदेहेा व्यभिचारात् , किन्तु पापविशोवत्त्वम् , तच्च नास्तीति भाव: । एवंच सुखसाधनतयोक्तस्य कमर्णो दु:खसाधनत्वाभावात्, वैराग्यमापाद्यमेवेति भाव: । (अयं च न्याय: 'शब्दा:' इत्यनेन शब्दविहितत्वेन न पापसाधनत्वमित्युक्त: ।) ।। १८ ।। ॐ रेत:सिग्योगोथ ॐ ।। इत्यत्र, 'यो वा रेत: सिञ्चति तमेवानुविशति' इति श्रुत्या पितृप्रवेशे प्रयोजनादर्शनेन च कर्मी पितरं न वेति सन्देहे, नेति पूर्व: पक्ष:, प्रविशतीति सि€ान्त: । तत्र 'वैयर्थ्यम्' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच वैयर्थ्यं पितृशरीरगमने ईशक्लृप्त्यैव पितरं प्रविश्यायाति मातरमितीशक्लृप्तत्ववचनात् ।। १९ ।।

।। नच वैयर्थ्यमिति ।। एवंच पितृप्रवेशस्य वैयर्थ्यादागमने महाप्रयासाभावेन नातिवैराग्यं कर्मादावापाद्यमिति नेति भाव: । (अयं च न्याय: 'रेत:सिग्योग:' इत्यनेन पितुरनुपयोगं परिहरता सूचित: । अन्यथा पितृयोग इत्येवावक्ष्यत् ।) त€तुत्वेन 'क्लृप्ति:' इत्युक्तसि€ान्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति- ईशक्लृप्त्यैवेति ।। ननूक्तस्य वैयर्थ्यमिति चेŽा, शरीरपरिणामार्थं रेतसोऽपेक्षितत्वेन, पितृप्रवेशस्यावश्यकत्वात् । अत एव सूत्रे, लाघवात् 'पितृयोग:' इति वक्तव्ये 'रेत:सिग्योगोऽथ' इत्युक्तमिति । एवंचेशक्लृप्त्यैव पितृप्रवेशस्यावश्यकत्वात् । आपाद्यमेव वैराग्यमिति भाव: । (अयं च न्याय: 'अथ' इत्यनेन 'ईशक्लृप्त्यैव पितरम्' इति प्रमाणसूचकेन सूचित:, ल्यपैवानन्तर्यप्रतिपादनात् ।) ।। १९ ।। ॐ योने: शरीरं ॐ ।। इत्यत्र,पितृद्वारा मातृयोनिप्रवेशाप्रवेशयोरनुपपत्त्यदर्शनेन, पितृद्वारा मातृयोनिं प्रविश्याथ शरीरं प्राप्नोति, न वेति सन्देहे, पितृद्वारा मातृयोनिं प्रविश्यैव शरीरं प्राप्नोतीति नियमो नास्तीति पूर्व: पक्ष:, पितृद्वारा मातृयोनिं प्रविश्यैव शरीरं प्राप्नोतीति सि€ान्त: । तत्र 'अन्यथागति:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच पितु: सकाशादन्यतो वौदर्यगर्भस्थशरीरमेव प्रवेयुमुपपत्तेर्योनिप्रवेशाभाव इति वाच्यम्, योनिद्वारेण देहं च प्राप्नोति प्रायशो नर: इति वचनात्सामान्यतो गत्यन्तराभावात् ।

।। नच पितुरिति ।। अन्यतोऽŽादे: । अयं भाव: । मातृयोनिप्रवेश एव तावŽा विद्यते, 'देहं गर्भस्थितम्' इति वचनात् । मातृप्रवेशसद्भावेऽपि पितृद्वारैवेति न नियम:, अन्यतोऽŽादेरपि प्रवेशोपपत्ते: । ननु शरीरपरिणामार्थं रेतसोऽपेक्षितत्वेन पितृप्रवेशस्यावश्यकत्वं पूर्वाधिकरणे समर्थितमिति चेŽा, अन्यथा मातृस्थरेतसैव परिणामोपपत्ते: । प्रागसि€शरीरप्राप्ति(प्य)नुपपŽा, 'देहं गर्भस्थितं क्वापि' इति वचनेन, मातुरुदरस्थितगर्भस्थितेर्वा बहिर्निर्गते वा पूर्वसि€देहप्रवेशस्योक्तत्वात् । एवंच शरीरप्राप्तावतिप्रयासाभावाŽातिवैराग्यमापाद्यमिति नेति भाव: । (अयं च न्यायोऽनुव्याख्यानोक्तरीत्या पूर्वसूत्रादनुवृत्तेनाथशब्देन प्रकारान्तरेण जननस्योक्ते: सूचित: ।) त€तुत्वेनान्यागतिरित्युक्तसि€ान्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति- योनिद्वारेणेति ।। अन्येनान्येनप्रकारेणागतिर्गत्य भाव: । गत्यन्तराभाव इति यावत् । गतिशब्देन देहप्राप्तिरुच्यते । ततश्च सामान्यत उत्सर्गत: अन्येनाŽाद्वारादिलक्षणप्रकारान्तरेणागतिर्देहप्राप्त्यभाव इति विवृतं भवति । यद्वा अŽादिद्वारेण मातृशरीरप्राप्त्यादिलक्षणविशोजनने वरादिŽ पान्या गतिरस्ति सामान्यतो जनने तु तादृशगत्यन्तराभावादिति न्यायविवरणाभिप्राय: । ननु गत्यन्तराभावात् कथमेतदित्यत आह-

विशोकारणादेव विशोाज्ञनिरियते । सामान्यजननं चैव नृणां सामान्यहेतुत इति वचनाच्च ।। २० ।।

।। इति श्रीमŽयायविवरणे तृतीयाध्यायस्य प्रथम: पाद: ।।

।। विशोकारणादिति ।। विशोकारणात् वरादिŽ पादित्यर्थ: । अत एवोदाहृतप्रमाणेऽपि 'प्रायश:' इत्युक्तम् । एवंचान्येन प्रकारेण गत्यभावात्पितृद्वारा मातृयोनिप्रवेशेनासि€शरीरप्राप्तिरिति शरीरप्राप्तौ महादु:खसद्भावादापाद्यमेव वैराग्यमिति भाव: । (अयं च न्यायो 'योने: शरीरम्' इत्यनेन सामान्यजननस्य सामान्यतोऽन्येन प्रकारेणागतिरिति सूचित: ।) ।। २० ।।

।। इति श्रीमŽयायविवरणे तृतीयाध्यायस्य प्रथम: पाद: ।।

वैराग्यसाध्योपास्तिसाधनभक्ते: पुरुाप्रयत्नाविायत्वेनाविधेयत्वात्तदुत्पत्त्यर्थं भगवन्माहात्म्यप्रतिपादनार्थोऽयं पाद: प्रवृत्त: । एतत्पादीयाधिकरणपूर्वपक्षसि€न्तन्याया अनुव्याख्यायां सङ्ग्रहेणोक्ता: । 'पश्-चाददृययविज्ञानकालदु:खपृथग्भवा: । स्थानभेदो विरु€त्वं न्यायसाम्यं सतो भव: । गुणसाम्यमयोगश्-च तर्कबाधो विलोमता । नानाभाव: प्रलोभश्-च युक्तय:

पूर्वपक्षगा: । अशक्यकर्तृताशक्ति: स्वतोऽबोधस्तदेव च । अमानक्लृप्ति: सन्मानव्यवस्थात्यल्पताभव: । विशोदृयिवाक्ये च पुंशक्ति: सुनिदर्शनम् । अलौकिकत्वमाधिक्यं स्वातन्त्र्यं निर्णयप्रभा: ।।' इति ।। ॐ सन्ध्ये सृयिराह ॐ ।। इत्यत्र, वादिविप्रतिपत्त्या, स्वप्नो भगवदधीनो न वेति सन्देहे, नेति पूर्व: पक्ष:, भगवदधीन इति सि€न्त: । तत्र पश्-चाददृ-यरित्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-पश्-चाददृये: स्वप्नविायस्यासत्त्वं न वाच्यम् ।

।। पश्-चाददृयेरिति ।। उपलक्षणमेतत् । पूर्वमपीत्यपि ग्राह्यम् । स्वप्नो नामार्थज्ञात्मक: । तत्र तावत् स्वाप्नानां करितुरगादीनां परमेश्-वरायत्तता नोपपद्यते, असत्यत्वात् । न तावदिमेऽनादिनित्या:, स्वप्नावस्थान्त: प्रागूर्ध्वं चोपलब्धिप्रसङ्गात् । नहि विद्यमाना अप्युपलब्धिसाधनेा चक्षुरादिवनुपरतेा, नोपलभ्यन्ते, उपलभ्यन्ते चोपरतेविति सम्भवति । नचान्यत्रगता:, अन्यैरप्यनुपलम्भात्, । स्वाप्ना: पदार्था नानादिनित्या:, मध्यमपरिमाणोपेततया दृश्यमानत्वात् घटवदित्यनुमानविरोधाच्च । नाप्युत्पत्तिविनाशवन्त:, तथात्वेऽपि, घटादिवत्प्रागूर्ध्वमुपलम्भप्रसक्ते: । नच वाच्यं विद्युदादिवत्तदैवोत्पत्तिर्विनाशश्-चात: प्रागूर्ध्वमनुपलम्भो न दोाायेति, इत्थम्भावे प्रमाणाभावात्, प्राङ्मृदादीनामूर्ध्वं कपालादीनामनुपलम्भापत्तेश्-च । नचैवाां तत्कालीने जन्मनि उपादानं निमित्तं च पश्याम: । कर्ता च न तावज्जीवात्मा, द्र-युर्निव्यापारत्वात् । अपरस्य चादर्शनात् । तथाच यावद्विशोबाधे सामान्यबाधाŽा सत्त्वं तेाम्, अविद्यमानानेकतुरगकर्यादीन् पश्यामीत्युत्तरकालीनानुभवविरोधाच्च । 'स्वप्नमायासŽ पा' 'स्वप्नमनोरथो यथा' इत्यादिश्रुतिस्मृतिविरोधाच्चेति । तदेवं न स्वाप्नानामर्थानामीश्-वराधीनत्वम्, नापि ज्ञानस्य, तस्यापि निमित्ता भावेनापरमार्थत्वात् । इन्द्रियप्रवृत्तीनामुपरतत्वात् । मनसो बाह्यार्थेवस्वातन्त्र्ादिति । एवंच स्वप्नस्यासत्वादसतश्-चेश्-वराधीनत्वायोगाŽा तस्य महामहिमत्वमिति नेति भाव: । (अयं च न्याय: 'सन्ध्ये सृयि:' इत्यनेन सूचित: । तेन पश्-चाददृयेर्गत्युक्ते: पश्-चाददृयि: पूर्वपक्षन्याय इत्युक्तं भवति ।) त€तुत्वेनाशक्यकर्तृताशक्ति:' इत्युक्तसि€न्तन्यायं विवृणोति-

अशक्यक(का)रणशक्तिमत्त्वादीश्-वरस्य, संस्कारेण सृष्ट्वा, पुन: संस्कारमात्रतामापाद्य, तस्यापि तिरोधानोपपत्ते: । जाग्रत्त्वप्रतीतिमात्रस्य भ्रान्तित्वात् ।। १ ।।

।। अशक्यकारणेति ।। सृष्ट्वा संसारमात्रतामापद्येत्यत्र स्वप्नकाल एवेत्युपस्कर्तव्यम् । तथाच सृष्ट्वेत्यनेनानादित्वपक्षदोाा अनभ्युपगमेनैव निरस्ता: । तत्काल एव सृष्ट्वेत्यनेन, प्रागुपलम्भप्रसङ्ग: संस्कारमात्रतामापाद्येत्यनेन, पश्-चादुपलम्-भप्रसङ्गश्-च निराकृत: । संस्कारेत्युपादानकीर्तनम् । नच तस्य गुणत्वेनोपादानत्वानुपपत्ति:, मनोवृत्तित्वेन द्रव्यत्वात् ।

संस्काराणां चातीन्द्रियत्वेन, त्र्यणुकजन्मविनाशयोर्द्वर्यणुकस्यैव प्रागूर्ध्वर्ं चानुपलम्भो न दोाय । न चात्र प्रमाणाभाव:, 'मनोगतास्तु संस्कारान्' इति स्मृतिवचनस्यैव प्रमाणत्वात् । एतेनैतदपि प्रत्युक्तम् । यत्प्रतीतिकारणाभाव इत्युक्तं, मनस एव तत्कारणत्वेन स्मृत्युक्तत्वात् । ईश्-वरस्येति कर्तृनिर्देश: । ननु कर्तृस्तदैव सृयिसंहारकराणत्वमसम्भावितमित्यत उक्तम्- अशक्येति ।। एवंच सत्यदृयादिकं निमित्तं प्रसिद्धमेव । न केवलमर्थानां सत्यत्वसम्भवेन भगवदधीनत्वम्, किन्तु ज्ञानस्येत्यभिप्रेत्याह- तस्यापीति । सृष्ट्वेत्यनन्तरं 'प्रदर्श्य' इत्युपस्कर्तव्यम् । तेनात्र तच्छब्देन तत्प्रदर्शनं परामृश्यते । तथाच न केवलमीश्-वर: स्वाप्नान् गजादीन् सृष्ट्वा, संस्कारतामापादयति, किन्तु तान् प्रदर्श्य, तस्य दर्शनस्य तिरोधानमपि करोतीत्यर्थ: । नत्वेतत्स्वप्नस्य सत्यत्वे, 'अविद्यमानानेव करितुरगादीनपश्यम्' (इत्युत्तरकालिक)तिरोधानानुभवविरोध इत्यत आह- जाग्रत्त्वेति ।। मात्रेति पदार्थस्वर्ं पं व्यावर्तयति । जाग्रत्त्वं नाम जागरानुभूतपदार्थैरेकत्वम् । तथाच स्वाप्न एवायं, न जागरानुभूत इत्यनुभवात्, जाग्रत्त्वप्रतीतिरेव भ्रान्तिर्न स्वापनपदार्थस्वर्ं पप्रतीति:, नायं गज इति बाधाभावादिति भाव: । ननु जाग्रत्त्वस्यापि सोपादानत्वसम्भवात्कथं तत्प्रतीति भ्रान्तिरित्युच्यत इति चेर्ंा । नहि वयं कारणसामग्रीसम्पादनसम्भवमात्रेणार्थानां सत्यतामातिष्ठामहे किं तु बाधाभावेनैव सामग्र्यभावेनासत्त्वं ब्रुवाणं प्रति तु तदसिद्धेरुक्ता । अस्ति च जाग्रत्त्वप्रतितेर्बाध: 'स्वाप्न एवायं, न जागरानुभूत:' इत्याद्युदयादिति भाव: । नन्वेवं स्वाप्नपदार्थानां सत्यत्वे, कथं श्रुतिस्मृतिभ्यां तदसत्त्वमावेद्यत इत्यत आह- जाग्रत्त्वेति ।। जाग्रत्त्वप्रतीतेर्भ्रान्तित्वात्तद्वायं श्रुत्यादिकमिति भाव: । एवं चेश्-वरस्याशक्यकर्तृतायां शक्ते:, स्वाप्नपदार्थानामीश्-वरसृयत्वेन तदधीनत्वात्, युक्तं तस्य महामहिमत्वमिति भाव: । (अयं च न्यायो 'निर्मातारम्' इत्यनेन सूचित: ।) ।। १ ।। ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ।। इत्यत्र, सर्वस्य भगवदधीनत्वोक्तया, विशेाानुक्तया, स्वप्नतिरोभावो भगवदधीनो भगवदधीनो न वेति सन्देहे, नेति पूर्व: पक्ष:, भगवदधीन इति सिद्धान्त: । तत्र 'अविज्ञातम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं

विवृण्वन्प्रतिक्षिपति-

नचाविज्ञानमात्रेण स्वप्नप्रतीत्या ज्ञानशक्तयैव स्वप्नतिरोधानं नेशेनेति वाच्यम् बोधे जीवस्यास्वातन्त्र्र्यात् ।

।। न चाविज्ञानेति ।। बाह्याविज्ञानादेव हि स्वप्न: प्रतीयते, अतो ज्ञानशक्तयैव तिरोभावोऽप्युपद्यते । शक्तिरेाा ज्ञानस्य, यत्समानविायाज्ञानं नाशयतीति । एवंच न तस्य महामहिमत्वमिति नेति भाव: । तद्धेतुत्वेन 'स्वतोऽबोध:' इत्युक्तं सिद्धान्तन्यायं विवृणोति- बोध इति ।। बोधे प्रबोधे । अनेनानुव्याख्याने, 'स्वत:' स्वातन्त्र्र्येण 'अबोध:' प्रबोधाभाव इति अकारप्रश्-लेा इत्युक्तं भवति । नन्वज्ञाननिमित्तत्वात्स्वप्नस्य, ज्ञाननैव स्वप्नतिरोधासम्भवाज्जीवस्यास्वातन्त्र्यकथनं क्वोपयुक्तमित्यतो ज्ञानाज्ञानयोजर्र्ीवभिर्ंत्वं वा, तत्स्वर्ं पत्वं वा, भिर्ंाभिर्ंत्वं वा, भिर्ंत्वाभिर्ंत्वो भयराहित्यर्ं पानुभयत्वं वेति विकल्पान् हृदि निधाय, क्रमेण सर्वत्रापि दोामाह-

ज्ञानाज्ञानयोस्तदन्यत्वे जडत्वात्कैमुत्येनास्वातन्त्र्यम् । तत्स्वर्ं पत्वे तेनैव व्याख्यातत्वात् । उभयात्मकत्वे दोाद्वयापातात् । अनुभयात्मकत्वे स्वव्याहते: ।

।।ज्ञानाज्ञानयोरित्यादिना ।। तच्छब्देन जीव: परामृश्यते । अज्ञानाज्ञानाभ्यामेव स्वप्नतिरोधानसम्भवात्किमीश्-वरेणेति वदता पूर्वपक्षिणा ज्ञानाज्ञानयरोरीश्-वरभिर्ंत्वमङ्गीकृतमेवेति तर्ंोक्तम् । तथा चेश्-वरलक्ष्मीभिर्ंत्वे सति, जीवाभिर्ंत्वं जडत्वे हेतुरिति नेश्-वरादौ व्यभिचार: शङ्कनीय: । यदा चेतनस्य जीवस्यास्वातन्त्र्यम्, तदा किं वाच्यं जडर्ं पज्ञानाज्ञानयोरित्यभिप्रेत्य, कैमुत्येनेत्युक्तम् । तेनैवास्वातन्त्र्यतयोक्तजीवेनैव । ज्ञानाज्ञानयोरपि जीववदस्वातन्त्र्र्यात्प्रबोधहेतुत्वानुपपत्तिरिति भाव: । दोाद्वयापातादिति ।। भिर्ंत्वमादाय जडत्वात्कैमुत्येनास्वातन्त्र्यं,

अभिŽात्वमादाय जीवगतास्वातन्त्र्यमिति दोद्वयापातादित्यर्थः । व्याहतेरिति ।। भिŽां न भवतीत्युक्ते, अभिŽामित्येवोक्तं स्यात्, भिŽाभिŽाऽभिŽात्वराहित्याभावात्, पुनर्न भवतीत्युक्ते, व्याहतिः । एवमभिŽां न भवतीत्युक्ते, भिŽामित्येवोक्तं स्यात् भिŽाभिŽा भेदराहित्याभावात्, पुनर्भिŽां न भवतीत्युक्ते, व्याहतिरित्यर्थः । अज्ञानादेः स्वप्नादिनिमित्तत्वस्य प्रमाणसिद्धतवादुक्तानुपपत्तिः कथं चित्परिहर्तव्येत्यत आह-

तावन्मात्रनिमित्तत्वे मानाभावात् । सर्वस्येशवशत्वे मानाच्च ।। २ ।। नच कालापेक्षयैव जागरितम् अचेतनत्वादेव कालस्य ।

।। तावन्मात्रेति ।। अनुभवस्य विद्यमानत्वात्कथं मानाभाव इत्यत उक्तम्- मात्रेति ।। अनुभवस्य, ज्ञानाज्ञानयोर्निमित्तत्वमात्रवियत्वमिति भावः । न केवलं स्वप्नादेरज्ञानादिमात्रनिमित्तत्वे मानाभावादेमङ्गीकारः किं तु ईशहेतुत्वे मानसद्भावाच्चेत्याह- सर्वस्येति ।। अनेन जीवादेरस्वातन्त्र्यमपि प्रमापितं भवति । अत एव 'स्वप्नादेः' इत्यनुक्तवा, सर्वस्येत्युक्तम् । एवंच जीवस्य स्वतः स्वातन्त्र्ेण प्रबोधाभावात्, ज्ञानादीनां जडत्वेन सुतरां स्वातन्त्र्ा भावादीश्वरस्यैव स्वप्नतिरोधानहेतुत्वमिति भावः । (अत्र पूर्वपक्षसिद्धान्तन्यायौ 'ततो ह्यस्य बन्धविपर्ययौ' इत्यनेन दृयान्तास्वातन्त्र्यज्ञानाज्ञानाधीनबन्धमोक्षयोः परमात्माधीनत्वोक्तया, 'अविज्ञानम्', 'स्वतो बोधः' इति क्रमात्सूचितौ ।) ।। २ ।। ॐ देहयोगाद्वासोऽपि ॐ ।। इत्यत्र, पूवर्ोक्तरीत्या, जाग्रदवस्था किमीश्वराधीना, न वेति सन्देहे नेति पूर्वः पक्षः, ईश्वराधीनेति सिद्धान्तः । तत्र 'कालः' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति- नच कालेति ।। एवंच कालापेक्षया जागरणस्य जायमानत्वाŽीश्वरस्य महामहिमत्वमिति नेति भावः । (अयं च न्यायो - 'वासोऽपि' इत्यपिपदात् 'पराभिध्यानात्तु' इत्यस्यानुर्कादवधारणार्थकतुशब्देन कालनिोधात्कालाधीनत्वं जाग्रदवस्थाया इति सूचितः ।) तद्धतुत्वेन 'तदेव' इत्युक्तसिद्धान्तन्यायं विवृणोति- अचेतनत्वादेवेति ।। एतदनन्तरं 'अस्वातन्त्र्ात्' इति ग्राह्यम् । तथाच 'तदेव' इत्यनुव्याख्याने, तच्छब्देन 'स्वतोऽबोधः' इत्यत्राभिप्रेतास्वातन्त्र्यस्य निमित्तीभूताचेतनत्वस्य परामर्श इति भावः । कालस्यास्वातन्त्र्े कैमुत्यद्योतनार्थं अचेतनत्वादेवेत्येवकारः तदेवोपपादयति- चेतनान्तरस्येति ।। ईश्वरव्यावृत्त्यर्थमन्तरग्रहणम् । कालस्य निमित्तमात्रत्वमिति भावः । अत एव पूर्वपक्षे 'कालापेक्षयैव' इत्युक्तम् । ननु मास्तु कालस्याचेतनत्वेन, जागरणस्य तदधीनत्वम्, तथापि नेश्वराधीनत्वं सम्भवति, जीवस्य तदधीनत्वात् । जागरणे हि जीवस्य स्वातन्त्र्यं प्रतीयत इत्यतो वाह-

चेतनान्तरस्याप्यस्वातन्त्र्ात् ।। ३ ।। नच परमात्मनोऽन्यत्रावस्थाने दुःखित्वप्राप्तेर्नाडीषु सुप्तिर्न भवति ।

।। चेतनान्तरस्यापीति ।। न केवलं कालस्येत्यपिशब्दः । एवंच कालस्याचेतनत्वादीश्वरस्यैव जाग्रदवस्थाप्रेरकत्वमिति, युक्तं तस्य महामहिमत्वमिति भावः । (अयं च न्याया निोधहेत्वाकाङ्क्षायामस्वातन्त्र्यस्यैव

तद्धतुत्वसम्भवात्तत्प्रयोजकमचेतनत्वमित्यवधारणार्थक तुशब्देन सूचितः ।) ।। ३ ।। ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ॐ ।। इत्यत्र, 'सता सोम्य तदा सम्पŽो भवति' , 'यत्रैतत्सुप्तः समस्तः सम्प्रसŽीः स्वप्नं न विजानात्यासु नाडीषु सुप्तो भवति' इति श्रुतिभ्यां सुप्तिः किं भगवति, नाडीषु वेति सन्देहे, भगवत्येव, न नाडीविति पूर्वः पक्षः, नाडीस्थपरमात्मनीति सिद्धान्तः । तत्र 'दुःखम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच परमात्मन इति ।। दुःखित्वप्राप्तेरिति जाग्रत्स्वप्नयोः परमात्मनोऽन्यत्रावस्थाने दुःखित्वदर्शनादित्यर्थः । न्यायस्य पूर्वपक्षफलसम्बन्धस्तु मूल एव सयः । विपक्षबाधकैतŽयायोत्प्रेक्षामूलं च सूत्रे 'नाडीषु' इति पदम् । तेन हि नाडीस्थपरमात्मनि सुप्तिरिति, सिद्धान्तप्रदर्शनेन, नाडीषु सुप्तिर्नेति पूर्वपक्षन्यायं पूर्वपक्षसाध्यं द्योत्यते । तत्र दुःखाभावो हेतुः । तस्याप्रयोजकतापरिहारायान्यथा 'दुःखं स्यात्' इति विपक्षबाधकतर्कोŽायनात् । (अयं च न्यायः 'आत्मनि' इत्यनेन

नाडीाु सुप्त्यङ्गीकारे, दु:खप्राप्तिपरिहारकेण सूचित: ।) त€तुत्वेन 'अमानक्लृप्ति:' इत्युक्तसि€ान्तन्यायं विवृणोति-

उभयस्वीकारोपपत्तौ मानस्य क्लृप्त्यकारणमित्यनवस्थितिदोाादतिप्रसङ्गात् ।। ४ ।। नच प्रबोधस्य पृथगपि कारणदृये: क्वचित्तदेव ।

।। उभयेति ।। नाडीस्थपरमात्मनि सुप्त्यङ्गीकारेण, नाडीाु, परमात्मनि चेत्युभयस्वीकारेण प्रमाणभूतस्य 'सता सोम्य तदा सम्पŽा:' ,'नाडीाु सुप्तो भवति' इति श्रुतिद्वयस्य व्यवस्थोपपत्तौ सत्यामपि, मानस्योदाहृतिŽ पस्य या क्लृप्ति: नाडीस्थपरमात्मनि सुप्तिरिति, तदकारणमिति कृत्वा, तदनभ्युपगम इति यावत् । अव्यवस्थितिदोाात् सर्वत्र प्रमाणेन प्रमेयव्यवस्थित्यभावŽ पाद्दोाात्, प्रत्यक्षादिप्रमाणसि€स्यापि परित्यागŽ पादतिप्रसङ्गादित्यर्थ: । एवंच परमात्मन्येव सुप्त्यङ्गीकारेऽमानक्लृप्तिप्रसङ्गाŽाडीस्थपरमात्मन्येव सुप्तिरिति युक्तं तस्य माहात्म्यमिति भाव: । (अयं च न्याय: 'तच्छ्रुते:' इत्यनेन परमात्मन्येव सुप्त्यङ्गीकारे, 'आसु तदा' इति 'सता सोम्य' इति श्रुतिलक्षणमानक्लृप्त्यभाव: स्यादिति सूचित: ।) ।। ४ ।। ॐ अत: प्रबोधोऽस्मात् ॐ ।। इत्यत्र, सर्वस्य भगवदधीनत्वोक्तया, सुप्तिप्रबोधो भगवधीन इति विशोाानुक्तया च, सुप्तिप्रबोधो भगवदधीनो न वेति सन्देहे, नेश्वरैकाधीन इति पूर्व: पक्ष:, ईश्वरैकाधीन इति सि€ान्त: । तत्र 'पृथग्भाव:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच प्रबोधस्येति ।। एवंच प्रबोधे पृथगपि कारणस्य भेरीताडनादे:, भावात् सद्भावाŽा तस्य माहात्म्यमिति नेति भाव: । (अयं च न्याय: सावधारणेन 'अस्मात्' इत्यनेन प्रतोाध्यतया प्रबोधस्य कारणान्तरदृष्टिरिति सूचित: ।) त€तुत्वेन 'सन्मानम्' इत्युक्तसि€ान्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- न ऋत इति ।। श्रुते: सम्यङ्ज्ञानादिति सामानाधिकरण्येन सम्बन्ध: । श्रुते: स-यार्थादिज्ञापनार्थं सम्यगित्युक्तम् । यद्वा 'यतस्तस्मिन्' इति भायदिशा श्रुत्युपोद्बलितŽ पसम्यक्तवयुक्तयुक्तिŽ पसम्यङ्ज्ञानादित्यर्थ: । अस्मिन्पक्षे, उपोद्बलश्रुते: सत्वाद्युक्तिŽ पसम्यङ्ज्ञानादिति वैयधिकरण्येन योजना । अत एव व्यवधारणकारणम् । तत्रापीति ।। यत्र भेरीताडनादीनां कारणत्वं परेणोच्यते, तत्रापीत्यथर्: । एवंच सम्यङ्ज्ञानादीश्वरस्यैव सुप्तप्रबोधकत्वमिति युक्तं तस्य माहात्म्यमिति भाव: । (अयं च न्याय: 'अस्मात्' इत्यनेनान्यनिोधेन, परमात्मन एव प्रबोधकत्वोक्त्या, न ऋत इति निरवकाशत्वापौरुोयत्वŽ पसम्यक्तवयुक्तेन 'न ऋत:' इति श्रुतिमानेनेश्वरस्यैव प्रबोधकत्वमिति सूचित: । यद्वा 'अत:' इत्यनेन, 'यतस्तस्मिन्' इति भायदिशा श्रुत्युपोद्बलितत्वŽ पसम्यक्तवयुक्तयुक्तिŽ पं मानं सन्मानमिति सूचित: ।) ।। ५ ।। ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्य: ॐ ।। इत्यत्रावस्थादीनां भगवदधीनत्वप्रतिपादकवाक्यस्योभयथाप्यर्थसम्भवात्, किं सर्वजीवानां सर्वकालीनावस्था: भगवदधीना:, किं वा केाञ्चित् किञ्चित्कालीना इति सन्देहे, केाञ्चित्किञ्चित्कालीना एव भगवदधीना:, इति पूर्व: पक्ष:, सर्वेाां सवर्कालीना: इति सि€ान्त: । तत्र 'पृथग्भाव:' इत्युक्तमेव पूवर्पक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच राजादीनामिति ।। पृथग्दर्शनात्- पृथक्तवदर्शनात् खण्डेशत्वदर्शनादित्यर्थ: । देशकालादिभेदेन नियामकान्तरकल्पनेत्यर्थ: । अनेनेश्वर: खण्डेशो भवितुमर्हति, अधिपतित्वात्, राजादिवदिति प्रयोग: सूचितो भवति । (एवंच राजादीनां पृथगपि दर्शनात्, तद्वदीश्वरानेकत्वसम्भवाŽा सर्वावस्थाप्रेरकत्वŽ पं सर्वेश्वर्यमिति नेति भाव: । अयं च न्याय: पक्षान्तरनिोधार्थक एवशब्देन निोध्यतया राजादीनां पृथग्दर्शनाŽा सर्वावस्थाप्रेरकत्वमिति सूचित: ।) त€तुत्वेन 'सन्मानम्' इत्युक्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति-

तिरस्कर्ता च कर्ता च न खण्डेश: स राजवत् इति श्रुतिमानात् ।। ६ ।। नच मोहे ब्रह्मप्राप्तिरेव पृथगवस्थात्वादिति वाच्यम् परिशोामानादर्धप्राप्तित्वावगमात् ।। ७ ।।

।।देशेति ।। खण्डेश: कदाचिदेव कस्याञ्चिदवस्थायामेव कांश्चिर्चŽायमयतीत्यर्थ: । सच्छब्दार्थ:- श्रुतीति ।। ततश्चानुमानं

बाधितविायमिति भाव: । एवंच सन्मानादीश्-वरस्यैव सर्वावस्थाप्रेरकत्वमिति युक्तं तस्य माहात्म्यमिति भाव: । (अयं च न्याय: शब्दपदेन श्रुतिमानाद्विणो: सर्वावस्थाप्रेरकत्वमिति सूचित: ।) ।। ६ ।। ॐ मुग्धेऽर्धसम्पत्ति: परिशेाात् ॐ ।। इत्यत्र, द्विविधावस्थादर्शनात्, मोहावस्था किमीश्-वरे, तदन्यत्र वेति सन्देहे, ईश्-वर एवेति पूर्व: पक्ष:, ईश्-वरेऽर्धप्रि ाप्तिरिति सि€ान्त: । तत्र 'पृथग्भाव:' इत्युक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नचेति ।। एवकारेण परमात्मविदूरत्वं सामीप्यार्धप्रवेशात् व्यावतर्यति । जाग्रत्स्वप्नाभ्यामिति शेा: । नन्वेवं सुप्तिसङ्करापत्तिर्दो: । मोहस्य सुप्तिसमानधर्मतया तत्साङ्कर्यस्येयत्वात् । अत्र पृथग्भाव: पृथक्त्वमिति न्यायो विवृतो भवति । अत एव पृथगवस्थात्वादित्युक्तम् । एवंच पृथग्भावान्मोहस्य जाग्रत्स्वप्नाभ्यां पृथक्त्वात्, परमात्मनि समग्रप्रवेशेन सुप्तिसाङ्कर्येण, पृथङ्मोहावस्थेति भगवतस्तत्प्रवर्तकत्वं नेति न वाच्यमिति भाव: । (अयं च न्याय: 'परिशेाात्' इत्यनेन, परिशेाण पृथगवस्थात्वमित्यपि वदता सूचित: । अत एवोक्तं तत्वप्रकाशिकायां, 'परिशेाप्रकारान्तरप्रदशर्नं वै तत्' इति ।) त€तुत्वेन 'सन्मानम्' इत्युक्तमेव सि€ान्तन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृणोति- परिशेाति ।। अर्धप्राप्तित्वावगमात्, 'मोहस्य' इति शेा: । अयमर्थ: । न तावन्मोहस्य सुप्त्यन्तर्भावो युक्त:, मोहे 'एतावन्तं कालमहं दु:खमनुभवामि' इति दु:खानुसन्धानात् । तदुक्तं, 'दु:खमात्रप्रतिस्मृते:' इति । सुप्तौ दु:खानुसन्धानाभावात् । नापि जाग्रत्स्वप्नयोरन्तर्भाव:, मोहे दु:खात्मकालाद्वयतिरिक्तविायादर्शनात् । दु:खमात्रप्रतिस्मृतेरित्यत्र, दु:खशब्दस्य यावदनुभूतोपलक्षकत्वात् । तयोस्तदतिरिक्त(त्व)स्यापि दशर्नात् । तथाच मोह: प्रसि€ावस्थाभ्य: पृथक्, अनुपपŽान्तर्भावे सत्यवस्थात्वादिति परिशेाानुमानेन, मोहावस्था पृथगेव । मोहस्य पार्थक्ये, कीदृशेाऽसाविति चेत्, अर्धप्राप्तिरिति ब्रूम: । नच तत्र प्रमाणाभाव:, परिशेास्यैव प्रमाणत्वात् । न तावन्मोहे समग्रप्राप्ति: सम्भवति, दु:खानुसन्धानात् । नाप्यप्राप्ति: अन्यार्थादर्शनात् । तस्मादधर्प्राप्तिŽ पमेवाङ्गीकर्तव्यमिति । एवंच परिशेाख्यसन्मानात्, मोहस्यार्धप्राप्तित्वŽ पपृथगवस्थात्वावगमाद्युक्तमेव हरेस्तत्प्रवर्तकत्वमिति भाव: । (अयं च न्याय: 'परिशेाात्' इत्यनेनोक्त: ।) ।। ७ ।। ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ ।। इत्यत्रानेकस्थानस्थितानां घटादीनां भिŽात्वस्याकाशादीनामभिŽात्वस्य दर्शनात्प्रतिशरीरं जाग्रदादिस्थानेाु स्थित: ईश्-वर: किमन्योन्यं भिŽा:, उताभिŽां इति सन्देहे, भिŽा एवेति पूर्व: पक्ष:, अभिŽा एवेति सि€ान्त: । तत्र 'स्थानभेद:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच स्थानभेदाद्विणोरपि भेद: अयमेव स: नेह नानास्ति किञ्चनेत्यादि श्रुतिबलात्स्थानानां भेदस्तस्याभेद इति व्यवस्थोपपत्ते: ।। ८ ।।

।। नच स्थानभेदादिति ।। स्थानानां सुरासुरनरादिशरीराणां, अत्रापि दक्षिणाक्ष्यादीनां, भेदादित्यर्थ: । अनेन, सूत्रे स्थानशब्दस्तद्भेदोपलक्षक इत्युक्तं भवति । अपिपदेन घटादिदृयान्तं समुच्चिनोति । इदमुक्तं भवति । प्रतिशरीरं जाग्रदादिस्थानेाु स्थित: परमात्मा, अन्योन्यं भिŽा:, भिŽास्थानत्वात्, घटपटवदिति । न चैकस्यैव घटस्य कालभेदेन भिŽास्थानत्वोपपत्तेर्व्यभिचार इति वाच्यम्, युगपदित्यस्य हेतुविशेाणत्वेन विवक्षितत्वात् । तथाप्याकाशे व्यभिचार इति चेŽा, समग्रŽ पेणानेकस्थानत्वस्य विवक्षितत्वात् । आकाशस्यैकदेशतोऽनेकस्थानत्वेन, समग्रŽ पेणानेकस्थानत्वाभावात् । नच स्वŽ पासि€:, 'सप्ताङ्ग एकोनविंशतिमुख:' इत्यादिश्रुतिसि€त्वात् । नच 'एतमेव ब्रह्मेत्याचक्षते' इति श्रुतिविरोधोऽनुमानस्येति वाच्यम् । तस्या: 'कार्यकारणब€ौ ताावियेते विश्-वतेजसौ । प्राज्ञ: कारणब€स्तु द्वौ तु तुर्येन सि€यते' इत्यादिश्रुतिसि€त्वेनाप्रामाण्यात् । एवंच स्थानभेदादीश्-वरस्यापि भिŽात्वाद्भिŽानां च गुणतारतम्यस्यानुग्राह्यानुग्राहकभावस्य दर्शनाŽा तस्य महामहिमत्वमिति नेति भाव: । (अयं च न्याय: 'स्थानतोऽपि' इत्यनेन स्थानभेदात्परमात्मनोऽपि भेद इत्युक्त: ।) त€तुत्वेन 'व्यवस्था' इत्युक्तसि€ान्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- अयमेव स इति ।। अभेद एवेत्येवकारेण भेदाभेदनिरास: । इदमुक्तं भवति । यदुक्तं अभेदश्रुतेर्भेदश्रुति॰ ाधितत्वेनाप्रामाण्याŽा तद्बाधोऽनुमानस्येति, तदयुक्तम्, भेदश्रुते: स्थानभेदविायत्वेन सावकाशत्वात् । 'भिŽोऽभिŽाु

संस्थिते:' इति वचनात् । अभेदश्रुतेस्तु, वियान्तरभावेन निरवकाशत्वात् । निरवकाशानुसारेण सावकाशस्य नेयत्वात् । नच भेदाभेदाङ्गीकारेण तदुपपत्ति:, 'अयमेव स:' 'नेह नानास्ति किञ्चन' इत्यादिप्रमाणविरोधात् । अत्राद्येनैवकारेण Ž पाणां परसरं भेदो निि€यते । द्वितीयेन तु, 'नेह नानास्ति' इति सयोऽस्य भेदाभेदनिोध इति । एवंचा भेदश्रुतेर्निरवकाशत्वेन बलवत्त्वात्तदनुसारेण भेदश्रुते: स्थानभेदवियत्वमेवेति व्यवस्थोपपत्तेरनुमानस्याभेदश्रुतिबाधितत्वाद्वि-णो: स्थानतोऽपि भेदाभावेनानुग्राहकत्वाभावात्सि€ महामहिमत्वमिति । (अयं

च न्याय: 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति 'प्रत्येकमतद्वचनात्' इति 'अपिचैवमेक:' इति सूत्रै:, स्थानानां भेद:, परमात्मनोऽभेद:, इति व्यवस्थोपपत्तेरिति सूचित: ।) ।। ८ ।। ॐ अŽ पवदेव हि तत्प्रधानत्वात् ॐ ।। इत्यत्र, युक्तायुक्तयो: साधनत्वोक्तिदर्शनाद्विणुप्राप्तिसाधनत्वोक्तिर्युक्ता, न वेति सन्देहे, न युक्तेति पूर्व: पक्ष:, युक्तैवेति सि€न्त: । तत्र 'विरु€त्वम्' इत्युक्तमेव पूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच Ž पवत्त्वाŽ पवत्त्ववचनयोर्विरोधादप्रामाण्यम् । अप्राकृतŽ पवत्त्वमिति व्यवस्थोपपत्ते: ।। ९ ।।

।। नच Ž पवत्त्वेति ।। विणु: किं Ž पवान् स्यादुताŽ पवान् वा । नाद्य: । 'तदŽ पमनामयम्' इत्याद्यŽ पत्वाि भधायकश्रुतेरप्रामाण्यप्रसङ्गात् । अनित्यत्वप्राप्तेश्-च । न द्वितीय: । 'रुग्मवर्णं कर्तारम्'इत्यादिŽ पप्रतिपादकश्रुत्यप्रामाण्यापत्ते: । सौन्दर्याद्यभावप्रसङ्गाच्चेत्यर्थ: । एवंच श्रुत्यो: परसरं विरोधात्, Ž पाद्यसि€ौ, सौन्दर्याद्ययोगेन न परमात्मनि भक्तिर्युक्तेति नेति भाव: । (अयं च न्याय: 'प्रकाशवच्चावैयर्थ्यम्' इत्यनेन श्रुतिव्यवस्थाप्रदर्शनेन, Ž पवत्त्वाŽ पवत्त्ववचनयोर्विरु€त्वमिति सूचनेन सूचित: ।) त€तुत्वे 'व्यवस्था' इत्युक्तसि€न्तन्यायं विवृणोति- अप्रकृतेति ।। विणोरिति शेा: । नञोऽभावार्थत्वेन, प्राकृतŽ पत्वाभाव इत्यपि व्याख्येयम् । तथाच 'रुग्मवर्णम्' इत्यादिश्रुतेरप्राकृतŽ पवत्त्वप्रतिपादकत्वं 'तदŽ पम्' इत्यादिश्रुते: प्राकृतŽ पा भावप्रतिपादकत्वमित्यनेन प्रकारेण व्यवस्थोपपत्तेविरोधाभावेन न वचनयारप्रामाण्यम् । नापि सौन्दर्याद्य भावोऽनित्यत्वप्राप्तिश्-च, अप्राकृतŽ पवत्त्वाङ्गीकारात् । अनित्यत्वप्राकृतŽ पानङ्गीकारादित्यर्थ: । एवंच व्यवस्थया श्रुतिप्रामाण्यात्सौन्दर्यादिसम्भवेन, युक्ता परमात्मनि भक्तिरिति भाव: । (अयं च न्याय: 'प्रकाशवच्चावैयर्थ्यम्' इत्यनेन विलक्षणाप्राकृतŽ पवत्त्वेन प्राकृतŽ पराहित्यमिति सूचित: ।) ।। ९ ।। ॐ अत एव चोपमासूर्यकादिवत् ॐ ।। इत्यत्र, युक्तायुक्तसाधनदर्शनेन, हरौ भक्तिर्युक्ता, नवेति सन्देहे, न युक्तेति पूर्व: पक्ष:, युक्तेति सि€न्त: । तत्र 'न्यायसाम्यम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच परमात्मनोऽचेतनत्वन्यायसाम्येन जीवस्यापि अभेद: अल्पगुणत्वादिविरोधात् ।। १० ।।

।। नच परमात्मनेति ।। परमात्मनाभेद इत्यन्वय: । चेतनत्वेऽप्युपलक्षणम् । अपिशब्दो दृयान्तीभूतमत्स्यादिसमुच्चयार्थ: । यद्वाऽभेदोऽपीति सम्बन्ध: । तेन 'भेदव्यपदेशाच्च' इत्यादिना जीवपरमात्मभेदस्य प्रतिपादितत्वात्, कथं तदभेदेन पूर्वपक्षोत्थापनमित्याशङ्का परिहृता भवति । एतदधिकरणपूर्वपक्षिणा जीवब्रह्मणोरंशांशिभावेन, भेदा भेदाङ्गीकाराद्भेदाविरोधात् । एवंच जीव:, परमात्माभिŽा:, चेतनत्वात्, अंशवत्, मत्स्यादिवत् इत्यनुमानेन जीवस्य परमात्माभिŽात्वात्स्वस्मिंश्-च व्यक्तययोगाŽा भक्तिर्युक्तेति नेति भाव: । (अयं च न्याय: भेदनिरासकचशब्देन प्राप्तस्य निरासायोगादिति तत्प्रापकत्वेन सूचित: ।) त€तुत्वेन 'अल्पता' इत्युक्तसि€न्तन्यायं विवृणोति- अल्पगुणत्वादिति ।। 'जीवस्य' इत्यनुवर्तते । आदिपदेन परमात्मप्रतिबिम्बत्वं गृह्यते । यद्वा परमात्मन: पूर्णगुणत्वमादिशब्दार्थ: । तथाच जीव: परमात्माभिŽो न भवति, तद्विरु€धर्माधिकरणत्वात्, प्रतिबिम्बत्वात्, सम्प्रतिपŽावदिति अनुमानविरोधाŽा जीवस्य परमात्माभेद: । नच पूर्वोत्तरकालावस्थायिभिŽाभिŽा देहादौ व्यभिचार:, देशकालपुरुाावस्थादिभेदानिब

ार्धविरुद्धधर्माधिकरणत्वस्य हेत्वर्थात् । नच चेतनांशत्वन्यायविरोध:, श्रुत्यादिसिद्धतदनुमानेन तयोरेव बाधितत्वात् । एवंचाल्पगुणत्वाज्जीवस्य, अनन्तगुणेन परमात्मनाभेदाभावाद्युक्ता तत्र भक्तिरिति भाव: । (अयं च न्याय: तदधीनत्वाद्यथर्केण 'अत एव' इत्यनेन सूचित: । तदपेक्षयाल्पतां विना तदधीनत्वायोगात् ।) ।। १० ।। ॐ अम्बुवदग्रहणात्तु न तथात्वं ॐ ।। इत्यत्र, कर्तव्याकर्तव्यार्थदर्शनाद्भगवद्भक्ति: कर्तव्या, न वेति सन्देहे, न कर्तव्येति पूर्व: पक्ष:, कर्तव्येति सिद्धान्त: । तत्र 'सतोभव' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच सादृश्यस्य सत्वात्साधनं विनैव जीवस्य तादृक्तवव्यक्ति: अनादित: संसारस्यानिवृत्तत्वेन भावात् ।। ११ ।।

।। नच सादृश्यस्येति ।। सत्वाद्Ž्यत्यमिति शेा: । साधनं विनैवैति ।। विद्यमानस्य कदाचित्स्वयमेव सुप्ताविवाभव्यक्तिसम्भवादिति भाव: । तादृक्तवं ज्ञानानन्दादिसादृश्यम्, अनेन, 'सतो भव:' सत्त्वमिति न्यायो विवृतो भवति । एवंच ज्ञानानन्दादिसादृश्यस्यानादित: सत्वेन, भक्तिं विनैवाभिव्यक्तिसम्भवाद्Ž्ा तदर्थं माहात्म्यवर्णनमिति नेति भाव: । (अयं च न्याय: 'तथात्वम्' इत्यनेन विद्यमानस्याभिव्यक्तत्वमिति वदता सूचित: ।) तद्Ž्तुत्वेन 'भव:' इत्युक्तसिद्धान्तन्यायं विवृणोति- अनादित इति ।। नचाप्रयोजको हेतु: । ज्ञानानन्दादिसादृश्यस्य साधनं विनैवाभिव्यक्तत्वेनानादिसंसारप्रवाहानुपपत्ते । एवंचानादित: संसारस्य सद्भावात्, ज्ञानानन्दादिसादृश्याभिव्यक्तयर्थं हरौ

भक्ति: कर्तव्येति भाव: । (अयं च न्यायो 'न तथात्वम्' इत्यनेन सतोऽप्यनभिव्यक्तत्वं वदता सूचित: ।) ।। ११ ।। ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ ।। इत्यत्र, एकप्रकारेण चेतनत्वादीनां तारतम्योपेतज्ञानादीनां धर्माणां दर्शनेन, भगवद्भक्ति: किं भक्तेवेकप्रकारा, उत वृद्धिह्रासवतीति सन्देहे, एकप्रकारैवेति पूर्व: पक्ष:, वृद्धिह्रासवतीति सिद्धान्त: । तत्र गुणसाम्यमित्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच मुक्तत्वादिगुणसाम्याद्ब्रह्मादीनां भक्तयादिगुणसाम्यम् । यथायथाधिकारो विशियते एवं ज्ञानं भक्तिर्बलं च विशियते ।

।। नच मुक्तत्वादिति ।। तत्र मुक्तत्वं नाम संसारनिवृत्ति: । तस्या: सर्वत्र साम्यम् । आदिशब्देनानन्दत्वादि ग्राह्यम् । अत्र, गुणसाम्यमित्येतत् साध्यहेतुप्रतिपादकत्वेन द्वेधा विवृतमिति ज्ञातव्यम् । नचाप्रयोजको हेतु:, कालसाम्येति, साधनातिशयेन स्ववैयर्थ्यं केाञ्चिदसम्यग्भक्तिर्वा स्यादिति । एवंच फलभूतमुक्तत्वादिसाम्यात्, साधनभूतभक्तयादेरपि न तारतम्यमिति नेति भाव: । (अयं च न्यायो 'अदर्शनाच्च' इति सूत्रेण मुक्तत्वादिफलतारतम्यं प्रतिपादयता सूचित: । अन्यथा तत्कथनमसङ्गतं स्यात् ।) तद्Ž्तुत्वेन 'विशेाशेादृयि:' इत्युक्तसिद्धान्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति- यथायथेति ।। अधिकार: श्रवणादौ । एते ज्ञानभक्तयादय: मुक्तावेतेाां फलत्वेनाङ्गीकारात् । ब्रह्मणे चतुर्मुखाय, विशेादृये: साध्यसाधनतारतम्यदर्शनादित्यर्थ: । एवंच साध्यसाधनतारतम्यदर्शनादित्यर्थ: । एवंच साध्यसाधनतारतम्यलक्षणविशेास्य श्रुत्या दृयेर्न भक्तयादिसाधनस्यैकप्रकारतेति भाव: । (अयं च न्यायो 'अदर्शनाच्च' इत्यनेनैव सूत्रेण विशेादृर्यिर्विशेाश्रुतिरित्युक्त: ।) ।। १२ ।। ॐ प्रकृतैतावत्त्वं हि प्रतिोधति ततो ब्रवीति च भूय: ॐ ।। इत्यत्र गुणानामपि च युक्तायुक्तत्वदर्शनाज्जगत्पालकत्वद्Ž पो गुणो विणोर्युक्तो न वेति सन्देहे, न युक्त इति पूर्व: पक्ष:, युक्त इति सिद्धान्त: । तत्र 'अयोग:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

मुक्तावानन्द एते च गुणा विशियन्त अत आहुर्ब्रह्मणे मुक्ता बलिं हरन्तीत्यादिविशेादृये: ।। १२ ।। नच संहारकर्तुरसंहारादन्यरक्षाया अयोग: स सृजति स पालयति स विनाशयति इत्यादिविशेावाक्यात् ।

।। नच संहारेति ।। अन्यस्य संहारे सति, तद्Ž्वारणादिद्Ž पो व्यापारोऽसंहार:, संहारान्यो रक्षाद्Ž प: सम्भवेत्, न चैवमिति भाव: । एवंच असंहारव्यतिरिक्तरक्षाया अयोगेन पालकत्वाभावाद्Ž्ा तस्य महामहिमत्वमिति नेति भाव: ।

(अयं च न्याय: ततो ब्रवीति च भूय: इत्यनेन, पालकत्वस्य सृयिसंहारकर्तृत्वाद्भिŽात्वं प्रतिपादयता सूचित: ।) त€तुत्वेन 'विशोवाक्यम्' इत्युक्तसि€न्तन्यायं तद्वाक्योदाहरणपूर्वकं विवृणोति- स सृजमिति ।। स पालयतीति पृथगुक्तेरस्य विशोवाक्यत्वं ज्ञातव्यम् । अनेन 'विशोदृयिवाक्ये' इत्यनुव्याख्याने विशोपदस्योभयत्राप्यन्वय इत्युक्तं भवति । वाक्ये चेति चशब्दसमुच्चितन्यायमाह-

अŽादानाद्युपपत्तेश्च ।। १३ ।। न चाव्यक्तस्वभावस्य दर्शने तर्कबाध: । अनन्तशक्तित्वाद्विणो: तच्छक्तयाव्यक्तस्यापि दर्शनोपपत्ते: ।। १४ ।।

।। अŽादानेति ।। अŽादानादिŽ पोपपत्तेरित्यर्थ: । असंहारव्यतिरिक्तपालनाभावेऽŽादानादि न स्यादिति भाव: । एवंच विशोवाक्यात् पालनादियुक्तेर्हरौ भक्तिर्युक्तेति भाव: । अयं च न्यायो 'ब्रवीति च' इत्यनेनोक्त: ।) ।। १३ ।। ॐ तदव्यक्तमाह हि ॐ ।। इत्यत्र, कतर्व्याकर्तव्यव्यापारदर्शनाद्भक्ति: कर्तव्या न वेति सन्देहे, न कर्तव्येति पूर्व: पक्ष:, कर्तव्येति सि€न्त: । तत्र 'तर्कबाध:' इत्युक्तपूर्वपक्षन्यायं अपेक्षितांशप्रदर्शनपूर्वकं विवृणोति- नचाव्यक्तेति ।। अव्यक्तस्वभावस्य ईश्वरस्य, दर्शने, ईश्वरो न प्रतीयते, अव्यक्तस्वभावत्वात्, अदृयवदिति तर्कबाध इत्यर्थ: । अत्र, नेश्वरे भक्ति: कार्या प्रयोजनाभावात् । नच तदापरोक्ष्यं प्रयोजनमिति वाच्यम् । तस्याव्यक्तस्वभावत्वेनापरोक्ष्यतर्कबाध इति पूर्वपक्ष्यभिप्राय: । एवंच तर्कबाधेन भगवदापारोक्ष्याभावेन, भक्तेर्निफलत्वाŽा युक्तं माहात्म्यवर्णनमिति नेति भाव: । (अयंच न्याय: 'तदव्यक्तमाह हि' इत्यादिसूत्रत्रयेण जीवशक्तया ज्ञानाभावेऽव्यक्तत्वŽ पहेतुं वदता सूचित: । तथा 'प्रकाशश्च कर्मण्यभ्यासात्' इत्यनेन चकारेणीाव्यक्तत्वसमुच्चयादव्यक्तत्वेऽपि प्रकाशो भवतीत्यव्यक्तत्वस्याप्रयोजकत्वोक्तया सूचित: ।) त€तुत्वेन 'पुंशक्ति:' इत्युक्तसि€न्तन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृणोति- अनन्तशक्तित्वादिति ।। अव्यक्तस्वभावस्य स्वप्रसादेनापि प्रत्यक्षता न युज्यते । नहि प्रसŽोऽपि नरो वानरो भवितुमीय इत्याशङ्कापरिहाराथर्मेतदुक्तम् । तच्छक्तया विणुशक्तया, अनेन 'पुंशक्ति:' इत्यत्र पुंशब्दो विणुवाचक इत्युक्तं भवति । एवं चाव्यक्तस्यापि पुंशक्तयापरोक्ष्यसम्भवाद्युक्ता तत्र भक्तिरिति भाव: । (अयं च न्याय: 'अतोऽनन्तेन तथा हि लिङ्गम्' इत्यनेनानन्तशक्तित्वाद्विणोस्तच्छक्तया प्रकाशोपपत्तेरित्यर्थ: ।) ।। १४ ।। ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ

।। इत्यत्र, पूर्वाधिकरणवत् सबीज: सन्देह:, पूर्व: पक्ष:, सि€न्तश्च । तत्र 'विलोमता' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच गुणानां गुणिस्वŽ पत्वं विरु€म् कालादिदृयान्तात् ।। १५ ।।

।। नच गुणानामिति ।। एवंच गुणानां गुणित्वस्वŽ पत्वविलोमतयेश्वरस्य गुणित्वाभावाŽा युक्ता तत्र भक्तिरिति नेति भाव: । (अयंच न्याय: 'उभयव्यपदेशात्' इत्यनेनानादित्वमानन्दत्वं च साधयता गुणस्य गुणिस्वŽ पत्वं विरु€मिति सूचित: ।) त€तुत्वेन 'सुनिदर्शनम्' इत्युक्तसि€न्तन्यायं विवृणोति- कालादीति ।। यथा कालस्य पूर्वेणाभेदेऽपि, 'काल:' इति विशेय:, 'पूवर्:' इति विशोको भवति । यथा वा प्रकाशात्मकस्याप्यादित्यस्य प्रकाशित्वम्, यथा वा कुण्डलात्मस्याप्यहे: कुण्डलित्वम्, (एवं) विशोबलादेव, गुणात्मकस्यापि ब्रह्मण: आनन्दवत्त्वादिकं युज्यत इति भाव: । अत्राहिकुण्डलदृयान्तस्य स्थूलमतीनां बु€यारोहनिमित्तत्वेन, द्वितीयतृतीययोस्तेजोŽ पत्वातिसूक्ष्मत्वाभ्यां ब्रह्मण आदित्यकालसाम्यात्, अनुŽ पत्वेन बहुŽ पत्वेन च, दृयान्तानां सुष्ठुत्वमनुव्याख्यायां सुशब्देनोक्तम् । तच्चानन्तरोक्तस्यापि कालदृयान्तस्य प्रथमं ग्रहणेन बहत्वप्रदर्शकेणादिपदेन विवृतम् । अहिकुण्डलदृयान्तस्य भेदाभेदवि-षयत्वेन, कालादिवदानुŽ प्याभावात् । एवंच कालादिनिदर्शनेन गुणस्वŽ पस्यापि हरेर्गुणित्वेन, युक्ता तत्र भक्तिरिति

भाव: । अयं च न्याय: 'अहिकुण्डलवत्' 'प्रकाशाश्रयवद्वा' 'पूर्ववद्वा' इत्यनेनोक्त: ।) ।। १५ ।। ॐ परमत: सेतून्मानसम्बन्धभेदव्यपदेशेभ्य: ॐ ।। इत्यत्र, भगवदानन्दादिगुणानां लौकिकत्वालौकिकत्वस्य न सम्भवाल्लौकिकत्वालौकिकत्वसन्देहे, लोकसदृशमेवानन्दादिकमिति पूर्व: पक्ष:, अलौकिकमिति सिद्धान्त: । तत्र 'विलोमता' इत्यनेन पूर्वपक्षोक्तन्यायं विवृण्वन्प्रतिक्षिपति-

नच ब्रह्मादीनामन्यथात्वात्तदतच्छब्दत्वं तच्छब्दत्वे लोकोपमत्वं चेति विलोमता अलौकिकास्तस्य शब्दास्तथार्था अलौकिको ह्यो विणु: परत्वात् । तथापि शब्दा लौकिका अप्यमुमिन् प्रवर्तमाना अधिकार्थान् वदन्तीत्यादि श्रुति भ्योऽलौकिकत्वावगमात् ।। १६ ।।

।। नच ब्रह्मेति ।। तत्र अन्यथात्वादित्यलौकिकलक्षणापादकमेव हुेतुतयोक्तम् । अतच्छब्दत्वं आनन्दादिशब्दवाच्यत्वा भाव: स्यादित्यर्थ: । तच्छब्दत्वे, आनन्दादिशब्दवाच्यत्वे, लोकोपमत्वं स्यादिति शेा: । एवं चालौकिकत्वे आनन्दादिशब्दवाच्यत्वाभाव:, लौकिकेवेव सङ्गतिग्रहणात् । आनन्दादिशब्दवाच्यत्वे च, लौकिकत्वमिति, अलौकिकत्वानन्दादिवाच्यत्वयोर्विलोमतया, सहानवस्थानलक्षणविरोधितया, आनन्दादिशब्दवाच्यत्वेन लौकिकानन्दादिगुणे परमात्मनि भक्तिर्न युक्तेति नेति भाव: । (अयं च न्यायो 'बुद्धयर्थ: पादवत्' इत्यनेन अलौकिकत्वानन्दादिशब्दवाच्यत्वयोर्विरोधं परिहरता सूचित: ।) तदुत्त्वेन 'अलौकिकत्वम्' इत्युक्तसिद्धान्तन्यायं विवृणोति- अलौकिका इति ।। शब्दानामलौकिकत्वं नाम वैदिकत्वम् । अर्थानामलौकिकत्वं नामाप्राकृतत्वम् । अर्था: न्यायं विवृणोति- अलौकिका इति ।। शब्दानामलौकिकत्वं नाम वैदिकत्वम् । अर्थानामलौकिकत्वं नामाप्राकृतत्वम् । अर्था: आनन्दादिगुणा: । कुत इत्यत उक्तम्- अलौकिको हीति । तदपि कुत इत्यत उक्तम्- परत्वादिति ।। उत्तमत्वादित्यर्थ: । लौकिका: पौरुषेयागमा: अधिकार्थान् लोकविलक्षणानन्दादीन् अलौकिकत्वावगमात्, 'ब्रह्मानन्दादीनाम्' इति शेा: । एवंचैतच्छ्रुतिविरोधादलौकिकत्वानन्दादिशब्दवाच्यत्वयोर्न विरोध इति ब्रह्मानन्दादेरलौकिकत्वेऽपि, आनन्दादिशब्दवाच्यत्वमुपपद्यामिति भाव: । (अयं च न्याय: 'परमत:' इत्यनेन 'दर्शनात्' इत्यनेन चोक्त: ।) ।। १६ ।। ॐ स्थानविशेाात्प्रकाशादिवत् ॐ ।। इत्यत्र, पदार्थानां किञ्चित्प्रतिबिम्बत्वाप्रतिबिम्बत्वदर्शनेन, चतुर्मुखाद्यानन्दादि भगवदानन्दादिप्रतिबिम्बं भवति न वेति सन्देहे, प्रतिबिम्बं न भवतीति पूर्व: पक्ष:, भगवदानन्दादिप्रतिबिम्बमिति सिद्धान्त ;। तत्र 'मानाभाव:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच ब्रह्माद्यानन्दवैचित्र्ये बिम्बभूतविण्वानन्दवैचित्र्यम् आदित्यादिवदाधिक्यात् ।

।। नच ब्रह्मेति ।। अत्र ब्रह्माद्यानन्दवैचित्र्यस्याप्रयोजकत्वं वदता पूर्वपक्षे प्रतिबिम्बभूतब्रह्माद्यानन्दवैचित्र्ये, ब्रह्मभूतविण्वानन्दवैचित्र्यं स्यात्, अन्यथा ब्रह्माद्यानन्दवैचित्र्यं न स्यादिति तर्क: 'नाना भाव:' इत्यनेनोक्त इति विवृतं भवति । एवंच प्रतिबिम्बभूतब्रह्मानन्दादीनां नानाभावाद्विचित्रत्वाद्बिम्बभूतविण्वानन्दादेरपि वैचित्र्यापातेन, न तत्र भक्तिरुपपद्येति नेति भाव: । (अयं च न्याय: 'स्थानविशेाात्' इत्यनेन, ब्रह्मानन्ददीनां नानाभावस्यान्यथासिद्धिं प्रतिपादयता सूचित: ।) तदुत्त्वेन 'आधिक्यम्' इत्युक्तसिद्धान्तन्यायं विवृणोति- आदित्यादिवदिति ।। आदिपदेन, सूर्यकान्तादिस्थानं

गृह्यते । आधिक्यादिति बिम्बभूतविणोरैश्वर्यस्य पाधिक्याद्ब्रह्मादिस्थानानां भक्तयादिगुणैराधिक्यादित्यर्थ: । स्थानशक्तयपेक्षया बिम्बशक्तेर्मुख्यत्वात्सौत्रक्रमोल्लङ्घनम् । सौत्रक्रममनुसृत्यादिपदोक्तदृयान्तमुपपादयति-

नहि सूर्यकान्तप्रतिबिम्बस्याग्निजनकत्वशक्तिर्न जलगतस्येत्येतावता सूर्ये वैचित्र्यम् । आधिक्यं हि तत्र निमित्तम् । सूर्यचन्द्रादिप्रतिबिम्बं विनान्यत्र तथा विशेाादृये: ।। १७ ।।

।। नहीति ।। मध्यमपदलोपेन, सूर्यकान्तादिगतादित्यप्रतिबिम्बस्येत्यथर्: । तथाच, यथा सूर्यकान्तादिगतसूर्यप्रतिबि

म्बस्याग्निजनकत्वं न जलगतस्येति प्रतिबिम्बवैचित्र्येति, न बिम्बे सूर्ये वैचित्र्यम्, तथा ब्रह्मद्यानन्दवैचित्र्येऽपि न भगवदानन्दवैचित्र्यमिति भाव: । अनेन सूर्यकान्तादिगतसूर्यप्रतिबिम्बसूवर्यकान्तादौ मिथो विचित्रत्वहेतोर्व्यभिचार उक्तो भवति । ननु बिम्बवैचित्र्याभावात्सूर्यकान्तगतसूर्यप्रतिबिम्बस्याग्निजनकत्वशक्तिर्न जलगतस्येत्यत्र किं निमित्तमित्यत आह- आधिक्यं हीति ।। 'सूर्यादिगतमित्यर्थ: । तदुपपादयति- सूर्येति ।। सूर्यचन्द्रादे: प्रतिबिम्बं विनान्यत्र सूर्यकान्तादिगतमुखेऽग्निजनकत्वँ पविशेाादृयेरित्यर्थ: । अनेन आदित्येत्युक्तदृयान्त उपपादितो भवति । एवंच बिम्ब भूतविण्वैश्-वर्याद्याधिक्यात्स्थानभूतब्रह्मादीनां भक्तयादिगुणाधिक्याद्ब्रह्माद्यानन्दवैचित्र्येऽपि न विण्वानन्दवैचित्र्यमिति युक्ता तत्र भक्तिरिति भाव: । (अयं च न्याय: 'स्थानविशेाात्' इति ब्रह्मादिस्थानाधिक्यं वदता 'उपपत्तेश्-च' इत्यनेन, भगवत ऐश्-वर्यँ पाधिक्यं वदता चोक्त: ।) ।। १७ ।। ॐ तथान्यत्प्रतिोधात् ॐ ।। इत्यत्र, व्यक्ताव्यक्तपदार्थदर्शनाद्ब्रह्म किमव्यक्तं, व्यक्तमिति सन्देहे, व्यक्तमिति पूवर्: पक्ष:, अव्यक्तमिति सिद्धान्त: । तत्र 'मानाभाव:' इत्युक्तपूवर्पक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच नानाभावाद्विणोश्-चित्तप्रतिबिम्बँ पता आधिक्यादेव । प्रतिबिम्बे हि दोाश्-च प्रतीयन्ते । अतो हि श्रुति: प्रतिोधति 'नेदं यदिदमुपासत इति ।। १८ ।।

।। नच नानाभावादिति ।। ँ पाणामिति शेा: । विणोरित्यस्य ँ पाणामित्याध्याहृतेनापि सम्बन्ध: । चित्तप्रतिबिम्बँ पता ध्यानकाले प्रतीतचित्तोपादानकत्वेत्यर्थ: । ततश्-चायमर्थ: । विणो: स्वँ पभेदाभावेऽपि ध्यातृबहुत्वेन, ध्यानकाले प्रतीतँ पाणां बहुत्वेन, तेाां विणुत्वाङ्गीकारे विरोधाभावाद्विणोश्-चित्तप्रतिबिम्बँ पतेत्यव्यक्तत्वाभावाद्वयर्था भक्तिरिति भाव: । (अयं च न्याय: 'अन्यत्' इत्यनेन विणुचित्तप्रतिबिम्बयोर्भेदं समर्थयता नानाभावाद्विणोश्-चित्तप्रतिबिम्बतत्वं सम्भवतीति सूचित: ।) तदतुत्वेन 'आधिक्यम्' इत्युक्तसिद्धान्तन्यायं विवृणोति- आधिक्यादेवेति ।। एवशब्देन सूत्रगततथाशब्दाभिप्राय उक्तो भवति । यथा खलु जीवानन्दादीनां अल्पत्वादिना कारणेन ब्रह्मानन्दादेरुन्मानत्वादाधिक्यात्ततो वैलक्षण्यम् तथा प्रकृतस्य चित्तप्रकृतिबिम्बस्य दुर्लक्षणत्वादिकारणेन विणोर्निदोे-ात्वाद्याधिक्यादेव तद्वैलक्षण्यमिति । विणोराधिक्येऽपि, कुतो न चित्तप्रतिबिम्बँ पतेत्याह- प्रतिबिम्बे हीति ।। अत्र श्रुत्यवयम्भमप्याह- अतो हीति ।। हिशब्द: श्रुते: प्रसिद्धतां द्योतयति । निर्दोादोात्वैलक्षण्येन ब्रह्मोपासाप्रकृतयोरैक्यानुपपत्तेरित्यर्थ: । ऐक्ये श्रौतनिोधो न स्यादिति भाव: । एवंच विणोर्निर्दोात्वाद्याधिक्याच्चित्तप्रतिबिम्बँ पत्वाभावाद्युक्तमव्यक्तत्वमिति भाव: । (अयं च न्याय: 'तथा' इत्यनेन, चित्तप्रतीतस्य दुर्लक्षणयुक्तत्वाद्विणोर्निर्दो-ात्वेनाधिक्यादिति सूचित: । अत एव तत्वप्रकाशिकायां दृयान्तदार्यान्तिकयो: सहेतुकयोर्व्याख्यानं कृतम् ।) ।। १८ ।। ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्य: ॐ ।। इत्यत्र, 'जन्माद्यस्य' यत इत्यादिजगत्कर्तृत्वाद्युक्ते: यत्किञ्चिज्जगत्कर्तृत्वे सकलजगत्कर्तृत्वे वा सम्भवात्परमेश्-वर: किं सर्वदेशकालीनसृययादिकर्ता, न वेति सन्देहे, नेति पूर्व: पक्ष:, सर्वदेशकालीनसृययादिकर्तेति सिद्धान्त: । तत्र 'नानाभाव:' इत्युक्तमेव पूर्वपक्षन्यायं तत्फलप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच नानावतारकौतुकदर्शनाद्विणो: क्वचिद्देशकालान्तरे कौतुकादेव सृययादि कुर्वन् अन्यमेव सामस्त्येन नियोजयति सर्वत्र सर्वमेतस्मादित्यादिश्रुत्या क्रीडायामपि स्वातन्त्र्यात् । स्वातन्त्र्यात्क्रीडते विणुर्न च स्वातन्त्र्यमन्यगम् । करोति क्वापि नियता क्रीडा सृययादिकास्य च ।।

।। नच नानावतारेति ।। अनेकावतारे कौतुकस्य कृणाद्यवतारेा लीलाँ पकौतुकस्य, दर्शनात् कौतुकादेव लीलयैव, सामस्त्येन स्वातन्त्र्यादिना, तद्दत्वेति यावत् । नियोजयति सृययादावित्यर्थ: । एवंच विणोरवतारेा नानाकौतुकदर्शनाज्जगत्सृययादिकर्तृत्वमप्यन्यस्मै दास्यतीति न तस्यैव महामहिमत्वमिति नेति भाव: । (अयं च न्याय:

सावधारणेन 'अनेन' इत्यनेनान्यस्य जगत्सृययादि निराकुर्वता ईश्-वरावतारेु नानाभावदर्शनादन्यस्मै जगत्सृ-ययादिकर्तृत्वदानोपपत्तेरिति सूचित: । अत एव भाये 'अनेनैव' इति ।) त€तुत्वेन 'स्वातन्त्-यम्'

इत्युक्तसि€न्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- सर्वत्रेति ।। आदिपदेन 'सर्वदा सर्ववस्तु' इति वाक्यशेाो ग्राह्य: । स्वातन्त्र्ात् स्वातन्त्र्ावगमादित्यर्थ: । सर्वत्र सर्ववस्तु, सर्ववस्तुविायं सर्वसृययाद्येतस्माद्भवतीति शेा: । तथा यदि क्रीडयान्यस्मै दद्यात्तर्हि त्तकालीनसृययादिकर्तृत्वाभावप्राप्त्या, सर्ववस्तुविायसर्वदेशकालीनसृ-ययादिकर्तृत्वप्रतिपादकश्रुतिविराध: स्यादित्यर्थ: । अत्रार्थे सयश्रुतिं चाह- स्वातन्त्र्ात्क्रीडत इति ।। क्वापि देशे काले च, नियतास्येति सम्बन्ध: सृययादिकासृययादिविाया इति । नियतं सृययादिविायं, एवंच स्वातन्त्र्ात्तस्यैव सकलदेशकालीनजगत्सृययादिकर्तृत्वाद्युक्ता तत्र भक्तिरिति भाव: । (अयं च न्याय: 'सर्वगत:' इति पदेनैव सर्वेश्-वर्यादिŽ प: सूचित: ।) ।। १९ ।। ॐ फलमत उपपत्ते: ॐ ।। इत्यत्र, वादिविप्रतिपत्त्या किं हरि: फलदाता, किं वा कर्म दात्रिति सन्देहे, कमर्ैव फलदात्रिति पूर्व: पक्ष:, ईश्-वर: फलदातेति सि€न्त: । तत्र 'प्रलोभ:' इत्युक्तपूर्वपक्षन्यायं सहेतुकं विवृण्वन्प्रतिक्षिपति-

नियतक्रीडनादेव कर्ता नान्योऽस्ति कस्यचित् । अस्वतन्त्रो हि चलति चलचित्तादशक्तित: । स्वतन्त्र: पूर्णशक्ति: सन्कुतोऽसौ नियतिं त्यजेदिति श्रुतेश्-च ।। १९ ।। नच कर्मान्वयव्यतिरेकात्फलस्येश्-वर: । फलदातेति प्रलोभमात्रम् तस्यैव स्वातन्त्र्ात् । कर्माण्यनन्तानि यथेयमीश: सम्पाद्य तेाां फलमिच्छयैव ।

।। नच कर्मान्वयेति ।। अन्वयव्यतिरेकादिति समाहारद्वन्द्व: । एवंचेश्-वर: फलप्रदातेत्यत्र प्रलोभनमात्रत्वाŽा निरतिशयैश्-वर्यमिति नेति भाव: । (अयं च न्यायो 'धर्मं जैमिनिरत एव' इत्यनेन फलदातु: कर्मणोऽपि भगवदधीनत्वोक्तया, कर्मान्वयव्यतिरेकात्फलस्य, ईश्-वरस्य फलदातृत्वं प्रलोभनमात्रमिति सूचित: ।) त€तुत्वेन 'स्वातन्त्-यम्' इत्युक्तसि€न्तन्यायं विवृणोति- तस्यैवेति ।। ईश्-वरस्यैव कर्माप्रयोज्यत्वेन फलदात्रे कर्तृत्वात् इत्यथर्: । स्वातन्त्र्ादित्यनेन कर्मेश्-वरयो: साम्यं निोधति । तेन कर्मण: फलनिमित्तकारणत्वेनान्वयव्यतिरेकयोरन्यथासि€रुक्ता भवति । अत्र प्रमाणमाह-

क्वचिद्ददाति क्व च नोददाति नह्यानन्त्यात्कर्मणां भोगनाश: । स्वातन्त्-यं चेत्कर्मणां सर्वभोग: स्याŽाह्येवं क्वापि तत्केन चित्स्यात् ।

क्वाख्ङ्क क्वाख्लृक्उ'ङ्घप-ङ्कङ्कङ्कत्त्ङ्ख्ङ्ख्ट'ऊअतो हि स स्वेच्छया किं चिदेव फलं कुर्याद्विफलं प्रायशश्-च । क्वचिदज्ञानं जनयन्भस्म कुर्यात्स्वेच्छावृत्तिस्तस्य विणो: सदैवेति ब्रह्माण्डे । स्वतन्त्र: ईश एवैकस्तद्वशं कर्म सर्वदा । अत ईशत्वमीशस्य नहीशोऽन्य: कथञ्चनेति श्रुते: । अत: प्रलोभकल्पने श्रुतहानिरश्रुतकल्पना चेति हरिरेव फलप्रद: ।। २० ।।

।। इति श्रीमŽायविवरणे तृतीयाध्यायस्य द्वितीय: पाद: ।।

।। कर्माणीति ।। क्वच नो ददातीत्यत्र हेतु:- न हीति ।। कर्मणामित्यस्य पूर्वोत्तरेणापि सम्बन्ध: । भोगेन नाशो भोगनाश: । अस्वातन्त्-यं विपक्षबाधकमुखेनोपपादयति-

स्वातन्त्-यं चेति ।। अतोऽपि स्वातन्त्र्ादपि, किञ्चिदेव कर्मफलं फलवत्, कर्मणामित्यनुवर्तते वा । विफलं फलरहितं, प्रकरणात्कर्मेति लक्ष्यते । अज्ञानव्यतिरिक्तेन प्रायश्-चत्तादिनिमित्तान्तरेणेति ज्ञातव्यम् । ज्ञानं अपरोक्षम्, तस्य विणो: सदैव स्वेच्छावृत्ति: स्वेच्छायावर्तनमित्यर्थ: । ब्रह्माण्डपुराणवचनस्य विवक्षिताशेाार्थप्रतिपादकत्वाच्छ्रुत्यपेक्षया प्रथममुदाहरणम् । श्रुत्युदाहरणस्य फलान्तरं दर्शयन् सि€न्तकालं दर्शयति- अत इति ।। एवंचेश्-वरस्यैव

स्वातन्त्र्ात्स एव फलदातेति निरतिशयैश्ऱ्वयर्वत्त्वेन युक्ता तत्र भक्तिरिति भाव: । (अयं च न्याय: "=ाीाीuीऽ:' <t™ीाीऽीऽीं —ीOीृीtôृीीtीtœmú#ऽsीं ाीीृीीLu™ीTाीाीuीऽŪœúŪtीं ृीzùtीी ôीNŪZीtीं: *) ** 20 **

।। इति श्रीमŽयायविवरणभावबोधे तृतीयाध्यायस्य द्वितीय: पाद: ।।

भक्तिसाध्यापरोक्षज्ञानसाधनोपासनाप्रतिपादकोऽयं पाद: प्रवृत्त: । एतत्पादान्तर्गताधिकरणपूर्वपक्षसि€न्तन्याया अनुव्याख्यायामुक्ता: । 'पृथग्दृयिरशक्यत्वमनिर्णीति: समुच्चय: । विशोदर्शनं कार्यलोपो नानोक्तिराशुता । विभ्रमोऽपाकृतिर्लिङ्गमनवस्थाविशेाीता । अप्रयोजनता चातिप्रसङ्गोऽदूरसंश्रय: । विशियकारणं चेया दृयवैŽ प्यमुŽाति: । अनुक्तिरप्रयत्नत्वं दृढबन्धपराभवौ । पुंसाम्यं प्राप्तसन्त्याग: कारणानिर्णयो भ्रम: । विशोदर्शितालापो गुणसाम्यं पृथग्दृशि: । अगम्यवर्त्म सन्धानमियं फलमकल्पना । शु€वैŽ प्यमङ्गत्वमविशोदृशि: क्रिया । युक्तय: पूर्वपक्षस्य' सुज्ञेयत्वं विधिक्रिया । माहात्म्यमल्पशक्तित्वं यथायोग्यफलं भव: । फलसाम्यं विशोश्ऱ्च गुणाधिक्यं प्रधानता । यथाशक्तिक्रिया सन्धि: प्रमाणबलमानति: । कारणं कार्यवैशेयं स्वभावो वस्तुदूाणम् । प्रतिक्रियाविरोधश्ऱ्च प्रतिसन्धिरनूनता । संस्कारापाटवं स्वेच्छानियतिर्वस्तुवैभवम् । विशोाक्तिरमानत्वं प्राधान्यं प्रीतिरागम: । सुस्थिरत्वं कृतप्राप्तिरनादिगुणविस्तर: । साधनोत्तमता नानादृयि: शियिरनूनता । अविघ्नत्वाविरोधौ च गुणवैशेयमागम: । सि€न्तनिर्णये ह्येता युक्तयोऽव्याहता: सदा ।। ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशोात् ॐ ।। इत्यत्र श्रवणादिकर्तव्यतोक्ते: साधारणत्वाद्ब्रह्म किमेकैकेन सर्वशाखोक्तं ज्ञातव्यमुत स्वशाखोक्तमिति सन्देहे, स्वशाखोक्तमेव ज्ञेयमिति पूर्व: पक्ष:, सर्वशाखोक्तमेव ज्ञेयमिति सि€न्त: । तत्र 'पृथग्दृयि:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच प्रतिशाखमुच्यमानानामर्थानां पृथक्त्ववात्तत्तच्छाखिभिरेव तत्रतत्रोक्तं ज्ञेयमिति नियम: ।

।। नच प्रतिशाखमिति ।। पृथक्त्ववात् भिŽाप्रकारत्वेन दर्शनादित्यर्थ: । तत्रतत्रोक्तम् तस्यांतस्यां शाखायामुक्तम्, इतिशब्द: प्रकारे, तत्तच्छाखिभिरेव तत्रतत्रोक्तं ज्ञेयमिति नियम: । तथाहि, एकं हि वस्तुत्वेन ज्ञातव्यम्, नहि सर्वशाखोक्तं वस्त्वेकम् । कस्याञ्चिच्छाखायां 'विज्ञानमानन्दं ब्रह्म' इति विज्ञानानन्दŽ पवस्तूच्यते । क्वचिच्च 'सत्यं ज्ञानमनन्तं ब्रह्म' इति सत्यज्ञानानन्तŽ पम् । क्वचित् 'श्रोता मन्ता' इति श्रोतृमन्त्रादिŽ पम् । 'य आत्मापहतपाप्मा' इत्यन्यत्र । एवंच सर्वशाखोक्तार्थानां पृथक्त्ववादेकस्यैव ज्ञातव्यत्वात्, स्वस्वशाखोक्तमेव ज्ञातव्यमिति सर्वश्रुतिनिर्णायकस्य न सर्वोपादेयतेति नेति भाव: । (अयं च न्यायो 'भेदाŽाति च' इत्यनेन, प्रतिशास्त्रमुच्यमानानामर्थानां पृथक्त्ववात्तत्रतत्रोक्तं तत्तच्छाखिभिरेव ज्ञेयमिति प्रतिपादयतोक्तो भवति ।) त€त्तुत्वेन 'सुज्ञेयम्' इत्युक्तसि€न्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति-

नानावेदैरितिहासै: पुराणै: सुज्ञेय एको भगवान्युक्तिभिश्ऱ्चेति श्रुते: सुष्ठु ज्ञेयत्वाद्विणो: ।। १ ।।

।। नानावेदैरिति । सुज्ञेयत्वादिति सर्वशाखोक्तप्रकारेण ज्ञानं विना ब्रह्मण: सुज्ञेयत्वं न सम्भवतीति भाव: । अनेन पूर्वपक्षहेतोर्बाधितविायत्वमुक्तं भवति । किञ्च तत्तच्छाखोक्तार्थानां पृथक्त्ववेऽनेकाशयत्वे, एकशाखोक्तार्थानामपि ॐ ब्रह्म खं ब्रह्म' इत्यादौ पृथक्त्ववदर्शनेन, तत्तच्छाखोक्तस्यापि तेन तेनाज्ञेयत्वप्रसङ्ग इति । एवंच सर्ववेदोक्तत्वेन विणो: सुज्ञेयत्वाच्छास्त्रं सर्वोपादेयत्वमिति भाव: । (अयं च न्याय: सर्ववेदैर्विणोरेव सुज्ञेयत्वं प्रतिपादयता 'सर्ववेदान्तप्रत्यय:' इत्यनेन उक्तो भवति ।) ।। १ ।। ॐ उपसंहारोऽर्थाभेदाद्विधिशोवत्समाने च ॐ ।। इत्यत्र, ध्यानविधेरुभयथा

पर्यवसानात्, परमात्मा किं सर्ववेदोक्तगुणानुपसंहृत्य, ध्यातव्योऽन्यथा वेति सन्देहे, अन्यथैवेति पूर्व: पक्ष:,

सर्ववेदोक्तगुणानुपसंहृत्य, ध्यातव्य इति सिद्धान्त: । तत्र, 'अशक्यत्वम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नचाशक्यतया कस्यापि सर्वगुणोपसंहारो नास्ति सर्वे गुणा: सर्वदैव ह्युपास्यास्तेनैव विद्वान् विधिकृज्ञान्यथा स्यादिति श्रुते: विहितक्रियालोपप्रसङ्गात् ।। २ ।।

।। नचाशक्यतयेति ।। सिद्धान्तेऽपि न सर्वेाां सर्वगुणोपसंहार इत्यत उक्तम्- कस्यापीति ।। चतुर्मुखस्यापीत्यर्थ: । नास्तीत्यत: परं 'इति सर्ववेदोक्तप्रकारेण न ध्यातव्य:' इति वाक्यशेाो द्रयव्य: । एवंच सर्वगुणोपसंहारेण ध्यातुमशक्यत्वात्तदर्थं सर्वपरिज्ञानं व्यर्थमिति नेति भाव: । (अयं च न्यायोऽनुपसंहारं समर्थयता 'न वा प्रकरण भेदात्परोवरीयस्त्वादिवत्' इत्यन्तेन सूचितो भवति ।) तत्तुत्वेन 'विधिक्रिया' इत्युक्तसिद्धान्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- सर्वे गुणा इति ।। तेनैव सर्वगुणोपासनेनैव, विधिकृद्विहितत्वादिति भाव: । श्रुतेरित्यत: परं 'सर्वगुणोपसंहारा भाव:' इति भाव: । लोपप्रसङ्गादिति । ततश्चानर्थप्राप्तेरिति भाव: । अनेन सर्वगुणोपसंहार: कर्तव्य:, विहितक्रियात्वात्, ज्योतियोमादिवदिति न्यायोऽप्यर्थाद्विवृतो भवति । न चाशक्यत्वविरोध:, विध्यन्यथानुपपत्त्यैव केाां चिच्छक्तानां कल्पनात् । वक्ष्यति च । 'सर्वगुणोपासकस्याप्यधिकारिणरोऽभावात्' इति । एवंच सर्वगुणोपसंहारेणोपासनाक्रियाया विहितत्वेन, कर्तव्यत्वात्सार्थकमेव सर्वपरिज्ञानमिति भाव: । (अयं च न्याय:, यथाविहितत्वात्सर्वाणि कर्माणि क्रियन्ते तथोपसंहारेऽपि कर्तव्य इति वदता 'विधिशेावत्' इत्यनेन सूचितो भवति । अत एव 'विधिविशे:' इत्युक्तम् । अन्यथा कमर्वदित्येवावक्ष्यत् ।) ।। २ ।। ॐ प्राप्तेश्च समञ्जसम् ॐ ।। इत्यत्र, कर्तव्यताप्रतिपादनविरोधाभ्यां गुणोपसंहारानुपसंहारौ युज्येते न वेति सन्देहे, न युज्येते इति पूर्व: पक्ष:, युज्येत इति सिद्धान्त: । तत्र, अनिर्णीतिरित्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

केाञ्चित्सर्वगुणोपसंहारस्य कर्तव्यत्वे, सर्वेाामपि तथा स्यात् अनेनोपसंहर्तव्या इति अनेनोपसंहर्तव्या इति अनिर्णीतेरिति न मन्तव्यम् । यस्य यावद्गुणा: सयं प्रतिभासन्त्युपासने । युगपत्स्वभुजौ यद्वत्तायेत्तावत एव स: । युगपद्ब्रह्मण: सर्वे भासन्ते हि गुणा हरे: । तदन्येाां यथायेाग्यं स्वमाहात्म्यानुसारत इति श्रुतेर्युगपद्गुणप्रतीत्यादिमाहात्म्यार्णयोपपत्ते: ।। ३ ।।

।। केाञ्चिदिति ।। न सर्वगुणोपसंहारौ एकस्यैवाङ्गीकर्तुं शक्यौ, विरोधात् । किन्तु पुरुाभेदेनेति वक्तव्यम् । तत्रेदमुपतिष्ठते । ऋजूनां बहुत्वात् केाञ्चिदित्युक्तम् । उपसंहारस्येत्यत: परं 'तथोपसंहृत्य ध्यानस्य च' इत्यपि ग्राह्यम् । अन्यथा सिद्धान्तसंश्लेाात् । सर्वेाामपीति ऋजुव्यतिरिक्तानामपीति । कुत इत्यत आह- अनेनेति ।। एवंचाधिकार्यनिर्णीतेरुपसंहारानुपसंहारयोरनुपपत्त्वस्य तदर्थं सर्वपरिज्ञानमपेक्षितमिति नेति भाव: । (अयं च न्याय उपसंहारानुपसंहारयोर्निर्णयं पं सामञ्जस्यं वदता 'समञ्जसम्' इत्यनेन सूचितो भवति ।) तत्तुत्वेन 'माहात्म्यम्' इत्युक्तसिद्धान्तन्यायं तत्साध्यप्रदर्शनपूर्वकं प्रमाणोदाहारणेन विवृणोति- यस्येति ।। सयप्रतिभासनमेवाह- युगपदिति ।। माहात्म्यानुसारत: निर्णयोपपत्तेरित्यनेन, पूर्वपक्षहेतोरसिद्धरुक्ता भवति । एवंच ब्रह्माद्यधिकारिणां योग्यतां पमाहात्म्यादुपसंहारानुपसंहारयोर्युक्तत्वाद्युक्तं सर्वपरिज्ञानमिति भाव: । (अयं च न्यायो युगपत्प्रतीत्यादिमाहात्म्यार्णयोपपत्तेरिति वदता प्राप्तेरित्यनेन सूचित: ।) ॐ सर्वाभेदादन्यत्रेमे ॐ ।। इत्यत्र, कर्तव्याकर्तव्यक्रियादर्शनाद्बहुगुणोपसंहार: कर्तव्यो न वेति सन्देहे, न कर्तव्य इति पूवर्: पक्ष:, कर्तव्य इति सिद्धान्त: । तत्र 'अनिर्णीति:' इत्युक्तमेव पूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच फलानिर्णीतिः माहात्म्येनैवान्यत्फलं महतामिति निर्णयोपपत्तेः ।। ४ ।।

।। नच फलेति ।। 'सर्वगुणोपसंहारः' इति शेाः । फलानिर्णीतिः अल्पगुणोपसंहर्तृफलादतिशयितफलस्यानिर्णीतिरित्यर्थः । फलातिशयनिर्णयाभावे सर्वगुणोपसंहारे तेाां प्रेक्षावत्त्वं न स्यादिति भावः । एवंच फलानिर्णीतेरुपसंहारस्याकर्तव्यत्वाŽा युक्तं सर्वपरिज्ञानमिति नेति भावः । (अयं च न्यायोऽनुपसंहतर्ृफलादन्यत्र फले ब्रह्मादय इति फलनिर्णयं कुर्वता 'अन्यत्र' इत्यनेन सूचितो भवति ।) त€तुत्वेन 'माहात्म्यम्' इत्युक्तमेव सि€ान्तन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृणोति- माहात्म्येति ।। बहुगुणोपासनालक्षणमाहात्म्येनेत्यर्थः । अन्यत् अनुपसंहतर्ृफलात् । महतामिति तादृशगुणोपसंहारयोग्यताŽ पमाहात्म्यवतामित्यर्थः । अत्रापि पूर्वपक्षहेतोरसि€रुक्ता वेदितव्या । एवंच माहात्म्येनानुपसंहर्तृफलाद्विलक्षणमेव फलं महतामिति निर्णयोपपत्तेर्युक्त एवोपसंहार इति भावः । (अयं च न्यायो माहात्म्यवत्त्वेन प्रसि€ा ब्रह्मादय इत्यर्थकेन 'इमे' इत्यनेन सूचितः ।) ।। ४ ।। ॐ आनन्दादयः प्रधानस्य ॐ ।। इत्यत्र,

विशेाानुक्तयोपास्यतयोक्ताः भगवद्गुणाः किं सर्वमुमुक्षूपास्याः सङ्ख्यानिर्देशाभ्यां पृथक् क्लृप्ताः सन्ति, न वेति सन्देहे, नेति पूर्वः पक्षः, सन्तीति सि€ान्तः । तत्र, 'समुच्चयः' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

आनन्दादीनां केाञ्चित्समुच्चये प्राप्ते सर्वगुणसमुच्चयः सर्वेाां स्यादिति न मन्तव्यम् । अल्पशक्तित्वात्तेाां पुंसाम् ।। ५ ।।

।। आनन्दादीनामिति ।। न सर्वमुमुक्षूपास्याः गुणाः सङ्ख्यानिर्देशाभ्यां क्लृप्ताः सन्ति । यदि सन्ति, तर्हि वक्तव्यम् केाां, क्रियतां च समुच्चय इति । तत्रेदमुपतिष्ठते । आनन्दादीनामिति निर्देशक्लृप्तिः, केाञ्चिच्चतुः पञ्चाण्णामिति सङ्ख्याक्लृप्तिः । सर्वेाां मुमुक्षूणां, सर्वगुणसमुच्चयः स्यादिति न चतुपञ्चाा एवेति सङ्ख्याक्लृप्तिः स्यादिति भावः । उपलक्षणमेतत् । आनन्दादीनामिति निर्देशक्लृप्तिरपि न, नैते, किन्तु अन्य एवेत्यपि वक्तुं शक्यत्वादित्यपि द्रयव्यम् । एवंच मुमुक्षुर्भिर्नियमेनोपास्यगुणानिर्णयाŽा कस्याप्युपासनोपपत्तिरिति नेति भावः । (अयं च न्यायश्चतुर्गुणसमुच्चयप्रतिपादकेन 'आनन्दमयः' इत्यनेन, केाञ्चित्समुच्चयेऽन्येाां समुच्चयः स्यादिति सूचितः ।) त€तुत्वेन 'अल्पशक्तित्वम्' इत्युक्तसि€ान्तन्यायं विवृणोति - अल्पशक्तित्वादिति ।। तेाां प्रागुक्तसर्वमुमुक्षूणां सन्ति सङ्ख्यानिर्देशाभ्यां क्लृप्ताः सर्वमुमुक्षुभिः सर्वथोपास्या आनन्दो, ज्ञानं, सत्, आत्मेति चत्वार एव, न त्वधिकाः । नच केाञ्चित्समुच्चये, सवर्गुणसमुच्चयापत्तिः, ब्रह्मादीनां केाञ्चित्तदधिकगुणोपासनसमर्थत्वेऽपि तेाां पुंसां सर्वमुमुक्षूणामल्पशक्तित्वेन, तदधिकगुणोपासनासमर्थत्वात् । नच निर्देशविपर्ययः आनन्दादीनामेवावश्यं सर्वापेक्षितत्वादपेक्षितफलानुसारेणैवेश्वरस्योपास्यत्वात्, 'तं यथायथोपासते' इति श्रुतेः । एवंच सर्वोपास्यगुणनिर्णयाद्युक्तं उपासनमिति भावः । (अयंच न्यायः 'आनन्दादयः' इत्यस्य सावधारणादानन्दादय एव सर्वमुमुक्षूपास्याः अल्पशक्तित्वेन सर्वेाां, तदधिकोपासनस्याशक्यत्वादिति सूचितः । अत एवोक्तं तत्वप्रकाशिकायां, 'सर्वमुमुक्षुभिः सर्वथोपास्या गुणाः आनन्दादयश्चत्वारो नत्वधिकाः सर्वमुमुक्षूणां तदधिकोपासनासमर्थत्वात्' इति ।) ।। ५ ।। ॐ प्रियशिरस्त्वाद्यप्राप्तिŽ पचयापचयौ हि भेदे ॐ ।। इत्यत्र, सर्वमुमुक्षूपास्यानुपास्यगुणप्रतीत्या, 'तस्य प्रियमेव शिरः' इत्यादौ प्रियशिरस्त्वादिगुणाः किं सर्वमुमुक्षूपास्याः न वेति सन्देहे, सर्वोपास्या इति पूर्वः पक्षः, नेति सि€ान्तः । तत्र 'विशेादर्शनम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

प्रियशिरस्त्वादीनामानन्दादिविशेावत्वेनैव दर्शनात्तेाामपि सर्वोपसंहार्यत्वमिति न मन्तव्यम् यथायोग्यान् गुणपूगानुपास्य फलं भवेन्मुक्तिगं नान्यथा स्यात् ।

।। प्रियशिरस्त्वादीनामिति ।। दर्शनात्, 'तस्य प्रियमेव शिरः' इत्यादाविति शेाः । प्रथमादिपदेन सार्वज्ञादेः द्वितीयेन

ज्ञानादेश्‍च ग्रहणम् । प्रियशिरस्त्वादीनामपि देवोपास्यत्वस्य सिद्धान्तेऽप्यङ्गीकारात् सर्वेत्युक्तम् । अन्यथा, आनन्दादीनां सम्यगनुपासनेन मोक्षभावप्रसङ्गादिति भाव: । अत्र विशेात्वादित्येव हेतु: । तस्य प्रामाणिकत्वं वक्तुं दर्शनमित्युक्तम् । एवंच प्रियशिरस्त्वादीनामानन्दविशेात्वेन, सर्वोपास्यत्वमिति नेति भाव: । (अयंच न्या: प्रियशिरस्त्वादीनामानन्दादिविशे-ात्वेऽपि, सर्वानुपास्यत्वप्रतिपादकेन 'प्रियशिरस्त्वाद्यप्राप्ति:' इत्यनेन सूचित: ।) तदेतुत्वेन 'यथायोग्यफलम्' इत्युक्तसिद्धान्तन्यायं विवृणोति- यथायोग्यानिति ।। अत्र प्रियशिरस्त्वादीनां सर्वानुपसंहार्यत्वे, 'सैाानन्दस्य मीमांसा भवति' इत्यादिश्रुतिसिद्धफलभेदसिद्धयर्थं गुणोपासनेऽपि तारतम्यापेक्षितत्वादिति हेतुर्बहिरेव द्रयव्य: । तत्र प्रियशिरस्त्वाद्यनुपासने, मोक्षो न स्यादिति उक्तविपक्षबाधकतर्कनिरासार्थमिदमुपतिष्ठते । तथाच प्रियशिरस्त्वादिविशे-ाकारेणानुपासनेऽपि न मोक्षाभावापत्ति:, आनन्दत्वादिसामान्याकारेणोपासितै: सीवयोग्यैरानन्दादिगुणैरेव मोक्षŽ पफलसम्-भवात् । तथाच विपक्षबाधकाभावेन विशेात्वमप्रयोजकमिति भाव: । यद्वा सर्वेाां प्रियशिरस्त्वाद्युपासने योग्यताभावात् योग्यगुणोपासनेनैवापरोक्षज्ञानद्वारा मुक्तिŽ पं फलमन्यथानर्थप्राप्तेरिति न प्रियशिरस्त्वादीनां सर्वोपास्यत्वमिति साक्षादेव हेतुहेतुमद्भाव: । अत्र तु, पूर्वपक्षहेतोर्बाधिि◌ीवायत्वं द्रयव्यम् । यथायोग्यानिति श्रुतौ उपास्य 'स्थितस्य' इति शेा: । तेन समानकर्तृत्वोपपत्ति: । मुक्तिगं फलं 'अपरोक्षद्वारा' इति शेा: । अत्र हेतुमाह-

नित्यैकाग्र्यव्यङ्ग्यताहेतुतश्‍च साक्षाद्दृशिनो तद्विशेौ: । स्मृतेश्‍चेति श्रुते: स्वयोग्यगुणैरेव भावात् ।। ६ ।।

।। नित्येति ।। आद्यश्‍चशब्दो हेत्वर्थे । द्वितीयोऽप्यर्थे । ततश्‍च यस्मादानन्दादीनां नित्यैकाग्र्ये नियतध्याने युगपद्वयङ्ग्यत्वलक्षणहेतुतस्तद्गुणविशियपरमात्मापरोक्षदृशिर्भवति नत्वयोग्यैरानन्दादिविशेौ: प्रियशिरस्त्वादिभि: स्मृतैरपि तस्मादिति पूर्वेण सम्बन्ध: । स्मृतैरित्यनेनायोग्यानां ज्ञानमात्रमभिप्रैति । अन्यथा 'सर्ववेदान्तप्रत्ययम्' इत्युक्तिविरोध: । एवंच यथायोग्यचतुर्गुणोपासनेनैव फलसद्भावाŽा प्रियशिरस्त्वादिसवर्◌ोपास्यमिति भाव: । (अयं च न्यायो

महदल्पोपासनया महदल्पं फलं भवतीति वदता 'उपचयापचयौ हि भेद:' इत्यनेन सूचित: ।) ।। ६ ।। ॐ इतरे त्वर्थसामान्यात् ॐ ।। इत्यत्र, फलाधिक्यविशेाहेत्वदर्शनाभ्यां भगवद्गुणे चतुर्गुणातिरिक्ता गुणा देवादिभिरुपास्या: न वेति सन्देहे, चत्वार एव विरिञ्चेतरदेवादिभिरुपास्या:, न त्वधिका:, इति पूर्व: पक्ष:, चतुर्भ्य: सर्वेभ्यश्‍चेतरे मध्यमगुणा देवादिभिरुपास्या इति सिद्धान्त: । तत्र 'कार्यलोप:' इत्युक्तन्यायं विवृण्वन्प्रतिक्षिपति -

तर्हि ब्रह्मणोऽन्येाां देवादीनामपि बहुगुणोपासनया कायर्◌ं नास्ति मध्ये नियमात्सिद्धेरिति न मन्तव्यम् । तेाां भाव्युत्कर्षं ज्ञात्वा तदभिज्ञस्य ब्रह्मण एव गुणनियमोपदेशोपपत्ते: ।

।। तर्हीति ।। यद्येवं स्वयोग्यगुणैरेव फलसद्भावोऽङ्गीक्रियते, तर्हीत्यथर्: । बहुगुरोपासनया कार्यं नास्ति । फलं नास्ति, 'बहुगुणोपासना न कार्या स्यात्' इति शेा: । कुत इत्यत आह- मध्य इति ।। सर्वचतुर्गुणापेक्षया मध्यमगुणेवित्यर्थ: । इदमुक्तं भवति । न देवादिभिर्बहुगुणोपासना कार्या । योग्यतानिर्णयाभावेन फलाभावात् । योग्या एव खलु गुणा उपास्या: । अन्यथानर्थप्राप्ते: । तत्र चतुर्मुखस्यास्तु सर्वगुणोपसंहार:, तस्य तद्योग्यतया, 'युगपद्ब्रह्मण: सर्वे प्रति भास्यन्त्युपासने' इत्युक्तत्वेन निर्णीतत्वात् । तथा मनुयोत्तमानामप्यस्तु चतुर्गुणोपसंहार:, तेाां तद्योग्यतयापि निणर्◌ीतत्वात् । तथोक्तम्, 'सच्चिदानन्द आत्मेति मानुै:' इति । मध्यमवर्तिदेवादीनां कथं बहुगुणोपसंहार: स्यात् । तद्योग्यतानिर्णायकप्रमाणाभावात् । नच 'यस्य यावद्गुणा: सयं प्रतिभासन्त्युपासने' इत्युक्तत्वेनोपासनाभ्यासे यस्य यावद्गुणप्रतीति:, तस्य तावती योग्यतेति निर्णय: प्राक् योग्यताज्ञानेऽयोग्योपासनाप्रयत्नप्रसङ्गेनानर्थप्राप्तेरिति । एवंच योग्यतानिर्णयाभावेन बहुगुणापासनासम्भवात्, सर्वेाां चतुर्गुणोपासनायोग्यतया एव निर्णीतत्वाच्च, देवादिभि: बहुगुणोपसंहारो न कर्तव्य:, किं तु चतुर्गुणोपास्तिरेवेति नेति भाव: । (अयं च न्याय: सिद्धान्ते फलसद्भावं वदता 'अर्थसामान्यात्' इत्यनेन सूचित: ।) तदेतुत्वेन, 'भव:' इत्युक्तसिद्धान्तन्यायं विवृणोति- तेाामिति ।। तदभिज्ञस्य

भाव्युत्कर्साधकोपासनाविायगुणनियमाभिधस्य । ब्रह्मण इत्युपलक्षणम्, 'तोां विशोमाचार्यो वेत्ति सर्वज्ञतां गतः' इति प्रमाणानुसारेणान्यस्य, सर्वज्ञस्य वा गुरोरित्यपि ग्राह्यम् । नचावधारणविरोधः, तस्योपदेयृदौर्ल भ्यमात्रनिवराकत्वेनान्ययोगव्यवच्छेदकाभावात् । तथाच, 'मध्ये नियमात्सि€ः' इति, तत्र तत्तत्प्राप्यफलापेक्षया योग्यतानिर्णयोपपत्तेः । नच, भाविफलानिर्णयेन पुनर्योग्यतानिर्णय इति वाच्यम्, सर्वज्ञगुŽ पदेशेन तŽार्णयोपपत्तेरिति भावः । अत्र प्रमाणमाह-

यो यो भावो देवतानां विमुक्तौ तत्तत्प्राप्तौ सुगुणानीशितुश्च । ब्रह्मा दिशत्यथताँस्ते विचिन्त्य तत्तद्भावं प्राप्नुवन्त्यात्मशक्तयेति श्रुतेः ।। ७ ।। नच नानास्थानोक्तगुणानामनुपासनार्थत्वम् ।

।।य इति ।। भावः उत्कर्ाः, सुगुणान् पूर्णत्वाविरोधिनः, आत्मशक्तया विचिन्त्येत्यन्वयः । एवंच योग्यतानिर्णयान्मध्यमगुणा देवादिभिरुपास्या इति भावः । (अयं च न्यायः, 'अर्थसामान्यात्' इत्यनेनोक्तः ।) ।। ७ ।। ॐ अध्यानाय प्रयोजनाभावात् ॐ ।। इत्यत्र, कर्तव्याकर्तव्यक्रियादर्शनात्प्रागुक्तगुणोपसंहारौ कर्तव्यौ न वेति सन्देहे, न कर्तव्याविति पूर्वः पक्षः, कर्तव्याविति सि€ान्तः । तत्र, सर्वगुणोपसंहारस्याकतर्व्यत्वेन उक्तिः' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूवर्कं विवृण्वन्प्रतिक्षिपति- नच नानेति ।। नानास्थानोक्तेति हेत्वर्थगर्भं विशोणम् । नोपसंहारः कर्तव्यः, प्रमाणाभावात् । नच 'संज्ञातश्चेत्तदुक्तमस्ति तु तदपि' इति सर्वविद्यानां भगवŽामत्वस्योपसंहारे प्रमाणत्वेनोक्तत्वात्कथं प्रमाणाभाव इति वाच्यम्, गुणानां स्थानोक्तत्वेन, तदभिधानस्योपसंहारार्थत्वाभावात् । उपसंहारार्थत्वे च, सर्वेऽप्येकत्राच्येरन् । किञ्च सर्वगुणोपसंहाराभावेऽपि 'आनन्दादयः प्रधानस्य' इत्युक्तन्यायेन मोक्षसम्भवात्, फलान्तरस्य च मुमुक्षोरनपेक्षितत्वात्, न कतर्व्य एव सर्वगुणोपासंहारः, वैफल्यात् । एतेन 'विधिशोवत्' इत्युक्तविहितत्वमपि परास्तम्, व्यर्थविधेरनवधेयत्वादिति । एवंचागुणाभिधास्योपसंहारार्थत्वाभावात्प्रमाणाभावेन च, सर्वगुणोपसंहारः कर्तव्य इति नेति भावः । (अयं च न्यायः 'अध्यानाय' इत्यनेन विप्रकीर्णगुणाध्ययनस्य सदृशफलसद्भावात्तत्तद्गुणोक्तिरिति नानोक्तेर्गतिं वदता सूचितः ।) त€तुत्वेन 'फलसाम्यम्' इत्युक्तसि€ान्तन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृणोति-

विप्रकीर्णान् गुणान् पिण्डीकृत्योपासितुस्तत्सदृशफलप्राप्तेस्तथा ध्यानार्थमेव गुणानामुक्त्युपपत्तेः ।। ८ ।।

।।विप्रकीर्णेति ।। नानास्थानोक्तगुणानित्यर्थः पिण्डीकृत्य एकज्ञानविायीकृत्य, तत्सदृशफलप्राप्तेः तदनुसारिमुक्त्यानन्दातिशयलक्षणफलप्राप्तेरित्यर्थः । तथा ध्यानार्थमेव पिण्डीकृत्योपासनार्थमेव, गुणानां नानास्थानेाक्तिरित्यनेन प्रकारेणोपपत्तिः । नानास्थानोक्तगुणानामुक्तेरित्यर्थः । विप्रकीर्णगुणोपसंहर्तुः फलविशोसद्भावात्तस्य दौर्ल भ्याय नानास्थानोक्तिरिति भावः । एवंच नानास्थानोक्तेरन्यथासि€र्विफलत्वस्यासि€श्च,

द्विविधाया अपि शङ्काया निरासादुक्तं प्रमाणद्वयमपि समर्थितं भवतीति प्रामाणिकत्वात्कर्तव्य एवोपसंहार इति स्थितम् । (अयं च न्यायः 'अध्यानाय' इत्यनेन सूचितः । एकस्थानोक्तगुणध्यानेन मोक्षगतफलविशोस्य साम्याभावात् ।) ।। ८ ।। ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ।। इत्यत्र, 'आनन्दादयः प्रधानस्य' इति, 'आत्मशब्दाच्च' इत्युभयथोक्तया, किमानन्दादयश्चत्वरोऽपि सर्वमुमुक्षूपास्याः, उतात्मत्वमेवेति सन्देहे, आत्मत्वमेव

सर्वमुमुक्षूपास्यमिति पूर्वः पक्षः, चत्वारोप्युपास्या एवेति सि€ान्तः । अत्र आशुतेत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नचाश्वापरोक्ष्यायानन्दादीनामपि लोपेनात्मेत्येतावता पूयर्ते आत्मशब्दार्थविशोत्वादानन्दादीनाम् ।। ९ ।। ।। नचाश्विति ।। आश्वापरोक्ष्यायेत्यनेन, अनुव्याख्याने अपरोक्षज्ञानस्येति सम्बन्धः प्रदर्शितो भवति । आनन्दादीनामित्यादिपदेन,

सत्वज्ञानयोर्ग्रहणम् । आत्मेत्येतावता पूर्यते आत्मेत्येवोपासीतेति सावधारणश्रुतेरिति भाव: । एवंचानन्दादीनां लोपेनात्मत्वस्यैवोपासनेऽपरोक्षज्ञानस्याशुतया, 'आनन्दादय: प्रधानस्य' इत्युक्तबाध इति नेति भाव: । (अयं च न्याय:, आनन्दादिगुणोपासनाविधायकश्रुत्यादे: 'आत्मैव' इति श्रुतिविरोधं परिहरता 'आत्मगृहीति:' इत्यनेनानन्दादिलोपेनात्मत्वमात्रोपासनविधायकस्यात्मेति वाक्यस्य आश्‍वपरोक्षसि€यादियुक्तियुक्तत्वेन पूर्वपक्षप्राबाल्यसूचनेन सूचित: ।) त€तुत्वेन 'विशो:' इत्युक्तसि€न्तन्यायं विवृणोति- आत्मशब्दार्थेति ।। आत्मशब्दार्थ: आत्मत्वं, आनन्दादीनामात्मत्वे विशोत्वं नाम, तत्प्रभेदत्वमिति ज्ञातव्यम् । नायं श्रौत आत्मशब्द: स्वामित्वमात्रवाचक:, येन तस्य सावधारणत्वेनानन्दादित्रयलोपेनात्मत्वमेवोपास्यं स्यात् । किं त्वानन्दादीनामपि वाचक: । तोमात्मत्वविशोत्वात् । तथाच स्मृति: । आनन्दानुभवत्वाच्च भण्यते । नित्यत्वाच्च तथात्मेति' इति । नचाश्‍वापरोक्ष्यसि€गुणलोभेन तल्लोप: कार्य इति वाच्यम् तथात्वे, तोां सम्पूर्णमोक्षाभावापत्ते: । 'नोत्क्रामन्ति कदाचन' इति स्मृते: । एवंचानन्दादीनामात्मशबदार्थविशोत्वात्, 'आत्मेत्येव' इत्यवधारणेऽपि नानन्दादिचतुर्गुणोपासनानियमभङ्ग इति भाव: । (अयं च न्याय: 'आत्मगृहीति:' इत्यनेनोक्त: ।) ॐ अन्वयादिति चेत्स्यादवधारणात् ॐ ।। इत्यत्र, उपास्यानुपास्यगुणदर्शनादात्मशबदोक्ता गुणा: सर्वोपास्या न वेति सन्देहे, न सर्वोपास्या इति पूर्व: पक्ष:, सर्वोपास्या इति सि€न्त: । तत्र, 'विभ्रम:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नचात्मशब्दो विभ्रमकर: गुणाधिकानामधिकारिणां भगवद्गुरानधिकान्प्रकाशयतीत्यवधारणत्वोपपत्ते: ।। १० ।।

।। नचात्मशब्द इति ।। अयं भाव: । आनन्दादीनां त्रयाणां गुणानामात्मत्वेऽन्तर्भावादात्मशब्दोक्ता एव गुणा: सर्वोपास्या इति यदुक्तम्, तŽा । आनन्दादीनामिव तदन्योामपि गुणानां 'आत्मव्याप्तेरात्मशब्द: परमस्य प्रयुज्यते' इति वचनादात्मत्वेऽन्तर्भावात् । यथा चात्मशब्द: श्रुतचतुर्गुणोपासनस्य पुंसो विभ्रमकर एव भवति, नत्वेवमुपासनं कार्यमिति निश्‍चायक: । नचात्मशब्दस्य सर्वगुणाभिधायकत्वेऽपि तदुक्तं स्वयोग्यमेवोपास्यमिति वाच्यम्, तथात्वे, 'आत्मेत्येव' इत्ययोगव्यवच्छेदपरावधारणविरोधापत्तेरिति । एवंचात्मशब्देनैतावतो गुणा: प्रतिपाद्यन्त इति निर्णयाभावेन विभ्रमकरत्वाŽात्मशब्दोक्ता: गुणा: सर्वोपास्या इति नेति भाव: । (अयं च न्याय:, आत्मशब्देन सर्वगुणान्तर्भावं वदता 'अन्वयादिति च' इत्यनेन सूचित: ।) त€तुत्वेन 'गुणाधिक्यम्' इत्युक्तसि€न्तन्यायं विवृणोति- गुणाधिकानामिति ।। अधिका गुणा उपास्या येाां ते तथोक्ता: । अधिकगुणोपासकानामिति यावत् । गुणैरधिकानामिति वा तात्पर्यं पूर्ववत् । अधिकारिणां ब्रह्मादीनां अनेन 'गुणाधिक्यम्' इत्यनुव्याख्याने अधिकारिणामिति सम्बन्ध: प्रदर्शित: । अन्योामल्पानेव प्रकाशयतीत्यर्थ: । इदमुक्तं भवति । यदुक्तमात्मशब्द: सर्वगुणाभिधायक:, तत्तथा स्यादेव । किन्तु बहगुणोपासकब्रह्मादीन् प्रत्येव सर्वगुणाभिधायको न सवर्ान्प्रति, तथानुभवात् । 'सर्वान्गुरानामात्मशब्दो ब्रवीति ब्रह्मादीनामितरेाां न वेति' श्रुतेश्‍च । एवंच सत्यात्मेत्येवेत्ययोगव्यवच्छेदपरमवधारणमप्युपपद्यते । आत्मशब्दस्य सर्वान्प्रति सर्वगुणाभिधायकत्वमङ्गीकृत्य, तदुक्तं स्वयोग्यमेवोपास्यमित्यङ्गीकारे हि तद्विरोध: स्यात्, नचैवमिति । एवंच चतुर्मुखाद्यधिकारिणां गुणाधिक्याद्युक्तं तदुपास्यगुणाभिधायकत्वमात्मशब्दस्येति । (अयं च न्याय: 'अयोगव्यवच्छेदपरावधारणात्' इत्यनेन सूचित: ।) ।। १० ।। ॐ कार्याख्यानादपूर्वं ॐ ।। इत्यत्र, ध्येय भगवद्गुणानामलौकिकत्वोक्तया, लोकदृयया च किं भगवद्गुणा: लौकिका उतालौकिका इति सन्देहे, लौकिका एव ध्येया इति सि€न्त: । तत्र, 'अप्राकृति:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

अलौकिकगुणानामप्रतीतेर्लौकिकगुणाध्याने तदपाकृतिरेव भवतीति न मन्तव्यम् लौकिकविलक्षणा अत्त्युत्तमा इति ध्यानस्यैव

प्राधान्यात् ।। ११ ।।

।। अलौकिकेति ।। अप्रतीते: अलौकिकगुणानां पूर्वमननुभवेन, ध्यानकाले स्मृतिŽ पप्रतीत्यभावात्, तदपाकृति: ध्यानाभाव इत्यर्थ: । भवति स्यादित्यर्थ: । ध्यानं चावश्यकम्, अतो लौकिका एव ध्येया इति नेति भाव: । (अयं च न्याय: 'अपूर्वम्' इत्यनेन सि€न्ते लौकिकगुणध्यानोक्तया, पूर्वपक्षे लौकिकगुणध्यानसूचनेन सूचित: ।) त€तुत्वने 'प्रधानस्य' इत्युक्तसि€न्तन्यायं विवृणोति- लौकिकविलक्षणा इति ।। वैलक्षण्यमेवाह- अतीति ।। प्राधान्यात् अलौकिकमोक्षŽ पकार्यजनकत्वेनेत्यर्थ: । तथाचोपासनस्य स्वानुसारिफलप्रदत्वनियमेनालौकिकमोक्षार्थमलौकिका एव ते ध्येया: । नचाप्रतीतिदोा:, इन्द्रादाविवोपदेशेन प्रतीत्युपपत्तेरिति भाव: । ततश्च पूर्वपक्षहेतोरसिसि€रित्यवधेयम् । एवंचालौकिकगुणध्यानस्य प्रधानतयालौकिका एव ध्येया इति भाव: । (अयं च न्याय: समस्तसूत्रेण सूचित: ।) ।। ११ ।। ॐ समान एवं चाभेदात् ॐ ।। इत्यत्र, कृयादिक्रियासु स्वानुसारिफलप्रदत्वतदभावदर्शनात्, भगवद्गुणोपासनं किं स्वानुसारिफलप्रदम्, न वेति सन्देहे, नेति पूर्व: पक्ष:, स्वानुसारिफलप्रदमिति सि€न्त: । 'लिङ्गम्' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

ब्रह्मणश्च ब्रह्माण्याश्च स्थानैक्यं गुणतारतम्यं च यथा गुणोपसनं मुक्तावाधिक्यं न भवतीत्यत्र लिङ्गम् समवि-ामोपासनायुक्तेरिति न मन्तव्यम् ।

।। ब्रह्मण इति ।। स्थानैक्यमुभयोरपि, सायुज्यभाक्तवादिति भाव: । गुणै: आनन्दादिभि:, तारतम्यं च लिङ्गमित्यन्वय: । यथा गुणोपासनं क्रियते, तथा मुक्तावाधिक्यं न भवतीत्यत्र, ब्रह्माणीब्रह्मणोरुपासनस्य तदभावात् । तयोरुपासनं किं समं विामं वा स्यात् । न हि फलं तादृशं स्थानैक्यस्य गुणतारतम्यस्य सद्भावेन फलस्य समविामत्वादित्यर्थ: । ननु, फलवदुपासनमपि समविाममेव किं न स्यादित्यत आह- समविामेति ।। गुणक्रिययो: साम्ये, वैाम्यायोगेन, वैाम्ये च, साम्यायोगेन, तयोर्विरोधादिति भाव: । एवंच ब्रह्माणीब्रह्मणो: स्थानैक्यगुणतारतम्यŽ पलिङ्गादन्येाामपि यथोपासनं मुक्तौ फलमिति भाव: । (अयं च न्याय: स्थानैक्यस्य गुणतारतम्यस्य च क्रियासङ्कोचद्वारा समविामोपासनसाध्यत्वं वदता 'समान एवं चाभेदात्' इत्यनेन सूत्रेण सूचित: ।) त€तुत्वेन 'यथाशक्तिक्रिया' इत्युक्तसि€न्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति-

यथाशक्तिस्मृतान् धात्रा गुणान्विणो: सरस्वती । स्मरेत्त्रैविक्रमाद्यांस्तु नित्यविक्रान्तिपूर्वकै: । कदाचिल्लोपयेद्देवी स्थानैक्यं न गुरैस्तत: । साम्यं तयोर्यथा विणोर्गुणोपासा फलं भवेदित्यध्यात्मवचनाद्यथाशक्तिक्रिया देव्या: ।। १२ ।।

।। यथाशक्तीति ।। यतो देवी सरस्वती, धतात्रा स्मृतान् ध्यातान् विणो: गुणान् नित्यविक्रान्तिपूर्वकै: सामान्यक्रियाभि: सह यथाशक्ति स्मरेत्, त्रैविक्रमान्यान् क्रियाशेाान् तु, त्रैविक्रमत्वाद्यशेाकारेण कदाचिल्लोपयेत्, न स्मरेत्, ततश्च तयो: धातृसरस्वत्यो: स्थानैक्यं गुणैर्न साम्यं यतोऽतो यथाशक्ति विणोर्गुणोपासना धर्मोपासा, तथा फलं भवेदिति योजना । यथाशक्तिक्रिया देवा इत्येनेनोदाहृतवचनगतयथाशक्तीत्यस्य नित्यविक्रान्तिपूर्वकैरित्यनेन सूचितो भवति । देव्या क्रिया यताद्यक्ति उपास्या, सामान्यक्रियोपसंहार एव कर्तव्यो न त्रिविक्रमत्वादिविशेाक्रियोपसंहार: । सर्वगुणोपसंहारस्तूभयो: सि€ एव । अतो भिŽावियत्वेन समविामोपासनस्य विरोधाभावेन युक्तत्वाल्लिङ्गपदोक्तपूर्वपक्षहेतोरन्यथासि€त्वेन, युक्तमेव यथागुणोपासनं मुक्तावाधिक्यं भवतीत्येतदिति भाव: । (अयं च न्याय: 'समान एवं च' इत्यनेन सूचितो भवति ।) ।। १२ ।। ॐ न वा विशेाात् ॐ ।। इत्यत्र, सर्वोपास्यानुपास्यगुणदर्शनादात्मशब्दोक्तगुणा: सर्वोपास्या न वेति सन्देहे, न सर्वोपास्या इति पूर्व: पक्ष:, सर्वोपास्या इति सि€न्त: । तत्र, 'अनवस्था' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नचात्मशब्देनास्य पुरुास्यैतावन्तो गुणा उच्यन्त इति व्यवस्थित्यभाव: यस्य यावन्तोऽर्था युगप€यातुं शक्यन्ते, तस्य तावन्त इति सन्धे: ।। १३ ।।

।। नचात्मशब्देनेति ।। नात्मशब्दोक्तगुणा: सर्वोपास्या: आत्मशब्दस्य सर्वगुणाभिधायकत्वात् । सर्वगुणोपासने च, सर्वोां योग्यताभावात् । ननु, 'अन्वयादिति चेत् स्यादवधाणात्' इत्यत्रात्मशब्द उत्तमाधिकारिण: प्रत्येव सर्वगुणाभिधायक इति निणर्ीतत्वात्कथं पूर्वपक्षोत्थानमित्यत उक्तम्- अस्येत्यादि ।। यद्यप्युक्तमात्मशब्द उत्तमाधिकारिण: प्रत्येव सर्वगुणाभिधायको न सर्वान् प्रतीति । तथाप्यस्य पुरुास्यैतावन्तो गुणा: आत्मशब्देनोच्यन्त इति प्रातिस्विकनियमनŽ पव्यवस्थितिर्नास्तीत्युत्पत्तिवैशद्यावैशद्यानुसारेण बह्वल्पगुणाभिधायकत्वसम्भवादित्यर्थ: । एवंच व्यवस्थित्यभावादात्मशब्दोक्तगुणानां सर्वोपास्यत्वाभाव इति नेति भाव: । (अयं च न्यायो 'नव' इत्यनेन

सर्वगुणगृहीतिनिोधाङ्गीकारसूचनेन सूचित: ।) त€तुत्वेन, 'सन्धि:' इत्युक्तसि€न्तन्यायं विवृणोति- यस्य यावन्त इति ।। अर्था: गुणा:, ध्यातुं शक्यन्ते ध्यानकाले प्रतीयन्त इत्यर्थ: । तावन्तो ध्यातव्या: । सन्धे: अभिसन्धे: । एवंचात्मशब्देन गुणप्रतीतेरेवमेव विवक्षितत्वादयोग्यप्रतीतेश्चोपासनानुपयोगित्वादुक्तं युक्तमिति भाव: । (अयंच न्यायो यस्य यावन्तो गुणा युगपत्प्रतीयन्त इत्येवंŽ पाद्विशाात्तस्य तावतो गुणान्प्रतिपादयतीति इदमेवात्मशब्देन गुणाभिधानर्मा भसंहितमिति वदता 'विशाात्' इत्यनेन सूचित: ।) ।। १३ ।। ॐ सम्भृतिद्युव्याप्त्यति चात: ॐ ।। इत्यत्र, पूर्वोक्तसन्देहबीजात् 'उक्षा सद्यावापृथिवी बिभर्ति, एा हि सर्वोु लेकेाु भाति' इत्यादौ प्रतीतभगवद्गुणान्तर्गतसम्भृतिद्युव्याप्ती किं सर्वमुमुक्षूपास्या न वेति सन्देहे, सर्वमुमुक्षूपास्येति पूर्व: पक्ष:, नेति सि€न्त: । तत्र, 'विशोात:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच मुमुक्षव इव इत्यविशाद्धरणस्य द्युतेश्च सर्वाामपेक्षितत्वाच्च सम्भृतिद्युव्याप्ती अपि सामान्ये सत्यो ज्ञानं परमानन्दŽ प आत्मेत्येवं नित्यदोपासनं स्यात् । नान्यत्किं चित्समुपासीत धीर: सर्वैगुणैर्देवगणा उपासते । गुण्याकारस्मृतेरेव द्युतिमात्रं प्रतीयते ।

।। नच मुमुक्षव इति ।। मुमुक्षव इव इत्यविशाात् मुमुक्षुत्वविशाात् मुमुक्षुत्वसाम्यादिति यावत् । ननु, सम्भृत्याद्युपासनेऽप्यानन्दाद्युपासनमात्रेणैवापेक्षितमोक्षसम्भवाŽा मुमुक्षुत्वोपपत्तिरित्यत उक्तम् - भरणस्येति ।। 'मोक्ष:' इति शो: । भरणस्य स्वाधमभरणस्येत्यर्थ: । फलस्योपासनानुसारित्वनियमादिति भाव: । अनेन भरणद्युत्यपेक्षावन्त इत्यविशाादित्यविशोतेति प्रकारान्तरेण विवृतमिति ज्ञातव्यम् । एवंच मुमुक्षुफलापेक्षितत्वयोरविशाात्सम्भृतिद्युव्याप्ती अपि सर्वोपास्ये इति नेति भाव: । (अयं च न्याय: अत एव योग्यताविशाादेव उपासनानियमेन मुमुक्षुत्वाविशाादिति वदतावधारणार्थकचशब्दसहितेन अत इत्यनेन सूचित: ।) त€तुत्वेन 'प्रमाणबलम्' इत्युक्तसि€न्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति- सत्यो ज्ञानमिति ।। अन्यत् सम्भृत्यादि, तर्हि 'उक्षा स द्यावा' इत्यादेर्वैयर्थ्यमत उक्तम्- सर्वैरिति ।। बहुभिरित्यर्थ: तर्हि अपेक्षितभरणद्युत्यप्राप्तिर्मुक्तानामित्यत आह- गुण्याकारस्मृतेरिति ।। मात्रपदव्यावर्त्यमाह-

न व्याप्तिर्जगदस्मृत्या नानाशक्तिर्यतो मता । देवानां युगपज्ज्ञानं मनुयाणां तथा न तु । पर्यायेणैव सत्या: स्युर्नैवान्योां कथञ्चनेत्यादिप्रमाणबलात् ।। १४ ।। क्वचिद्बहुगुणा: क्वचिदल्पगुणा: श्रुतिवेवोच्यन्त इत्युपसंहारस्य अप्रयोजनतेति न वाच्यम् ।

।। न व्याप्तिरिति ।। प्रतीयत इति सम्बन्ध: । तत्र हेतुमाह- जगदस्मृत्येति ।। जगत एव द्युव्याप्तिकर्मत्वादिति भाव: । जगत्स्मृत्याभावोऽपि कुत इत्यत आह- नानाशक्तिरिति ।। तदेव विवृणोति- देवानामिति ।। ज्ञानसम्भृत्यादीनाम् । तथा युगपत् किन्तु पर्यायेण क्रमेणैव, सत्या: प्रमिता: । युगपत्प्रतीतस्यैव ध्येयत्वात् । अन्योां अधिकारिणां, अत्र योग्यतैव उपास्तिनियमप्रयोजिका, न फलापेक्षेत्यविशोतेति पूर्वपक्षहेतोरप्रयोजकत्वमुदाहरणप्रमाणबाधितत्वं चाभिप्रेतमिति ज्ञातव्यम् । एवंच, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिप्रमाणबलात्सम्भृतिद्युव्याप्ती न सर्वोपास्ये इति नोक्तनियमभङ्ग इति भाव: ।

(अयं च न्यायो भायन्यायविवरणोदाहृतप्रमाणबलावगतयोग्याविशेाादित्यर्थकेन अत इत्यनेन सूचितः ।) ।। १४ ।। ॐ पुरुविद्यायामपि चेतरेाामनाम्नानान् ॐ ।। इत्यत्र, कर्तव्याकर्तव्यक्रियादर्शनात्सार्वत्रिकगुणोपसंहारः कर्तव्यो न वेति सन्देहे, न सर्वतो गुणोपसंहारः, कर्तव्य इति सिद्धान्तः । तत्र 'अप्रयोजनता' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति- क्वचिदिति ।। क्वचित् विद्यायां, श्रुतिवेवेत्यनेन सम्बन्धः । अप्रयोजनतेत्यनन्तरं 'न सर्वतो गुणोपसंहारः कार्यः' इति शेाः । ननु स्वयोग्यगुणोपासनाय सर्वत उपसंहारस्य कर्तव्यत्वात्, कथमप्रयोजनत्वमित्यत उक्तम्- क्वचिदिति ।। तथाच ये बहुगुणोपास्तियोग्याः, तेाां बहुगुणाभिधायकैकविद्यया, ये चाल्पगुणोपास्तियोग्यास्तेाामल्पगुणाभिधायकैकविद्ययोपास्तिसम्भवात्, सार्वत्रिकगुणोपसंहारमन्तरेणापि, स्वयोग्यगुणोपासनं सम्भवतीति भावः ।) एवंचोपसंहारस्याप्रयोजनतया न सर्वपरिज्ञानोपयोग इति नेत्याशयः । (अयं च न्यायः सर्वगुणप्रतिपादकविद्यां निोधता सूत्रेण सर्वगुणप्रतिपादकविद्यापूर्वपक्षिणोऽभिमतेति सूचनेनैतद्विद्यापरिज्ञाननैव सर्वगुणोपासनोपपत्तौ तत्रतत्रोक्तगुणोपसंहारस्याप्रयोजनतेति सूचितः ।) तदतुत्वेन 'अनुक्तिः' इत्युक्तसिद्धान्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति-

गुणाः सर्वे ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैमर्नुयेरित्यादिश्रुतेः । सर्वगुणोपासकस्याप्यधिकारिणोऽभावादेकत्रापृथक्सर्वगुणानुक्तेश्च बलादुपसंहारानतेः ।। १५ ।।

।। गुणा इति ।। अवधारणव्यावर्त्यप्रदर्शनार्थं नान्यैरिति श्रुतिशेाोदाहरणम् । ननूक्तसर्वगुणोपासकस्यापि सर्वगुणाधिभायकैकैककविद्याभिरेवोपास्तिः सम्भवतीति तत्राह- एकत्रेति ।। ननु तर्ह्येकस्यामेव विद्यायां सर्वगुणानुक्तेरस्तु चतुर्मुखस्य सर्वगुणोपसंहारः । अन्येाां महदल्पगुणाभिधायकैककविद्याभिरेवोपास्तिसम्भवात्सर्वत उपसंहारो व्यर्थ इत्यत उक्तम्- अपृथगिति ।। सङ्ख्यासाम्यसम्भवेऽप्यपृथक् एकस्यामेव विद्यायां सर्वगुणानुक्तिरित्युभयान्यथानुपपत्तिर्बाद्वलादित्यर्थः । सर्वत उपसंहारस्य अनतेः प्राप्तेः, एवं चान्यथानुपपत्त्या सर्वगुणोपसंहारस्यानतेस्तदर्थं सर्वगुणोपसंहारज्ञानोपयोग इति भावः । (अयं च न्याय एतेनैव सूत्रेण सूचितः ।) ।। १५ ।। ॐ वेद्याद्यर्थभेदात् ॐ ।। इत्यत्र, उपास्यानुपास्य भगवद्गुणदर्शनात्, 'अग्ने त्वचं यातुधानस्य भिन्धि', 'तं प्रत्यञ्चमर्चिाावियमर्मन्', 'परा णु हि तपसा यातुधानान्' इत्यादौ श्रुता वेधादयो भगवद्गुणाः सर्वोपास्या न वेति सन्देहे, सवर्ोपास्या इति पूर्वः पक्षः, नेति सिद्धान्तः । एतदधिकरणसम्बन्धित्वेन पृथक्पूर्वपक्षसिद्धान्तन्यायविवरणमेतदधिकरणस्य 'सम्भृतिः' इत्यधिकरणसमानयोगक्षेमत्वात्तत्सम्बन्धितया विवृतयोरविशेाीताप्रमाणबलाद्बाद्वलपूर्वपक्षसिद्धान्तन्याययोरेतदधिकरणसम्बन्धोऽपि ज्ञातुं शक्यत इत्यभिप्रेत्येवधेयम् । एवंच तत्र पूर्वपक्षन्यायविवरणे, 'द्युतेश्च' इति चशब्दो न केवलं समुच्चयार्थः किन्तु, अनुक्तवेधादिसमुच्चयार्थश्चेति । सम्भृतिद्युव्याप्तिशब्दौ वेधाद्युपलक्षकाविति व्याख्येयम् । एवंच फलापेक्षितत्वाविशेााद्वेधादि सर्वोपास्यमिति पूर्वपक्षफलम् । अत एवोक्तं तत्वप्रकाशिकायाम्, तस्य च सर्वसज्ञनापेक्षितत्वादिति । (अत्र 'वेधात्' इत्यनेन वेधादिसर्वोपास्यमिति पूर्वपक्षसूचनात् दुष्टनिग्रहस्य सवर्सज्ञनापेक्षितत्वविलक्षणाविशेाीता पूर्वपक्षन्यायः सूचितः ।) सिद्धान्ते तु, 'भिन्धि विद्धि श्रृणु हि' इति भायोदाहृतप्रमाणसङ्ग्रहायेत्यादिप्रमाणबलादिति आदिपदप्रयोगः । एवंच प्रमाणबलाद्वेधादि न सर्वोपास्यमिति सिद्धान्तफलम् । (अत्र, 'अर्थभेदात्' इत्यनेन भायोदाहृतप्रमाणबलेन वेधाद्युपासनाजनितफलस्य यत्याद्ययोग्यत्वाद्वेधादि न सर्वोपास्यमिति प्रमाणबलाद्बाद्वलपः सिद्धान्तन्यायः सूचितः । यद्वा, 'वेधात्' इत्यनेन वेधाद्युपासनानिोधं कुर्वता वेधादिकं सर्वापेक्षितत्वाद्विहितत्वादुपास्यं, सर्वापेक्षितस्याप्यनुपासने, तथाभूतानन्दादयो नोपास्या इत्यतिप्रसङ्गपूर्वपक्षन्यायः सूचितः । अत एवोक्तं तत्वप्रकाशिकायां, 'श्रुतिस्मृत्योर्विधानाच्च' इति । अर्थभेदादित्यनेन फलवैलक्षण्यात्कारणात्, वेधादि नोपास्यमिति फलवैलक्षण्यलक्षणं कारणं, सिद्धान्तन्यायः सूचितः ।) ।। १६ ।। ॐ हानौ तूपायनशब्दशेात्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॐ ।। इत्यत्र, प्राप्तकालत्वक्रियान्तरश्रुतिभ्यां भगवदुपासनां मुक्तेन क्रियते नवेति सन्देहे, नेति पूर्वः पक्षः, क्रियत इति सिद्धान्तः । तत्र, 'अतिप्रसङ्गः' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच मुक्तावुपासनाभावे फलादिकमपि स्यादित्यतिप्रसङ्गः उपासनायाः संस्काराख्यकारणस्य सत्वात् । न हीयते यत्र गत्वा यत्र गत्वा न वर्धत इत्यवृ€प्रमाणभावाच्च ।। १७ ।।

।। नच मुक्ताविति ।। आदिपदेनापूर्णतादिग्रहणम् । किं मुक्तेनोपासना विहिता वा क्रियते, उताविहिता वा, नोभावपि विकल्पौ, फलप्राप्तिप्रसङ्गात् । तथाचापूर्णताप्राप्तेः । किं चाद्ये विधब€त्वेन मुक्तेः संसारसमानधर्मत्वप्राप्तेः । द्वितीये, अविहितत्वादेव करणानुपपत्तिः । एवं चातिप्रसङ्गाŽा मुक्तावुपासनं कार्यमिति नेति भावः । (अयं च न्यायः 'साम्पराये कर्तव्याभावात्तथाह्यन्ये' इत्यनेन सूचितः । विधिबन्धवत्त्वाभावेऽपि, फलार्थमुपासनं स्यादिति शङ्कापरिहारकेणोपासनासद्भावे फलं स्यादिति सूचितः ।) त€तुत्वेन 'कारणम्' इत्युक्तसि€न्तन्यायं विवृणोति- उपासनाया इति ।। तथाचाविहितैव मुक्तेनापासना क्रियते । नचैवं कारणानुपपत्तिः, प्राक्कृप्तोपासनसंस्कारादेव तत्कारणोपपत्तेरित्यर्थः । अत्र, संस्कारः स्वभावविशो एव, नतु अनुभवजन्यः स्मृतिजनको गुणः । तेाु तदभावादिति ज्ञातव्यम् । एवमुत्तरत्रापि । ननु मुक्तावुपासनाभावे, फलं स्यादित्युक्तमेवेत्यत आह- न हीयत इति ।। फलाभावस्यैव प्रकृतोपयोगादवृ€त्येवोक्तम् । फलŽ पैव सोपासना, नतु साधनŽ पेति भावः नतु कुतः फलाभावमङ्गीकृत्य, तदीयोपासनस्य संस्कारबन्धनत्वं कल्पनीयम् । किन्तु मक्तौ तदातदा प्राप्तानियपरिहारार्तमानन्दाभिवृ€यथर्ं वा किं न स्यादित्यत आह- न हीयत इति ।। अवृ€त्युपलक्षणम्, अहानीत्यपि ग्राह्यम् । अत्र पूर्वपक्षे आपादकस्यान्यथासि€रुक्ता भवति । एवंच फलाभावेऽपि, संस्काराख्यकारणसद्भावादुपासनं मुक्तौ सम्भवतीति भावः । (अयं च न्यायः 'कुशाच्छन्दस्तुत्युपगानवत्' इत्यनेन संस्कारवशादिच्छयैवोपासनादिकरणोक्तया सूचितः ।) ।। १७ ।। ॐ छन्दत उभयाविरोधात् ॐ ।। इत्यत्र, करणाकरणयोर्विरोधान्मुक्ताः किमुपासनावŽायमेन कर्म कुर्वन्ति, न वेति सन्देहे, नियमेन कुर्वन्तीति पूर्वः पक्षः, नेति सि€न्तः । तत्र, 'अदूरसंश्रयः' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच कर्मकरणशक्तेरप्यदूरत्वात्तत्संश्रयनियमः उपासनाख्ये कायर्े नित्यकृतिसंस्कारो न तथा कर्मणीति कार्यवैशेयात् ।। १८ ।।

।। नचेति ।। अपिपदेन, शक्तिसद्भावेऽपि, कर्मकरणनियमाभावे उपासनस्यापि नियमो न स्यादविशोादिति विपक्षे बाधकं सूचितम् । अदूरत्वात् सŽाहितत्वात्, सद्भावादिति यावत् । तत्संश्रयः कर्मकारणम्, बु€या विवेकेन तच्छब्देन कर्मणः परामर्शात् । एवंच कर्मकरणशक्तैरदूरत्वात्कर्मापि नियमेन कर्तव्यमिति नेति भावः । (अयं च न्यायः 'छन्दत उभयविरोधात्' इत्यनेन कर्मणि नियमाभावोक्त्या, कर्मकरणशक्तेरप्यदूरत्वात्तत्संश्रयनियम इति सूचितः ।) त€तुत्वेन, 'कार्यवैशेयम्' इत्युक्तसि€न्तन्यायं विवृणोति- उपासनाख्येति ।। नित्यकृतिसंस्कार इति सदाकरणेन संस्कार इत्यर्थः । तथाच न मुक्ताः किमनेन कर्म कुर्वन्ति, कर्मणि नित्यकरणेन संस्काराभावात् । नचैवमुपासनायामपि नियमो न स्यादिति वाच्यम् । उपासनाख्यकार्ये नित्यकृतसंस्कारस्य सत्वादित्यर्थः । अनेनादूरत्वस्याप्रयोजकत्वमुक्तं भवति । एवंच कायर्योरुपासनाकर्मणोः संस्काराख्यकारणसत्वासत्वŽ पवैशेयाŽा कर्मनियम इति भावः । (अयं च न्यायः 'तल्लक्षणार्थोपलब्धेः' इत्यनेन कर्मणो विशोहेत्वभावे सति प्राप्तफलत्वादुपासनस्य सद्भावादिति वदता सूचितः । यद्वा, 'उभयाविरोधात्' इत्यनेन कर्मकरणाकरणयोर्विरोधाभावादिति वदतोपासनाकरणे विरोधोऽस्तीति सूचनाŽात्यज्ञानस्वŽ पत्वादिकायवैशेयं सूचितम् ।) ।। १८ ।। ॐ अनियमः सर्वाामविरोधाच्छब्दानुमानाभ्याम् ॐ ।। इत्यत्र, ज्ञानादेस्तत्साधकप्राप्यत्वाप्राप्यत्वŽ पदर्शनान्मोक्षŽ पं फलं किं अनियमेन सर्वज्ञानिप्राप्यमुत केाञ्चित्प्राप्यं केाञ्चिŽात नियम इति सन्देहे, केाञ्चिदेवेति नियम इति पूर्वः पक्षः, अनियमेन सर्वज्ञानिप्राप्यमिति सि€न्तः । तत्र, 'विशियकारणम्' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नचायोग्यताख्यविशियकारणाङ्ज्ञानिवपि केाञ्चिन्मोक्षो न भवतीति नियम: ज्ञानिनां मोक्षं ददात्येवेश्-वर: स्वभावात् ।

।। नचायोग्यताख्येति ।। अयोग्यताया आगन्तुकज्ञानापेक्षया प्राबल्यद्योतनार्थं विशियेत्युक्तम् । एवंच ज्ञानिवपि के-ाञ्चिन्मोक्ष इति न नि:शङ्कमुपासनं कार्यमिति नेति भाव: । (अयं च न्यय: सर्वेामपि गुणोपसंहारयोग्यताङ्गीकारे, प्रमाणविरोधाभावादिति वदता 'विरोधात्' इत्यनेन सूचित: ।) त€तुत्वेन 'स्वभाव:' इत्युक्तसि€न्तन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृणोति- ज्ञानिनामिति ।। ददात्येवेत्यवशब्देनानियमं सूचयति । प्रसŽो हीश्-वरो मोक्षस्य चरमकारणम्, 'यस्य प्रसादात्' इति श्रुते: । ईश्-वरप्रसादश्-चापरोक्षज्ञानेनैव, ईश्-वरस्य ज्ञानिप्रियत्वस्वभावात् । 'प्रियो हि ज्ञानिनोऽत्यर्थम्' इति श्रुते: । तथाच सर्वेामप्यपरोक्षज्ञानिनामीश्-वरप्रसादŽ पचरमकारणसद्भावात्, मोक्षो भवत्येवेति भाव: । नन्वीश्-वरोऽप्ययोग्यानां ज्ञानिनां कथं मोक्षं दद्यात्, वैाम्याद्यापत्तेरित्यत आह-

अयोग्यानां ज्ञानस्यैवोत्पत्त्यनुपपत्ते: ।। १९ ।। नच प्रयत्नानुसारिणो मुक्तावाधिकारिकानन्दादय: ।

।। अयोग्यानामिति ।। 'स्वभावात्' इत्यस्यात्रापि सम्बन्ध: । अनेन, विशियकारणमिति पूर्वपक्षहेतोरसि€रुक्ता भवति । एवंचेश्-वर: स्वभावात् सर्वेां ज्ञानिनां मोक्षं ददातीति नि:शङ्कमुपासनं कतर्व्यमिति भाव: । (अयं च न्याय: 'तस्मादाहु: सृतिहेति' इति ईश्-वरस्य मुक्तिदानस्वभावप्रतिपादकश्रुतिग्राहकेण शब्दपदेन सूचित: । 'सृतिहेति' इत्यस्य ताच्छीलिकक्किबन्तत्वात् ।) ।। १९ ।। ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ।। इत्यत्र, उपासनाया अधिकारिनियमोक्तया, लौकिकक्रियायां च तददृयया ब्रह्मोपास्तिमन्त उपासनाधिकारनियतिमन्तो न वेति सन्देहे, नेति पूर्व: पक्ष:, अधिकारनियतिमन्त इति सि€न्त: । तत्र, 'चेया' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नच प्रयत्नेनेति ।। अनेन चेयाशब्द: प्रयत्नपर इति व्याख्यातव्यम् । तथाच नोपास्तिमन्तोऽधिकारनियतिमन्त: । तत्र प्रमाणाभावात् । ननु 'वृ€ह्रासभाक्त्वम्' इत्युक्तरीत्या मुक्तिगतानन्दतारतम्यस्यैव साधनतारतम्ये प्रमाणत्वेन, कथं तदभाव इत्यत उक्तम्- प्रयत्नानुसारिण इति ।। स्यादेतदेवं, यद्यधिकारिणां ब्रह्मादीनां मुक्तावानन्दादयोऽधिका: स्यु: । नचैवम् । तेामुपासनादिप्रयत्नानुसारेणैवान्यथासि€त्वादिति भाव: । एवंच चे-यानुसारेणानन्दादितारतम्योपपत्तेरधिकारिनियमाभावात् 'प्राप्तेश्-च समञ्जसम्' इत्युक्तमिति नेत्याशय: । (अयं च न्यायो 'यावदधिकारम्' इत्यनेन, अधिकारानुसारेणैवानन्दादीनां स्थितिर्न प्रयत्नानुसारेणेति प्रयत्नस्याप्रयोजकत्वसूचनात्सूचित: ।) 'वस्तुदूाणम्' इत्युक्तसि€न्तन्यायं सङ्गमयितुमाह-

अधिकारानुसारित्वात्प्रयत्नस्य कथं चिदधिके यत्ने तत्साधनादिवस्तूनां दूाणप्राप्ते: । स्वाधिकाराधिको यत्न: प्रायशो नोपपद्यते । कथं चिदधिके यत्ने दोा: कश्-चित्समापतेदिति वचनाच्च ।। २० ।। न चैकस्मादेको विशियो दृय एवेति

प्राणाद्विशियजीवाभावे दृयवैŽ प्यमिति दोा: ।

।। अधिकारेति ।। ततश्-चाधिकारिनियमानभ्युपगमे, प्रयत्नस्यैवासि€र्न तदनुसारित्वे मुक्तावानन्दतारतम्यस्यान्यथासि€रित्यर्थ: । ननु स्वाधिकारापेक्षयाधिकोपासनादेर्दर्शनात्, कथमेतदित्यत: सि€न्तन्यायं विवृणोति- कथञ्चिदिति ।। अत्र प्रमाणमाह- स्वाधिकारेति ।। एवंचाधिकाराधिकप्रयत्ने, वस्तुदू-ाणादुपासनाधिकारनियमसद्भावादुक्तं युक्तमित्यर्थ: । (अयं च न्याय: 'आधिकारिकाणाम्' इत्यनेन, अधिकाराधिकप्रयत्नराहित्यं सूचितम् । तच्चाधिकप्रयत्नाकरणेन वा कृतस्य दूाणाद्वा सम्भवतीति सूचित: ।) ।। २० ।। ॐ इयदामननात् ॐ ।। इत्यत्र, अनुक्तेर्वस्तुविद्यमानत्वाविद्यमानत्वसाधारण्यदर्शनादुपासनाधिकारिण: किं प्रमाणावसाना नवेति सन्देहे, नेति पूर्व: पक्ष:, प्रमाणावसाना इति सि€न्त: । तत्र, 'दृयवैŽ प्यम्' इत्युक्तपूर्वपक्षन्यायमर्थात्तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति- नचैकस्मादिति ।। प्राणाद्विशियस्य लक्ष्म्ादे:

सि€ान्तिनाप्यङ्गीकाराज्जीवेत्युक्तम् । तेन च तस्याधिकारसूचनेन पूर्वपक्ष्यभिमतसिर्€: । अत्रैतत्तर्कानुगृहीतमनुमानम् । प्राण:, स्वोत्तराधिकारिक:, जीवत्वात्, नामादिवदिति ज्ञातव्यम् । एवंच प्राणादुत्तमाधिकार्यभावे दृयवैŽ प्यात् प्राणादुत्तमसद्भावात् प्राण एव सर्वगुणोपास्तियोग्य इत्ययुक्तमिति नेति भाव: । (अयंच न्याय: 'अन्तराभूतग्रामवत्' इत्यनेन भूतसमूहे एकस्मादेकस्याधिकस्य दृयत्वात्, प्राणादधिकस्याभावे दृयविरोध: स्यादिति वदतोक्त: ।) त€ुत्वेन 'प्रतिक्रियाविरोध:' इत्युक्तसि€ान्तन्यायं प्रमाणोदाहरणपूर्वकं विवृणोति-

य: सर्वमवजानीयाद्दते देवं नारायणं देवीं च परमां श्रियम् । स प्राणानवरुध्येमं मन्त्रमावर्तयीत । आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव ए: । घोाा इदस्य श्रृण्विरे न Ž पं तस्मै वाताय हविाा विधेमेति । स ह्योां भूतानां वरिष्ठो न ह्येतस्मात्कश्चनोपरि विना देवं नारायणं देवीं च परमां श्रियमिति प्रतिक्रियाविधानादिविरोधात् ।। २१ ।।

।। य: सर्वमिति ।। सर्वं प्राणसहितम्, स: वातावज्ञाकर्ता, प्राणानवरुध्य प्राणायामं कृत्वा, मन्त्रमावर्तयीत, वतावज्ञाप्रतिक्रियात्वेन देवानां आत्मा स्वामी, भुवनस्य गर्भ: गर्भ इवान्तर्गत:, यथावशं यथेयम्, इयदेव ृण्विरे श्रूयन्ते, Ž पं प्रतिमा, 'न दृश्यते' इति शो: । य ए चरति । यस्यास्य रथघोाा एव अशरीरवाग्रूपा: श्रूयन्ते, न Ž पं दृश्यते, तस्मा इत्यथर्: । कुतो वातावज्ञाप्रतिक्रियात्वेनैवैतन्मन्त्रजपकरणमित्यत उक्तम्- स ह्योामिति ।। वरिष्ठत्वे हेतु: । न ह्येतस्मादिति ।। कञ्चनेति अस्यापवाद: । विधानादेवमिति ।। विधानादित्यादिपदेन, 'प्राणो वा व सर्वेभ्यो भूयात्' इत्यादिश्रुतिग्रहणम् । अनेन, 'प्रतिक्रियाविरोधाश्च' इत्यनुव्याख्यानगतश्चशब्दार्थ उक्तो भवति । तथाचोक्तानुमानस्य बाधितवावियत्वमुक्तं भवति । तथाचोक्तानुमानस्य बाधितवावियत्वमुक्तं भवति । एवंच, प्रतिक्रियाविधानादिविरोधात्, प्राण एव सर्वाधिकायुत्तम इति स एव सर्वगुणोपास्तियोग्य इति भाव: । (अयं च न्याय: प्रथमे 'आमनानत्' इति द्वितीये 'तदुक्तम्' इति तृतीये' उपदेशवत्' इत्यन्तै: सूत्रांशैर्न्यायविवरणानुसारेण प्रतिक्रियाद्यभिधायकश्रुतिग्राहकै: सूचित: ।) ।। २१ ।। ॐ व्यतिहारो विशिंान्ति हीतरवत् ॐ ।। इत्यत्र, वादिविप्रतिपत्त्या विणु: प्राणादुत्तमो न वेति सन्देहे, नेति पूर्व: पक्ष:, उत्तम इति सि€ान्त: । तत्र, 'उŽाति:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

अस्ति भगव: प्राणाद्भूय इति प्रश्नाद्यभावात्प्राणस्यैवोŽातिप्रतीतेर्न विणोरपि तत: परत्वमिति न मन्तव्यम् ए तु वा अतिवदतीति विशोाणात्प्रश्नप्रतिवचनप्रतिसन्धानोपपत्ते: ।। २२ ।।

।। अस्ति भगव इति ।। अत्रापि सत्यपदेन प्राण एवोच्यते, न विणु: । नामादिप्रकरणवत् अस्ति भगव: प्राणाद्भूय: इति प्राणाद्वा व भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति सत्यं वा व प्राणाद्भूय: इति प्रकरणभेदकप्रश्नाद्यभावात् । नहि कारणविशोामन्तरेण प्रकरणभेद: कल्पयितुं शक्यत इति भाव: । एवंच प्रकरणभेदकप्रश्नाद्यभावात्, सत्येनेत्यस्यापि प्राणपरत्वेन, प्राणस्यैव सर्वोत्तमत्वाŽा विणूपासनं सर्वै: कार्यमिति नेति भाव: । (अयं च न्याय: 'विशिंान्ति' इत्यनेन प्राणात्परमात्मन उत्तमत्वस्योक्तत्वादिति वदता सूचित: ।) त€ुत्वेन 'प्रतिसन्धि:' इत्युक्तसि€ान्तन्यायं विवृणोति- ए तु वेति ।। प्रश्नप्रतिवचनप्रतिसन्धाने हेतुप्रदर्शनार्थमेतदित्युक्तम् । प्रतिसन्धानं अध्याहार: । अयं भाव: । यदुक्तम्, 'प्रतिवाद्याभावात्सत्यशब्दोक्तो न विणु:' इति । तŽा, प्रश्नाद्यध्याहारसम्भवात् । नचात्र कारणाभाव:, 'स वा ए एवं पश्यŽावं मन्वान एवं विजानŽातिवादो भवति' इति प्राणवादिनोऽतिशयितवस्तुवादित्वेनातिवादित्वमुक्तवा, 'ए तु वा अतिवदति य: सत्येनातिवदति' इति सत्याख्यवस्तुवदतोऽप्यतिशयितवस्तुवादित्वमुच्यते । तत्र, प्राणातिवादिन: सत्यातिवादी तुशब्देन विशियते । तस्मात्प्राणसत्यवादिनोर्भिŽात्वात्प्राणसत्ययोर्भेद इति । एवं च प्रश्नप्रतिवचनप्रतिसन्धानात्,

सत्यपदोक्तस्य विणोरेव सर्वोत्तमत्वमिति युक्तं तदुपासनमिति भाव: । (अयं च न्यायो 'व्यतिहार:' इत्यनेनोक्त: ।) ।।

२२ ।। ॐ सैव हि सत्यादय: ॐ ।। इत्यत्र, प्राणाद्विणुरुत्तम इत्युक्तेस्तन्मात्रोत्तमत्वतदन्यानेकोत्तमत्वयोर्विरोधाभावात्, किं प्राणाद्विणुरेवोत्तम:, किं तदन्योऽपीति सन्देहे, तदन्योऽपीति पूर्व: पक्ष:, विणुरेवोत्तम इति सिद्धान्त: । तत्र, 'अनुक्ति:' इत्युक्तपूर्वपक्षन्यायं तत्साध्यप्रदर्शनपूर्वकं विवृण्वन्प्रतिक्षिपति-

नच सत्यादीनामभेदानुक्तेरन्यत्वम् सत्यं पूर्णं विज्ञानं पूर्णं वृत्ति: पूर्णा निष्ठा पूर्णा श्रद्धा पूर्णा मति: पूर्णा सुखं पूर्णं भूमा पूर्णोऽहं पूर्ण आत्मा पूर्णो नात्र किञ्चिदूनं पूर्णमेवाधस्तात्पूर्णमुपरियात्पूर्णं मध्यम: पूर्णं सर्वत: । तदो श्लोको भवति पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशियत इति श्रुते: सर्वाामनूनत्वात् । सत्याद्या अहमात्मान्ता यद्गुणा: समुदीरिता: । तस्मै नमो भगवते यस्मादेव विमुच्यत इति वचनाच्च ।। २३ ।।

।। नच सत्यादीनामिति ।।आदिपदेन विज्ञानमतिश्रद्धानिष्ठकृतिसुखभूमाहङ्कारात्मनां नवानां ग्रहणम् । अनुक्ते:, छन्दोगश्रुतावित्यर्थ: । एवंच सत्यादीनामभेदस्यानुक्तत्वेन, तेाां भिन्नत्वात्सत्यादुपरिपठितज्ञानादीनां सत्यपदोक्तविणूत्तमत्वप्राप्त्या, विणुं विना प्राणस्य सर्वोत्तमत्वं विणोर्निरुपचरितसर्वोत्तमत्वं च न युक्तमिति नेति भाव: । (अयं च न्याय: 'सैव' इत्यभेदोक्तया सत्यादीनामभेदस्यानुक्तत्वादिति सूचित: ।) तद्धेतुत्वेन, तनूनतेत्युक्तसिद्धान्तन्यायं श्रुत्युदाहरणपूर्वकं विवृणोति- सत्यं पूर्णमिति ।। यदुक्तं, छन्दोगश्रुतौ सत्यादीनामभेदानुक्तेरन्यत्वमिति, तन्न । यतस्तच्छाखोक्तानेव सत्यादीननूद्यात्र तेाां पूर्णत्वमुच्यते । नहि तेाामन्यत्वे पूर्णत्वं सम्भवति । तस्य च विणुलक्षणत्वादिति भाव: । नचाभेदानुक्तिदोा:, 'सत्यं भगवो विजिज्ञास:' इति सत्याख्यस्य विणोर्गुणजिज्ञासायां, तद्गुणत्वेन तदविनाभूतज्ञानस्योक्तत्वात्तथोत्तरत्रापि तत्तद्गुणत्वोक्तया 'भेदो न' इत्यहङ्कारात्मनोस्तयारभेदस्यानुक्तेरित्यत उक्तम् । पूर्णमेवाधस्तादित्यादिना अहङ्कारात्मनोरुच्यत इति तयोरपि ब्रह्मस्वन पत्वसिद्धिरिति भाव: । तत्रैव वक्ष्यमाण: श्लोक: सम्मतित्वेन भवति । एतच्छ्लोकार्थोऽन्यत्र, टीकाकारैरुक्तो द्रयव्य: । प्रकारान्तरेणाप्येतां शङ्कां परिहरन् सत्यादीनां विणुस्वन पत्वे स्मृतिमाह- सत्याद्या इति ।। सत्यादिवदभेदानुक्तावप्यहङ्कारात्मनोरस्यैव भगवत्स्वन पत्वमित्यत्र हेतु:-यस्मादिति ।। 'स वा ए एवं पश्यन्नेवं विजानन्नात्मरति:' इत्यादिनाहङ्कारात्मज्ञानान्मोक्ष: श्रूयते । मोक्षस्तु भगवत्प्रसादादेवातश्च तरोरभेद इति भाव: । एवंच सत्यादीनामनूनतयाऽभेद एवेति स एव प्राणादुत्तम इति भाव: । (अयं च न्याय: हिशब्देन भायोदाहृतब्रह्मतर्कवाक्यवदत्रोदाहृतानूनताप्रतिपादकश्रुतेरपि सूचनात्सूचित: ।) ।। २३ ।। ॐ कामादितरत्र तत्र चायतनादिभ्य: ॐ ।। इत्यत्र, भगवदुपास्तावधिकार्यनधिकारिचेतनप्रतीत्या, श्रीरधिकारिणी, नवेति सन्देहे, अधिकारिणीति पूर्व: पक्ष:, नेति सिद्धान्त: । तत्र, 'अप्रयत्नत्वम्' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति-

नच श्रियोऽप्रयत्नत्वादनुपासनं संसारो वा ।

।। नच श्रिय इति ।। अनेन विपक्षे बाधकमुक्तवा, हेतुसिद्धि: समर्थिता । हेतुमाह- संसारो वेति ।। तदयमर्थ: । श्रीरधिकारिणी, साधुत्वे सति संसारित्वाभाव:, तथासति कृताथर्त्वेन मोक्षार्थं प्रयत्नराहित्यप्राप्तौ, प्रमाणसिद्धभगवदुपासनं न स्यादिति । यद्वा, श्रियोऽधिकाराभावं वदन् प्रयव्य:, सा कृतार्था, न वेति । आद्ये कृतार्थत्वादेव प्रयत्नशून्यत्वेन भगवदुपासनाभाव: स्यात् । अस्वतन्त्रायास्तस्या: कृतार्थत्वे कारणाभावाच्च । द्वितीये संसारप्राप्तिश्च । पक्षान्तरदूणत्वज्ञापनार्थं वशब्द: । एवं श्रियोऽप्रयत्नत्वे भगवदुपासनं न स्यादित्यकृतार्थत्वेन संसारित्वादधिकारोऽस्त्येवेति नाधिकारिणां प्राणावसानत्वमिति नेति भाव: । (अयं च न्यायो नित्यमुक्तत्वप्रतिपादकाभ्यां प्रथमतृतीयसूत्राभ्यां सूचित: ।) तत्र तावच्छ्रिय: कृतार्थत्वमङ्गीकृत्य, कारणाभावलक्षणदोापरिहारार्थं 'उपस्थितेस्तद्वचनात्' इति सूत्राथर्माह-

नित्यं भगवदुपस्थितेरतिप्रियत्वात्संस्कारपाटवान्नित्योपासापपत्तेश्च ।। २४ ।। नच बन्धदार्ढ्ये श्रवणादीनामफलता । अन्यथोपासां विनैव श्रवणादिज्ञानमात्रेण मुक्तिरिति दोा: ।

।। नित्यमिति ।। अतिप्रियत्वादित्यनन्तरं नित्यमुक्तत्वोपपत्तिरिति शेा: । तत्सम्बन्धित्वेन, 'श्रिय:' इत्यस्यानुवृत्ति: । चतुर्मुखादावनैकान्त्यपरिहाराय - अतीति ।। तदपि कुत इत्यत उक्तम्- नित्यं भगवदुपस्थिते: इति अत्रापि नित्यमित्यस्य अतीतस्येव सार्थक्यम् । तथाच श्रियोऽस्वातन्त्र्येऽपि, भगवत्प्रियत्वाख्यकारणसद्भावार्Ăित्यमुक्तत्वोपपत्तिरिति भाव: । इदानीं कृतार्थत्वपक्षेऽप्रयत्नत्वादनुपासनमित्युक्तदोपरिहारार्थं संस्कारपाटवमित्युक्तसिद्धान्तनायायं विवृणोति- संस्कारपाटवादिति ।। चशब्दो नित्यमुक्तत्वोपपत्तिसमुच्चयार्थ: । तथाच संस्कारस्यासिद्धत्वाĂाधिकारिणी श्रीरिति युक्तमधिकारिणां प्राणावसानत्वमिति भाव: । (अयं च न्याय: 'आदरादलोप:' इत्यनेन संस्कारपाटवादुपासनं सम्भवतीति

वदता सूचित: ।) ।। २४ ।। ॐ तĂिर्धारणार्थनियमस्तद्दृये: पृथग्ध्यप्रतिबन्ध: फलम् ॐ ।। इत्यत्र, 'श्रोतव्य:' इत्यादिश्रवणविधे: समस्तव्यस्तोपासनयो: साधारण्यात्किं समस्तमुपासनं कर्तव्यमुत व्यस्तमिति सन्देहे, व्यस्तं कर्तव्यमिति पूर्व: पक्ष:, समस्तं कर्तव्यमिति सिद्धान्त: । तत्र, 'दृयबन्ध:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति- नच बन्धदार्ढ्यमिति ।। ध्यानं विना श्रवणमननमात्रानिवर्त्यस्य बन्धस्य ज्ञानप्रतिबन्धस्य, दार्ढ्येऽङ्गीक्रियमाणे, आवश्यकध्याननैनैव बन्धनिवृत्तिद्वारापरोक्षज्ञानसम्भवाच्छ्रवणादीनामफलता वैयर्थ्यम्, श्रवणमननातिब्ाहुल्यात्साधनान्तरापेक्षया वा, श्रवणादीनामिति बहुवचनम् । अन्यथा बन्धदार्ढ्याभावे, ध्यानĂ पमुपासां विनैव श्रवणादिज्ञानमात्रेण श्रवणमननमात्रजनितापरोक्षज्ञाने मुक्तिजनकत्वलाभार्थमपि न ध्यानजन्यत्वापेक्षेति सूचयति । एवंच दृढबन्धाद्ध्यानेनैवापरोक्षज्ञानमिति श्रवणादीनां वैयर्थ्याद्व्यस्तमेवोपासनं कर्तव्यमिति नेति भाव: । (अयं च न्याय: अप्रतिबन्ध: फलमित्येतेन श्रवणादे: प्रतिबन्धनिवृत्तिफलत्वोक्तया सूचित: ।) तद्वत्तुल्येन 'स्वेच्छानियति:' इत्युक्तसिद्धान्तन्यायं प्रमाणोदाहारणपूर्वकं विवृणोति-

श्रवणादित्रयोत्पĂादृययैव स्वेच्छया हरि: । प्रसĂाो मुक्तिदो नित्यमन्यथा न कथञ्चनेति ईश्वरेच्छानियतिश्रुते: ।। २५ ।। नच गुर्वधीनत्वे ज्ञानमोक्षयोर्ज्ञानिनोऽपि कदाचिद्गुरुकोपाज्ज्ञानपराभावेनामुक्तिप्रसङ्गाĂा गुर्वधीनत्वमिति । ज्ञानिनो गुरुशापेऽपि नामुक्ति: संसृते: क्वचित् । आनन्दह्रासदोाण सैव मुक्तिर्विदूयतीति वचनान्मुक्तिदूाणेनैव गुरुकोपादे: कृतार्थत्वात् ।

।। श्रवणादीति ।। एवंचेश्वरेच्छानियत्या श्रवणादित्रितयजन्यापरोक्षज्ञाननैव मुक्तिरिति समस्तमेवोपासनं कर्तव्यमिति भाव: । (अयं च न्यायो हिशब्देन भायोदाहृतश्रुतिरिवेश्वरेच्छानियतिप्रतिपादकन्यायविवरणोदाहृतश्रुतेरपि ग्रहणेन सूचित: ।) ।। २५ ।। ॐ प्रदानवदेव हि तदुक्तम् ॐ ।। इत्यत्र, श्रवणाद्युपासनाकतर्व्यताविधे: श्रवणादेरिति कर्तव्यतासाहित्ये वा पर्यवसानाच्छ्रवणादिकं किं यथा कथञ्चिदनुष्ठितं ज्ञानसाधनमुत गुरुप्रसादपूर्वकप्रदानयुक्तमिति सन्देहे, यथा कथञ्चिदनुष्ठितमिति पूर्व: पक्ष:, गुरुप्रसादपूर्वकप्रदानयुक्तमिति सिद्धान्त: । तत्र, 'पराभव:' इत्युक्तपूर्वपक्षन्यायं विवृण्वन्प्रतिक्षिपति- नच गुर्वधीनत्व इति ।। ज्ञानिनोऽपीत्यादौ ज्ञानिपदमुपासकस्य, ज्ञानपदमुपासनयो: अमुक्तिपदं ज्ञाना भावस्योपलक्षकमिति ज्ञातव्यम् । नच गुर्वधीनत्वमित्यत्रापि, ज्ञानमोक्षयोरित्येतत्सम्बध्यते । एवंच ज्ञाने गुर्वपेक्षाभावात्, न तदुक्तप्रकारेणोपासनं कर्तव्यमिति नेति भाव: । (अयं च न्याय: 'प्रदानवत्' इत्यनेन ज्ञानस्य गुरुप्रदानसाध्यत्वप्रतिपादकेन सूचित: ।) तद्वत्तुल्येन 'वस्तुवैभवम्' इत्युक्तसिद्धान्तन्यायं विवृणोति-

ज्ञानिनो ब्रह्मवस्तुवैभवेन मुक्ति: स्यादिति गुरोर्वरेण वा मुक्तयुपपत्ते: ।। २६ ।। शियस्यापि पुरुात्वसाम्याद्वारणादेस्तत्प्रयत्नस्य न दौर्बल्यमिति न मन्तव्यम् ।

।। ज्ञानिन इति ।। साक्षात्कृतब्रह्मसामर्थ्येन, तव मुक्तिर्भूयादिति शियं प्रति गुरोर्वरेण वा यदि मुक्तयुपपत्तिस्तर्हि गुरुशापादेर्वैयर्थ्यमित्यत: कृतार्थत्वादित्यन्तमुक्तम् । एवंच, ब्रह्माख्यवस्तुवैभवेन ज्ञानिनां मोक्षस्य

